# सूची


| क्रमः | प्रबन्धः (पठितुं नुदतु) | पुटसङ्ख्या (पठितुं नुदतु) |
|---|---|---|
| 1 | सम्पर्कः (पराम्बायोगमायाकृतस्य कथासङ्ग्रहस्य समीक्षा) | १ |
| 2 | स्वरवर्णानामुच्चारणे विहितानां दोषाणाम् ऋक्प्रातिशाख्यानुसारेण विवेचनम् | ४ |
| 3 | वरेण्याः कथासर्जकाः | ८ |
| 4 | सीताहरणम् अन्याश्च रचनाः कदम्बकम् (काल्लूरिहनुमन्तरावकृतस्य ग्रन्थस्य समीक्षा) | १६ |
| 5 | अच्युतानन्दकथासाहित्यम् (अच्युतानन्ददाशकृतकथासङ्ग्रहस्य समीक्षा) | १८ |
| 6 | श्रीरामकृष्णवेदान्ते वेदान्तत्रयसमन्वयः | २१ |
| 7 | हेमशकटिकस्य समीक्षात्मकमध्ययनम् (एच्.आर.विश्वासकृतस्य संस्कृतोपन्यासस्य समीक्षा) | २४ |
| 8 | फटिकलालदासेन कृतस्य रवीन्द्रकाव्ययोरनुवादस्य परिशीलनम् | २९ |
| 9 | *Vibhakti* Divergence Between Sanskrit and Bengali | ३४ |
| 10 | उत्फुल्लम् अन्तरङ्गम् (जनार्दनहेगडेकृतकथाग्रन्थस्य समीक्षा) | ४२ |
| 11 | वर्णः अक्षरं च | ४८ |

# सम्पर्कः[१]

(पराम्बायोगमायाकृतस्य कथासङ्ग्रहस्य समीक्षा)

सम्पर्कः इति कथाग्रन्थे सङ्गृहीताः कथाः तदा तदा पत्रिकासु प्रकाशिताः। कथाद्वयम् अन्यत्राप्रकाशितम् अपि अत्र सङ्गृहीतम्। कथासङ्ग्रहस्य नाम सम्पर्क इति। किम् अन्तिमकथायाः सम्पर्को नामहीन इत्यस्या नामानुसारेण कथासङ्ग्रहस्य नाम निश्चितं लेखिकया? अथवा सर्वासु कथासु नायिकाभिः सह अपरेषाम् अपरासां च ये सम्पर्काः तत्सम्बद्धाश्च मनस्तात्त्विकविशेषा दरीदृश्यन्ते ते एव कथासङ्ग्रहस्य नामकरणे बीजभूता इत्यत्र संशये।

सर्वा अपि कथाः नायिकाप्रधानाः। कासुचित् कथासु व्यक्त्या समाजेन वा नायिकाभिः सह कृतेनान्याय्येन वञ्चनेन उत अपरेण कारणेन प्राप्तं दुःखमेव सर्वासु कथासु मूलभूता। सुचेता, सुजाता, सौम्या इत्थं वञ्चिताः नायिकाः। अपरतः सुमित्रा स्वीयसंस्कारेणैव स्वयं क्लेशिता। सम्प्रति नगरेषु विविधकार्यालयेषु दारिद्र्यवशात् कार्यं कुर्वतीनां बह्वीनां ग्राम्ययुवतीनां बहुविधसमस्याः सहमानानां मध्ये सुमित्रा एका। पद्मा समाजेन वञ्चिता, व्यक्त्या पोषिता।

भाग्यबलमुत निष्ठाबलमिति कथाया नायिका सुमित्रा पत्येकनिष्ठा। सामान्यभारतीयनारीणां कोमलस्वभावानां चरित्रानुगुणा पापशङ्का बाधते ताम्। पतिव्रतया अपि तया पत्युर्विषये इत्थं चिन्तितं यत् पतिः कदाचिदपरस्यां सक्तः पुनस्तत्सकाशं नैवायास्यतीति। पुनर्यदा ज्ञातं तया यत् पतिः श्वश्र्वाः कृते दिल्लीनगर्याः दूरभाषम् अकरोत्, तदा पतिः स्वमातुः कृते दूरभाषमकरोत् मम कृते नैवाकरोदिति अभिमानेन तस्या हृदयं पूरितम्। एतदत्र परिलक्षणीयं यत् कश्चिदपि भावस्तस्या मनसि क्षणादूर्ध्वं न तिष्ठति। अतिस्नेहस्य पापशङ्कित्वमेव सुमित्रायाश्चिन्तनेभ्यः प्रतिफलति। पत्येकनिष्ठायाः प्रेमवत्याः सुशीलायाः प्रोषितभर्तृकायाः कस्याश्चिन्नार्याश्चरित्राङ्कने लेखिका सम्पूर्णतः समर्थेति नास्ति संशयलेशः।

यदा मनसि काचिद् दुर्भावना आगच्छति तदा अतिसामान्यो विषयः अपि असामान्यायते। तस्मादेव सूचनां दातुमागतस्याधिकारिणः कण्ठरवे, अन्यविधेष्वप्याचरणेषु असामान्यता अनुभूता सुचित्रया। एवमेव रात्रौ मादकासक्ता जनाः यथा तामेव पीडयितुं यानमारूढा इति भावना तामाक्रान्तवती। एतादृशभावनायाः सङ्गतानि कारणानि सन्त्येव। दारिद्र्यादिवशाद् उद्योगाय ग्रामान्नगरं गतानां युवतीनां कृते एतादृशाः क्लेशास्तदा तदा अनुभूयन्त इति नास्ति संशयलेशः। एतस्मात् सुचित्रायाः अवचेतने विद्यमाना शङ्कैव अधिकारिरूपेण मादकासक्तरूपेण च रूपमगृह्णात्। कथायां नायकस्य पदं न्यूनमेव। तं स्वीयदौर्बल्येन वशीकृत्य वञ्चयित्वा च सुचित्रा तत्सहायेन स्वां सुरक्षितां कर्तुम् अयतत। साफल्यमप्यवाप। किन्तु एतस्य परिणामेन सा तस्मिन्ननुरक्ता अभूत्। का गतिरस्यानुरागस्य। लेखिका स्वयमेव संशेते। "सुचित्रा ज्ञातुं नापारयद्यत् स हासः प्रतिश्रुतेरुत वञ्चनायाः।" किन्तु आरात्रि गृहे स्थितस्य कस्यचिद् उपकारकस्य नाम न प्रकटितं लेखिकया नायिकया वा। तस्मात् लेखिका अपि आत्मानम् अपराधिनीं मन्यते। किन्तु चतुरा लेखिका तं दोषं नायिकायां न्यस्यति। "किं मादृश्यो मूर्खा बालिका अपि स्युर्लोके याश्च स्वसहायतायै पुरुषस्योपकारं गृहीत्वा नामापि न जानन्ति?" वस्तुतः नायकस्य अनामिकत्वं कथायां काञ्चिदपरां मात्रां योजयति।

सुचेताया जीवने कष्टस्य मूलं किम्? शाश्वतस्य तस्याश्च परिजना एव तयोः सङ्गमं नेष्टवन्तः। तस्मात् कस्यचित्मद्यपस्य लम्पटस्य हस्ते पतिता सा। तस्याः कवितानां नामानि वीक्ष्य तस्याः पतिः तां वाराङ्गनां मन्यते। ये परिजनाः तस्याः शाश्वतस्य च विवाहे अनिच्छुका आसन् ते "तव सुखाय एव अस्माभिरिदम् उच्यते" इति तस्यै बोधितवन्तः स्युः। सम्प्रति ते अस्याः पक्षं नाश्रयन्तीति एतस्याः सुखादिविषये तेषां चिन्तनस्य विचारणाया गाम्भीर्यं स्पष्टं ज्ञायते। अन्ततस्तु तेषां परिजनानां गण्डयोश्चपेटां ददत् शाश्वत एव एनां पुनः स्वस्थजीवने प्रतिष्ठापयति।

नारीणां दुर्दशायां वास्तविकं पदं पुरुषाणां, पुरुषाधिकृतसमाजस्य उत नारीणाम्? प्रश्नोऽयं नाद्यतनः। सुजातायाः श्वश्रूः तादृशीनां नारीणां प्रातिनिध्यं वहति याः स्वीयलघुस्वार्थाय नारीणां शोषणं सर्वनाशं च कुर्वन्ति। स्वयं नेत्री सा स्ववधूं नेत्रीं द्रष्टुं नेच्छति। अपरस्याः पुत्र्यै कष्टं प्रददती सा स्वपुत्र्या अल्पाहारविषये बद्धादरा वर्तते। नेयं समस्या नारीणां पुरुषाणां वा। समस्येयं समाजस्य। सामाजिकानां सार्विकमूल्यबोधस्य अधोगतिरेव एतादृशीनां समस्यानां मूलम् इत्यवगन्तव्यम्।

पद्मायाः निम्नवर्गीयत्वमाश्रित्य यैः पद्मादित्ययोर्विवाहो निराकृतः, आदित्यस्य पद्मायाः वा सुखमतिरिच्य वर्गे मतिं सन्दधानैस्तैः तयोर्जीवनस्य एकाकित्वस्य दुःखस्य वा भागो न ऊढः। किमिदमात्मीयानाम् आत्मीयत्वम्? यद्वा भवतु, पद्मायाः दुःखेन भाराक्रान्तस्य हृदयस्य दुःखभार आदित्यस्य सहृदयत्वेन हारितो लेखिकया।

समाजे तादृशा बहवः सन्ति ये दुःखान्यनुभवितुमेव तिष्ठन्ति। सौम्या तादृशी। सा स्वभावतः सात्त्विकी प्रतिभाति। स्वपित्रा, रमाकान्तेन च वञ्चितायाः सौम्यायाः हृदयात् प्रीत्यादिसात्त्विकभावा न नष्टाः। तस्मादेव सा पुनः सोमेशे प्रीतिमापन्ना। प्रश्नोऽयं पीडयति यत्, कथं तस्याः साहसमभूत्पुनः सोमेशे मतिं विधातुम् इति। सोमेश-रमाकान्तयोर्मध्ये को भेदस्तया निर्णीतः, कथञ्च निर्णीत इति स्पष्टं न ज्ञायते। अतः पुनरपि वञ्चिता सौम्या। पूर्वं रमाकान्तेन वञ्चनायाः दायित्वं कदाचित् सा स्वपितुरुपरि न्यसेदपि, किन्तु सोमेशेन वञ्चनायाः भारं कस्योपरि न्यसिष्यति? तस्मात् तस्याः नियतिरेव तस्या जीवने प्रबलेति प्रतिपादितं लेखिकया। अन्ते च सर्वशक्तस्य समाजस्य द्वारमपि यस्यै रुद्धं तस्याः अन्तिम आश्रयः मातृत्वमेवेति स्पष्टमुद्घोषितमत्र।

---

[१]सम्पर्कः (१० कथानां सङ्ग्रहः), कथाकारः- पराम्बा श्रीयोगमाया, प्रथमसंस्करणम्-जनवरी, २०११, मूल्यम्- ₹ २५/-, पृष्ठाः-6+42(1/8डेम्मी)।

पापपुण्ययोर्मीमांसा न सरला। तदेव किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः इति गीतावाक्यम्। पापपुण्ययोर्मीमांसा सम्यक् कृता रचयित्र्या।

व्यक्तिमानसस्य विचित्राणां भावानां सयुक्तिकत्वं दुर्लभम्। मनुष्यमनोभावाः सर्वासां युक्तीनां पारे वर्तन्ते। रमाकान्तस्य सारिकां प्रति मनोभावस्यापि युक्तिर्नास्ति। तस्यां तस्य प्रेम्णोऽभावो न विद्यते। तथापि कदाचित् सारिकायाः पित्रा उक्तस्यैकस्य वचनस्य प्रतिशोधस्य आखेटभूता सारिका। एतच्च सत्यं सारिकया न ज्ञायते, न वा ऊहितुं शक्यते। रमाकान्तस्य तद्विषये अवहेलनस्य किञ्चिदपि कारणं न ज्ञायते तया। एतेन सा मानसिकरूपेण अस्वस्था अभूत्। सारिकायाम् अवहेलनं नटता सारिकायां स्वीयप्रेम विस्मृतवता रमाकान्तेनाऽपि सारिकायां स्वीयप्रेम्णः गभीरता तद्विरहेण ज्ञाता। किन्तु सारिकाया ईदृश्या अवस्थाया दायित्वं कस्य? रमाकान्तस्य उत सारिकायाः पितुः? उत तयोरहङ्कारस्य उत तयोः मनसि बहुयुगात् प्रथितस्य सामाजिकसंस्कारस्य?

यथा समाजे सौभाग्यवत्यः सुखिन्यः नीताः सन्ति, तथैव पापपङ्किलसमाजस्य पापे विलीनाः लीनाः अपि सन्ति। स्वपापेन ताः लीनाः पापिनीः कृतवान् समाजः तासां सन्ततीरपि पापात् न मोचयितुमीहते। स्वार्थं समीहमानः समाजः ताः सन्ततीरपि पापे निक्षिपति। तस्मादेव लीनाः नीतानां जीवनेषु प्रविश्य तासां सुखं नाशयन्त्यः स्वसन्ततीनां रक्षायै यतन्ते। एतादृश्यां स्थितौ वस्तुस्थितिं ज्ञातुं यथा प्रयतनीयं नीतादयः तथा नाचर्य पतिं सन्देहबाणेन विध्यन्त्यः परिस्थितिं घोरतरां कुर्वन्ति। यदि प्रथमदिने एव स्पष्टं नीतया सर्वो विषयः पत्ये निवेदितं स्यात् तदा तस्याः सौख्यपूर्णे परिवारे विवाहविच्छेदस्य कथा नायात्। भवेशेनापि वस्तुस्थितिं ज्ञातुं प्रयत्नो न कृतः। उभाभ्यामपि परस्परं प्रति अनर्थकसन्देहेन विपरीतव्यवहारेण च परिस्थितिरवनतिमेव नीता। दम्पत्योः परस्परं प्रति श्रद्धाविश्वासावेव सुखमयपरिवारस्य मूलमिति प्राचीनानां कथनं पुनरेकवारं प्रतिपादितं लेखिकया। कथाया रचनाशैली मनोरमा। कथावस्तुन्यपि वैचित्र्यं दरीदृश्यते।

महानगरीयजीवनशैल्यां निगमनिकायीयसंस्कृतौ (कर्पोरेट्-काल्चार्) अभ्यस्तानाम् आजीवनं वृत्तिप्राप्तये एव नीतिशिक्षारहितशिक्षाम् अधीयानानां युवकानां नारीणां विषये दृष्टिरेव मीरा-विबुधयोः सम्पर्कस्य नाम यल्लेखिकया ज्ञातुं न पारितम्। अद्यत्वे अमीमांसितः कश्चन प्रश्नः अस्माकं पुरतस्तिष्ठति, जीवनाय आजीविका उत आजीविकायै जीवनम् इति। आजीविकायां सर्वदापि हानिलाभयोर्विचारणे निमग्नो मनुष्यः मानवीयविषयेष्वपि लाभं हानिञ्चापि विमृशति। विबुधस्य चरित्रे एतदेव स्फुटं दृश्यते। मीरया सह भाषणकाले तेन मीरा पत्नीत्वेन अङ्गीकर्तुं न शक्येति निश्चितवान्। आपातदृष्ट्या तस्य भाषणं तदा मनोहारकं भासते। अध्यात्मादिविषयेष्वपि तस्य प्रवचनम् अस्मान् मोहयति। किन्तु तस्य वास्तविकं स्वरूपं तदा प्रकटितं भवति स्वग्रामात् प्रतिनिवर्तमानो विबुधः तां भुवनेश्वरे द्रष्टुमिच्छति। यां पत्नीत्वेन स्वीकर्तुमेष नेच्छति तया सह परिणामहीनस्य सम्बन्धस्य अग्रेसारणं कर्तुमिच्छतस्तस्य जीवने संयमो नाम वस्तु किमप्यस्ति वेति अङ्कुरितः सन्देहः निश्चयत्वेन परिणमते तदा यदा मीरया विबुधेन अन्याभ्यः प्रेषिताः वार्ताः पठिताः। विबुधः अध्यात्मादिविषये यद्यत्कथितवान् तत्सर्वमपि तस्य नटनमेवेति स्पष्टं जायते। प्रदेशान्तरवर्तिनीं मीरां परिणेतुम् अशक्तो विबुधः विवाहं न करिष्यामीति संयमेन वक्तुं न प्रभवति। यथा लेखिकाया एव अपरो नायक आदित्य आचरितवान् तथा कृत्वा स्वप्रेम्णः दार्ढ्यप्रतिपादनं कर्तुं नायं समर्थः। गृहजनानामिच्छया विवाहं करिष्यामि किन्तु त्वया सुसम्पर्कं स्थापयामीति तस्य वचनम्। किमयं सम्पर्कः केवलं मीरया सहैव अस्ति उत अन्याभिरपि अस्ति इत्यपि सन्दिग्धमेव। किमर्थमीदृशं सम्पर्कं स्थापयिष्यतीति वक्तुं स न समर्थः। स्वसुखाय अन्याः वञ्चयितुं तस्य लज्जा नास्तीत्येतावदेव न, एतल्लज्जास्पदं विषयं स्वमुखात् कथयितुमपि तस्य लज्जा न भवति। तन्नाम अपराधं कृत्वा तस्यापराधस्य गौरवेण गौरवान्वितं मन्यते विबुधः। इयमेव अद्यतनी महती समस्या। मीरादयः अपि एतत्सर्वं ज्ञात्वा दृढचित्तेन विबुधानां निराकृतिर्न क्रियते इत्यपि विस्मयकारकमेव। यस्यै अनामिकायै विबुधः गीतं प्रेषितवान् तादृश्यः अपि एतत्सर्वं ज्ञात्वा विबुधादीन् एतादृशे आचरणे प्रोत्साहयन्त्येव। समस्या तु लेखिकया सम्यक् प्रतिपादिता। समाधानं पाठकाश्चिन्तयन्त्विति तस्या आग्रहः।

भाग्यबलमुत निष्ठाबलम्, धूमाभाजीविका इति कथयोः वस्तुनः अपेक्षया चरित्राणां भावनानां विचारणं कृतवत्या लेखिकया स्पष्टत एव भाववादस्य (sentimentalism) आश्रयः कृतः। प्रतीक्षा, संशयः, प्रणयोपकथा इति कथासु लेखिकायां रोमाण्टिक्-वादस्य (romanticism) छाया दृश्यते। सर्वा अपि कथाः नारीवादेन प्रभाविताः। किन्तु यथा नारीवादिनां बहूनां लेखेषु सर्वे पुरुषा दुष्टा भवन्तीति काचिद् अवधारणा दृश्यते न तथात्र लेखिकाया भावना। आदित्यसदृशाः नायकाः तथा च प्रतीक्षेति कथायां सुचित्राया रक्षकस्य अनामिकस्य नायकस्य सदृशा अपि नायका अत्र सुलभाः। कासुचित् कथासु समाजस्य दुःस्थितीः स्पष्टशब्दैः वर्णयन्त्यां लेखिकायां रोमाण्टिक्-विरोधवादस्य (anti romanticism) छायापि दृश्यते एव।

समग्रतया ग्रन्थे लेखिकया समाजस्य समस्यानां विचारः कृतः। काश्चन समस्याः बहोः कालात्समाजे प्रथिताः क्रमशः विलयं गच्छन्त्यः यथा जातिविचारः, पुरुषैः भार्याणां शारीरिकनिपीडनम् इत्यादयः समस्याः, काश्चन सम्प्रति समाजे उद्भवन्त्यः समस्याः यथा नामहीनः सम्पर्क इत्यत्र विचारिता समस्या। समस्या एव विचारिताः, समाधानस्य दायित्वं पाठकानां हस्ते न्यस्तम्।

अपरस्य दुःखं स्वीयं मन्यते लेखिका। आमुखे तदेव विस्पष्टतया तया उच्यते - "कदा संसारसम्बन्धेषु दुःखं दृष्ट्वा मयैताः कथाः लिखिताः सन्ति यासां लेखनानन्तरं मया मानसिकी शान्तिः प्राप्तास्ति। वस्तुतः सहृदयसमक्षं दुःखकथनेन तत्क्षयं याति तथा सुखकथनेन तद्विवर्धते इत्यत्र हेतुः स्यात्! एतदेव कथाकथने कारणम्" इति। इतरहृदयसंवेदनं लेखिकायाः सहृदयत्वमेव

प्रमाणयति। पुनश्च कथायां वर्णितेषु चरित्रेषु शुद्धानाम् अशुद्धानां वा कस्यचिदपि विषये असम्मानं नास्ति। अतः कथाग्रन्थः तेभ्यः सर्वेभ्य एव समर्पितः लेखिकया। वस्तुतस्तु परिणामराहित्ये एव लघुकथायाः साफल्यं वरीवर्ति। कथायाः समाप्तौ ततः किमिति जिज्ञासा तथा काचिद् अतृप्तिः पाठकस्य हृदये नूनं स्यात्। किन्त्वस्य कथासङ्ग्रहस्य द्वित्राः कथाः विहाय अन्याः एतादृश्या अतृप्तेर्जनने समर्था न वर्तते।

ग्रन्थस्य प्रच्छदं सुन्दरं वर्तते। प्रच्छदे विद्यमानाया नार्या मुखे नेत्रयोश्च विस्मय आशङ्का वा विद्योतते। तेन ग्रन्थस्य विषयः स्पष्टीभवति इव।

दोषविवेचनम् - ग्रन्थे दोषाः मुख्यतस्त्रिविधाः सन्ति। तत्र केचन मुद्राराक्षसाः। व्याकरणगता दोषाः केचित्। केचित् प्रयोगाश्च तथा सन्ति ये असंस्कृताः, प्रान्तीयभाषायाः प्रभावात् ते शब्दाः प्रयुक्ता इति प्रतिभाति।

आदिमाः यथा– उच्चधिकारी, तस्या समीपे (पञ्चमे पृष्ठे); अवतणस्थानं, अवशिष्टाशं, प्रक्ताल्य(षष्ठे पृष्ठे); ताच्छल्येन (सप्तमे पृष्ठे) एवमन्येऽपि केचन मुद्रणदोषा ग्रन्थे दृश्यन्ते। बहुत्र क्ष इति वर्णः क्त इति दृश्यते।

द्वितीयप्रकारका दोषाः सन्ति व्याकरणगताः। ते दोषा अपि विविधाः सन्ति। यथा बहूनां शब्दानां लिङ्गव्यत्यासो दृश्यते। नपुंसकलिङ्ग आयुष्-शब्दो बहुत्र पुंसि प्रयुक्तः। प्रथमपुटे एव एकस्माद् घटनायाः इति प्रयोगे लिङ्गवैषम्यं दृश्यते। एवं सन्देहास्पदा इत्यत्र आस्पदशब्दो नित्यं क्लीबे स्यात्। क्वचित् आत्मनेपद-परस्मैपदप्रयोगेषु व्यत्यासो दृश्यते। यथा धावन्ते, शुच्यते इति प्रयोगः। पुनः क्वचिद् कृदन्तप्रयोगा विपर्यस्ता दृश्यन्ते। यथा जीवनं सर्जयित्वा, छेदयन् इत्यत्र णिजन्तप्रयोगः निरर्थकः। सृष्ट्वा इत्येव साधुः। प्रापयितवान् (चतुर्विंशे पुटे) इति न भवति। प्रापितवानित्येव साधुः प्रयोगः। अपृष्टमान, पृष्टमान इत्यादयः प्रयोगाः अर्थं न जनयन्ति। तत्र सन्दर्भवशाद् अर्थबोधो भवति। द्वितीयपुटे उपाधानं स्वीयमुखस्योपर्याश्लिष्यमानाया मुद्रितनयनायास्तस्याश्चिन्ताः पश्चात् धावन्तेँ इति वाक्ये आश्लिष्यमानाया इत्यत्र कर्मणि प्रयोगः कुत इति अस्पष्टम्। एवमेव पञ्चमपुटे कार्यातिरेकम् अत्यावश्यकम् इति प्रयोगः साधुर्न प्रतिभाति। समासाः बहुत्र असमर्थाः, भ्रान्ताः, अस्पष्टाश्च सन्ति। यथा प्रतितन्त्रीम् (द्वितीयपुटे) इति अव्ययीभावे प्रतितन्त्रि इति रूपं स्यात्। अन्तिमकथायां कस्यचिन्मन्दिरोद्याने इति प्रयोगः न भवति। मन्दिरस्य कस्य इत्यनेन सापेक्षस्य उद्यानशब्देन सह समासः प्रतिषिद्धः। एवमेव द्वारोन्मोचयितुम् इत्यादयः तुमुन्नन्तैः सह कर्मवाचकस्य समासो बहुत्र वर्तते। एते समासा अपि न भवन्ति। कालकतिपयान् इति प्रयोगः अपि न सम्भवतीव भाति। यतो हि कतिपयशब्दः निर्दिष्टसङ्ख्याया वाचकः। कालः निर्दिष्टसंख्यया गणनं न सम्भवति। कालशब्देन सह कियत्-शब्दस्य प्रयोगो युज्यते। एवमेव तूष्ण्यभूत्(अष्टादशपुटे) इति प्रयोगो न भवेत्। तूष्णीम् इत्यस्य अव्ययत्वात् तूष्णीम् अभूद् इत्येव शुद्धः प्रयोगः। पुनश्च पत्रपठितपूर्वा इति समासो न साधुः। वस्तुतस्तु अत्र पूर्वशब्दो अनपेक्षितः। पठितपत्रा इत्येव प्रयोगः अभीष्टम् अर्थं बोधयितुम् अलम्। एवं पापपुण्यमीमांसेति कथायां छिन्नीकृतवती इति प्रयोगः अनभिधानाद् विचित्रः प्रतिभाति। छिन्नवतीत्येव प्रयोगः अर्थप्रत्यायने समर्थः। सन्धयोऽपि दुष्टाः सन्ति। यथा पुनः-शब्दस्य बहुत्र खरि परे विसर्गादेशो दृष्टः। पुनर्प्रस्तुता, पुनर्कदाचित् इत्यादयः। एकारेण सह यण्-सन्धौ बहुत्र दोषा दृश्यन्ते। परन्त्वेकदा, जीवनन्त्वेका, इत्यैकदा इत्यादयः प्रयोगा दिङ्मात्रमुदाह्रियन्ते। कारकदोषाः केचन परिलक्षिताः। यथा प्रणयिनं विवाहं कृतवती इति प्रयोगो न भवति। प्रणयिना इति तृतीया, प्रणयिनः इति षष्ठी वा अत्र प्रयोगार्हा। विदायमभियाचनं कृत्वा इत्यत्रापि कर्तृकर्मणोः कृति इति सूत्रेण विदायशब्दात् षष्ठ्येव स्यात्। तस्य नाम जिज्ञासां कृत्वा इत्यत्र तस्य नाम जिज्ञासित्वा उत तस्य नाम्नो जिज्ञासां कृत्वा इति प्रयोगः कर्तव्यः। पराभूताया जिजीविषा इति कथायाम् "अतः शीघ्रं प्रस्तुता सती खाद्यपेयादिकं परिवेषणायोक्तवान्" इति वाक्यं शुद्धं न भवति।

तृतीयप्रकारका दोषाः सन्ति भाषान्तरीयशब्दानाम् अनर्थकः प्रयोगः। ये शब्दाः संस्कृते प्रयोक्तुं शक्यन्ते ते शब्दाः संस्कृते एव प्रयुज्यन्ते चेत् साधु। यदि तदर्थबोधकः शब्दः संस्कृते न वर्तते तर्हि स शब्दः स्वीकर्तुं युज्यते। यथा अस्मदीये रवीन्द्रकथानुवादे थियोसोफिष्ट-शब्दः, तथा परी-शब्दः प्रयुक्तः, संस्कृते तादृशार्थबोधकशब्दस्याभावात्। किन्तु प्रकृतकथासङ्ग्रहे निशाग्रस्त-इति प्रयोगः परिहर्तुं शक्यते। निशाशब्दः भाषायां नशा इति शब्दस्यानुरोधेन प्रयुक्तः। तत्स्थाने मादकासक्त-इति प्रयोगः कर्तुं शक्यते। एवं निशा-शब्दः अन्यत्रापि प्रयुक्तः। ते परिहर्तुं शक्याः। एवमेव निभालनम् इति प्रयोगः हिन्द्यां निभालना इति शब्दानुरोधेन प्रयुक्तः। अयं प्रयोगो बहुभिः वहनमित्यस्मिन् अर्थे क्रियते। किन्तु निभालनमित्यस्य दर्शनार्थे प्रयोगः वाङ्मये प्रसिद्धः। तस्य स्थाने वह-धातोः प्रयोगः कर्तुं शक्यते। यथा दायित्वं निभालयति इत्यस्य स्थाने दायित्वं वहति इति प्रयोगः स्थाने। एवं "प्रति टिक् टिक् शब्दः" इत्यत्र प्रतिशब्दः एकम् इत्यस्मिन्नर्थे प्रयुक्तः। संस्कृते समासं विना तस्मिन्नर्थे प्रतिशब्दस्य प्रयोगो न दृश्यते। एवम् उपरान्त-शब्दो बहुधा प्रयुक्तः। अयं शब्दोऽपि संस्कृते न वर्तते। तत्स्थाने अनन्तरशब्दस्य प्रयोगः शक्यः। विवाहोपरान्ते इत्यस्य स्थाने विवाहानन्तरमिति प्रयोगो युज्यते। लोतकशब्दस्यापि अर्थः स्पष्टो न जायते।

☆ ☆ ☆

# स्वरवर्णानामुच्चारणे विहितानां दोषाणाम् ऋक्प्रातिशाख्यानुसारेण विवेचनम्

## १. भूमिका

विश्वसंस्कृतौ प्राचीनतमो वाङ्मयो वेदः। मानवसभ्यताया विकासं पूर्णतया ज्ञातुं वेदानां परिशीलनम् अत्यावश्यकमस्ति। भारतीयां संस्कृतिं ज्ञातुं, भाषाविज्ञानं पोषयितुं च वेदानाम् अध्ययनमद्याप्यावश्यकं मन्यते विपश्चिद्भिः।

प्राग् आर्याः गुरुमुखात् संहिताः श्रुत्वा कण्ठे कुर्वन्ति स्म। तदा जनानां कथनस्य भाषापि वैदिकी एवासीदिति मन्यते बहुभिः। क्रमेण लौकिकभाषाया विकासो यथा यथा सम्पन्नः तथा तथा वर्ण-स्वर-मात्रा-छन्दः-सन्ध्यादीनां ज्ञानाभावप्रयुक्तम् उच्चारणवैकल्यं वैदिकमन्त्राणामुच्चारणे सम्पन्नम्। तदा भाषाविज्ञानस्य एतेषां विषयाणां सुष्ठु अध्ययनमापतितम्। इमामेवापेक्षां पूरयितुं प्रातिशाख्यग्रन्था विकसिताः। शाखाया शाखायां प्रतिशाखं, प्रतिशाखं भवं प्रातिशाख्यमिति विग्रहेण ज्ञायते यत्, प्रातिशाख्यानि प्रतिशाखं भिद्यन्ते इति। तत्रापि प्राय ऋक्प्रातिशाख्यं, तैत्तिरीयप्रातिशाख्यं, वाजसनेयिप्रातिशाख्यम्, अथर्ववेदप्रातिशाख्यम्, ऋक्तन्त्रं च प्रसिद्धम्।

भाषाशास्त्रे प्रातिशाख्यग्रन्थानां वर्तते स्वकं महत्त्वम्। वैदिकभाषायाः स्वरूपं वेदानाञ्च रहस्यं प्रातिशाख्यग्रन्थानां साहाय्यं विना नैव ज्ञातुं शक्येत लोके। विविधानां भाषासम्बन्धिविषयाणां सुगम्भीरा चर्चा प्रातिशाख्येषु प्रवर्तन्ते। तत्र चर्चितेषु विषयेषु वर्णानाम् उच्चारणप्रक्रिया, सन्ध्यादिव्याकरणप्रक्रियाः, छन्द-आदीनां परिचयः, सामगानेषु प्रयुक्तानां विविधानां स्तोभादीनां वर्णनं च प्रामुख्यं भजते। शाखाभेदेन उच्चारणादिभेदा अपि प्रातिशाख्यग्रन्थस्य चर्चनीया विषयाः सन्ति। एतेषु सर्वेषु प्रातिशाख्यग्रन्थेषु प्राचीनतादृष्ट्या प्रामाणिकतादृष्ट्या विषयविस्तृतिदृष्ट्या वैज्ञानिकाध्ययनदृष्ट्या च ऋक्प्रातिशाख्यं शीर्षस्थानमलङ्कुरुते। ऋक्प्रातिशाख्यस्य उव्वटकृतं भाष्यं, विष्णुमित्रकृता वर्गद्वयवृत्तिश्च प्रसिद्धा।

वर्णानामुच्चारणस्य विविधा नियमाः सर्वेषु प्रातिशाख्येषु शिक्षाग्रन्थेषु च उक्ताः। किन्तु एवमुच्चारणस्य नियमेषूक्तेष्वपि सम्भवन्त्युच्चारणे विविधा दोषाः। एतादृशानां दोषाणां विवेचनं स्वल्पमेवोपलभ्यते। सर्वेषु प्रातिशाख्यग्रन्थेषु केवलम् ऋक्प्रातिशाख्यग्रन्थे एव उच्चारणदोषाणां विचारणा लभ्यते। ऋक्प्रातिशाख्यस्य चतुर्दशपटले उच्चारणदोषा विवेचिताः। तत्र दोषाणां विविधा विभागाः प्रदर्शितास्तथा तेषां स्वरूपाण्युक्तानि।

## २. वर्णदोषाः

वर्णानां दोषा बहुविधा भवन्ति। तत्रादौ वर्णोच्चारणे विहितानां दोषाणां सामान्यस्वरूपमुक्त्वा वर्णोच्चारणे क्रियमाणाः सामान्यदोषा विविच्यन्ते। तेषां विचारः अस्मिन् अंशे क्रियते।

### २.१. उच्चारणदोषाणां सामान्यस्वरूपम्

तत्रादौ वर्णदोषाणां सामान्यतः प्रविभागो निर्देशितः। सामान्यतो वर्णानाम् उच्चारणे त्रिविधा दोषाः सम्भवन्ति।[२] ते हि -

१. आयः - यदा उच्चारणे कस्यचिद् वर्णस्य अनुपस्थितस्य आगमः क्रियते[३] तदा आयो नाम दोषः सम्भवति। यथा ह्वयामीत्यत्र पुरस्तादनुनादः[४] इति। नाम ह्वयामि इति वक्तव्ये हकारात् प्राक् कश्चिद् अनुनादः श्रूयते कदाचित्। स आयो नाम दोषः।

२. अपायः - यदा उच्चारणकाले स्थितस्य वर्णस्य त्यागः क्रियते तदा अपायो नाम दोषः।[५] यथा ऊनयीरित्यत्र यीरित्येतस्य[६]।

३. व्यथनम् - व्यथनं नाम विद्यमानस्य वर्णस्य अन्यथोच्चारणम्। यथा रथ्य इति वक्तव्ये रस्य[७] इत्युच्चारणम्।

### २.२. वर्णानां सामान्यदोषाः

वर्णानाम् उच्चारणे क्रियमाणाः सामान्यदोषाः केचिद्वर्तन्ते। इमे दोषाः प्रायेण उच्चारणस्थानस्य प्रयत्नस्य च व्यत्यासवशात् सम्भवति। इमे दोषाः नवविधा भवन्ति। यथा -

१. निरस्तम् - निरस्तदोषस्य लक्षणमुच्यते निरस्तं स्थानकरणापकर्षे[८] इति। यदा वर्ण उच्चारणस्थानेन तथा प्रयत्नेन अपकृष्टो भवति तदा निरस्तमिति दोष उच्यते।

---

[२]ऋ.प्रा. १४/१
[३]उ.भा. ऋ.प्रा. १४/१
[४]idem
[५]idem
[६]idem
[७]idem
[८]ऋ.प्रा.१४/२

२. व्यासः - व्यासो नाम विस्तारः। यदा उच्चारणस्थानस्य प्रयत्नस्य वा अयुक्तो विस्तारो भवति तदा व्यासो नाम दोष उच्यते। तथाहि- विहारसंहारयोर्व्यासपीळने[९] इति।

३. पीळनम्- पीळ(ड)नम् इति दोषः व्यासस्य विपरीतो भवति। तन्नाम यदा उच्चारणस्थानस्य प्रयत्नस्य वा अयुक्तं सङ्कोचनं भवति तदा पीळ(ड)नम् इति दोषः सम्भवति।[१०]

४. अम्बूकृतम् - ओष्ठाभ्याममम्बूकृतमाह नद्धं दुष्टम्[११] इति वचनानुसारं यदा ओष्ठौ बद्धा वक्ता कमपि वर्णमुच्चारयति तदा अम्बूकृतमिति दोषो भवति।

५. शूनम् - यदा मुखं विलायितं कृत्वा वक्ता वर्णमुच्चारयति तदा शूनमिति दोषो भवति। तदुच्यते मुखेन सुषिरेण शूनम्[१२] इति।

६. सन्दष्टम् - यदा वक्ता हनूद्वयं व्रीडयित्वा उच्चारयति तदा सन्दष्टमिति दोषः। व्रीडयित्वा इत्यस्य अधःकृत्वा इत्यर्थः। तथा च वचनं सन्दष्टं तु व्रीळन आह हन्वोः[१३] इति।

७. विक्लिष्टम् - हन्वोः प्रकर्षणे विक्लिष्टं नाम दोषः सम्भवति। प्रकर्षणञ्च दूरापकर्षणम्। उव्वटमते प्रकर्षणं नाम सर्वतश्चलम्[१४]

८. ग्रस्तम् - उच्चारणकाले यदि जिह्वामूलस्य निग्रहो भवति तदा ग्रस्तमिति दोषो भवति। तथाहि जिह्वामूलनिग्रहे ग्रस्तमेतत्[१५] इति।

९. अनुनासिकम् - नासिकयोस्त्वनुषङ्गेनुनासिकम्[१६] इति वचनेन उच्चारणकाले नासिकायाः प्रभावो वर्तते चेद् अनुनासिको नाम दोषः सम्भवतीति वाच्यम्।

## ३. स्वरोच्चारणे दोषाः

वर्णानाम् उच्चारणे ये दोषाः सामान्यतया भवन्ति तेषु बहवः स्वराणाम् उच्चारणे परिलक्ष्यन्त इति कः सन्देहः। तदन्येऽपि केचिद्दोषाः स्वराणाम् उच्चारणे सम्भवन्ति। तत्र स्वराणाम् उच्चारणे सन्दंशः, व्यासः, पीळ(ड)नम्, निरासः, ग्रासः इति पूर्वोक्तेषु सामान्यदोषेषु पञ्च दोषाः स्वराणाम् उच्चारणे सम्भवन्तीति ऋक्प्रातिशाख्ये उच्यते। तथाहि सन्दंशो व्यासः पीळनं निरासः[१७] इति ग्रासः कण्ठ्ययोः[१८] इति च। अत्र स्पष्टमेवोच्यते यद् ग्रासो नाम दोषः स्वरेषु कण्ठ्यवर्णयोरेव भवतीति। अत्र च कण्ठ्यपदेन अकार-आकारयोर्ग्रहणम्। तथा च भाष्यम् कण्ठ्ययोः अकाराकारयोः[१९] इति। एतच्च स्पष्टम्। यतो हि ग्रासो नाम जिह्वामूलस्य निग्रहः[२०]। जिह्वामूलं कण्ठसन्निहितमिति कण्ठ्यवर्णानामुच्चारणे एव स दोषः प्रसज्येतेति स्पष्टमेव। अत एव व्यञ्जनेष्वपि कवर्गोच्चारणकाले एव अयं दोषः सम्भवति। तथाहि ग्रासो मुख्ये[२१] इति वचनम्। अत्र मुख्यशब्दः प्रथमवाची। तेन प्रथमवर्गोच्चारणे ग्रासो दोष इत्यर्थोऽस्य वाक्यस्य।

सम्प्रति विशेषस्वरदोषा निरूप्यन्ते। विशेषस्वरदोषेषु द्विधा विभागः कर्तुं शक्यते। केचन दोषाः स्वरसामान्योच्चारणे सम्भवन्ति, केचिच्च कस्यचिदेकस्य स्वरविशेषस्योच्चारणे सम्भवन्ति।

### ३.१. स्वरसामान्योच्चारणे दोषाः

स्वरसामान्यानाम् उच्चारणे मुख्यतः त्रिविधा दोषाः सम्भवन्ति। ते हि

**३.१.१. ह्रस्वस्वरस्य लोपः–** यदि कश्चन ह्रस्वस्वरः रेफात् परो वर्तते तथा तस्माद् ह्रस्वस्वरात् परः ऊष्मवर्ण उत अन्तःस्थावर्णो वर्तते तर्हि स ह्रस्वस्वर उच्चारणकाले लुप्यते। यथा हरियोजनम् इत्यत्र रेफात् परस्य इकारस्य यकारात्पूर्ववर्तिनः लोपं बहवः कुर्वन्ति। हर्योजनम् इत्युच्चारयन्ति। एवमेव पुरुषन्तिम् इति वक्तव्ये रेफात्परस्य उकारस्य षकारे परे लोपं कृत्वा पुर्षन्तिम्

---

[९] ऋ.प्रा. १४/३
[१०] idem
[११] ऋ.प्रा. १४/४
[१२] ऋ.प्रा. १४/५
[१३] ऋ.प्रा. १४/६
[१४] उ.भा. ऋ.प्रा. १४/७
[१५] ऋ.प्रा. १४/८
[१६] ऋ.प्रा. १४/९
[१७] ऋ.प्रा. १४/११
[१८] १४/१२
[१९] उ.भा.ऋ.प्रा. १४/१२
[२०] supra
[२१] ऋ.प्रा. १४/२२

इत्युच्चारयन्ति। अयं दोषो वर्जनीयः। तथाहि

ऊष्मान्तस्थाप्रत्ययं रेफपूर्वं
हृस्वं लुम्पन्त्याहुरथाप्यसन्तम्।
पुरुषन्ति पुरुवारार्यमाष्ट्र्यां
हरियोजनाय हरियूपीयायाम्॥[२२] इति।

**३.१.२. अविद्यमानस्य हृस्वस्वरस्योच्चारणम्**– यदि रेफात् परम् ऊष्मवर्ण उत अन्तःस्थावर्णो भवेत्तर्हि प्राय उच्चारणकाले कश्चित् हृस्वस्वर उच्चार्यते बहुभिः। यथा अर्यमा इति वक्तव्ये अरयमा इत्युच्चारणम्, आष्ट्र्याम् इति वक्तव्ये आष्ट्रयाम् इति उच्चारणं वा।[२३] अयं दोषोऽपि परिहार्य एव।

**३.१.३. अनुनासिकहृस्ववर्णस्य दीर्घत्वम्**– कदाचिद् अनुनासिकस्य हृस्ववर्णस्य दीर्घत्वं क्रियते। अयं कश्चिद्दोषः। अनुनासिकयुक्तः स्वरः प्रातिशाख्ये रक्त इति पदेन व्यवह्रियते। तथा च प्रातिशाख्यवचनम् रक्तं हृस्वं द्राघयन्त्युग्रँ ओकः[२४]। अनुनासिको हृस्वो वर्णः दीर्घायते उच्चारणकाले। यथा उग्रँ इति अनुनासिकः अकार उच्चारणकाले दीर्घत्वेन उच्चार्यते कैश्चित्। अयं दोषः परिहर्तव्यः।

**३.१.४. अननुनासिकस्वराणाम् आनुनासिक्यापादानम्**– अनुनासिकव्यञ्जनैः सहितः स्वरवर्णः अनुनासिकत्वेन उच्चार्यते बहुभिः। अयं दोषः यत्नतः परिहर्तव्यः। तथाहि

रक्तै रागः समवाये स्वराणां
न नूनं नृम्णं नृमणा नृभिर्नॄन्॥[२५]

## ३.२. स्वरविशेषोच्चारणे दोषाः

केचिद्दोषाः केषाञ्चिद् विशेषाणां स्वराणाम् उच्चारणकाले एव सम्भवन्ति। यथा ऋकारस्य, इकारस्य वा उच्चारणे दोषाः सम्भवन्ति। ते दोषाः सम्प्रति विवेच्यन्ते।

**३.२.१. इकारस्योच्चारणे दोषः**– इकारस्य उच्चारणकाले द्वौ दोषौ प्रसज्येयाताम्। इकारस्य ऋकारोच्चारणम् अथवा ऌकारोच्चारणं वा। तथाहि कदाचिद् इकारस्य उच्चारणे कर्तव्ये ऋकार ऌकारो वा उच्चार्यते। यथा चन्द्रनिर्णिक् इत्यत्र इकारस्य स्थाने ऋकारः तथा च सुशिल्पे इत्यत्र इकारस्य स्थाने ऌकार उच्चार्यते। तथा च

इकारस्य स्थान ऋकारमाहुर्
ऌकारं वा चन्द्रनिर्णिक्-सुशिल्पे॥[२६]

**३.२.२. ऋकारोच्चारणे दोषः**– प्रायः ऋकारस्य ॠकारस्य वा उच्चारणे रेफसहितस्य ओष्ठ्यस्य उकारस्य सदृशं कुर्वन्ति। यथा मातृः इत्यत्र मात्रूः इत्युच्चारयन्ति। तथाहि

स्वरौ कुर्वन्त्योष्ठ्यनिभौ सरेफौ
तिस्रो मातॄस्त्रीन् पितॄन्यन्नृभिर्नॄन्।[२७]

**३.२.३. ऐकारस्य दोषः**– ऐकारस्य बहुविधा दोषा भवन्ति। यथा-

१. ऐकारात् परं यकारोऽस्ति चेत् यकारस्य द्वित्वं कृत्वा ऐकारस्य अकारमुच्चारयन्ति। वैयश्व इत्युच्चारयितव्ये वइअश्व इत्युच्चार्यते कैश्चित्। तथाहि

ऐयेरित्यैकारमकारमाहु
र्वैयश्वेति क्रमयन्तो यकारम्।[२८]

२. कदाचित् अकारात् परं यकारद्वयमस्ति चेद् अकारस्य ऐकारं कृत्वा एकस्य यकारस्य लोपं कुर्वन्ति। तद्यथा वय्यम् इति वक्तव्ये वैयम् इति वदन्ति केचित्। तथा च

तदेवान्येषु विपरीतमाहुस्
तं रय्या वय्यं च हृदय्ययेति च॥[२९]

३. कदाचिद् अकार-ईकारयोर्मध्ये यकारोऽस्ति चेत् कदाचित् अकारस्य ऐकारम् उच्चार्य ईकारसहितं यकारं लुम्पन्ति केचित्। यथा उनयीरित्यत्र ऊनैरित्युच्चारयेयुः। तथा च

---

[२२] ऋ.प्रा.१४/४०
[२३] supra
[२४] ऋ.प्रा. १४/५१
[२५] ऋ.प्रा.१४/५६
[२६] ऋ.प्रा.१४/४५
[२७] ऋ.प्रा.१४/३८
[२८] ऋ.प्रा.१४/४१
[२९] ऋ.प्रा.१४/४२

अकारस्य स्थान ऐकारमाहु
लुम्पन्ति च सयमीकारमुत्तरम्।
बह्वक्षरं ह्यक्षरतां नयन्ति
यथोनयीर्ध्वनयीत्कोशयीरिति॥ [30]

४. एवमेव कदाचिद् यत्र ऐकार उच्चारणीयस्तत्र ऐकारस्य स्थाने अयीरित्युच्चारयेयुः। अजैष्म इति वक्तव्ये अजयीष्मेत्युच्चारणं क्रियते चेत् तदसाधु। तथाहि

तदेव चान्यत्र विपर्ययेण
कार्यं ऐत्वे सयमीकारमाहुः।
धातोर्बिभेतेर्जयतेर्नियश्चा-
भैष्म चाजैष्म नैष्टेति चैषु॥ [31]

## ४. उपसंहारः

एवं स्वरवर्णानामुच्चारणे केचन दोषा अत्र समीक्षिताः। वस्तुतः मन्त्राणाम् उच्चारणे दोषसत्त्वे महदनर्थं जनयन्ति ते इति मन्त्रो हीनः इत्यादिषु अतिप्रसिद्धासु कारिकासु बहुधा प्रतिपादितमेव। संस्कृतभाषायाः सम्यगुच्चारणाभावे कदाचिद् अर्थस्यानर्थो भवेदित्यत्र का संशीतिः। तस्माद् उच्चारणे सावधानैर्भाव्यम्। तत्रापि के दोषाः सम्भवेयुरिति ज्ञात्वा यत्नतस्ते दोषाः परिहर्तुं शक्यत इति धियैव उच्चारणदोषाः प्रातिशाख्यादिग्रन्थेषु परिशीलिताः। तत्र दिङ्मात्रमत्र विचारितम्।

☆ ☆ ☆

[30] ऋ.प्रा.१४/४३
[31] ऋ.प्रा.१४/४४

# वरेण्याः कथासर्जकाः
(विश्वस्य प्रख्यातानां कथाकाराणां लघु जीवनवृत्तम्)

**रवीन्द्रनाथठाकुरः–** भारतीयवाङ्मयाकाशे रवेरिव देदीप्यमानस्य रवीन्द्रनाथस्य देवेन्द्रनाथतनयस्याभिधा न वा कस्य श्रोत्रगोचराऽभूद्विपश्चिदपश्चिमस्य। कथा-कविता-निबन्धोपन्यास-समीक्षादिभिर्विविधैः विधैः श्रव्यविधायां स्वपाटवं प्रदर्शयन्नसौ साहितीनिर्माणे सङ्गीत-नाटक-रचन-गायन-नटनैर्दृश्यकाव्यविधायामप्यप्रतिमप्रतिभां प्राचीकटत्। यद्यपि कविगुरुरिति तस्य प्रसिद्धिस्तथापि नास्य कवेः कथानिबन्धोपन्यासादिसर्जने सामर्थ्योत्साहयोरस्ति नैयून्यम्। १९६२ क्रैस्ताब्दस्य मेमासस्याष्टमे दिने कोलकातानगरे जनिमलभतायम्। न कस्मिंश्चिदपि विद्यालये विश्वविद्यालये वा औपचारिकं शिक्षणमसावधिगतवान्। १९१३ क्रैस्ताब्दे गीताञ्जलिनामधेयस्य आङ्ग्लभाषोपनिबद्धस्य काव्यसङ्ग्रहस्य कृतेऽयं साहित्ये नोबेलप्रशस्तिं प्राप्तवान्। ततः परं तेन ब्रिटिशराजपक्षतः नाइट-उपाधिरपि प्राप्तः। किन्तु १९१९ क्रैस्ताब्दे जालियानवालोद्याने निरीहभारतीयानामुपरि ब्रिटिशराजपक्षस्य पाशविकात्याचारस्य प्रतिवादं कुर्वन्नयं नाइट-उपाधिं निराकृतवान्। भारतीयशिक्षायाः प्रकृतं स्वरूपं कथं भवेदिति प्रतिपादयितुं तेन शान्तिनिकेतनं नाम आश्रमः संस्थापितस्तथा तत्र गुरुकुलरीत्या पठनपाठने आरब्धे। स च आश्रमः सम्प्रति विश्वभारतीविश्वविद्यालयत्वेन विश्वजनानां श्रद्धास्थानं समभूत्। वाङ्मयभारत्याः सेवायां निरन्तरं निरतोऽयं महाकविः १९४० क्रैस्ताब्दे अशीतिवर्षवयःक्रमे मरकायं परित्यज्य गतः।

तस्य कथासु वस्तुनिष्ठा भावनिष्ठाश्च विविधाः कथाः सन्ति। कल्पनावैचित्र्येऽयमप्रतिद्वन्द्वी। विविधप्रकारकास्तस्य कथाः उपन्यासाश्च। समकालीनसामाजिकस्थितिः, व्यक्तिमनस्तत्त्वं, चिरन्तनमूल्यानि, मनुष्यस्य लघुलघु-व्यथा-दुःख-सुखादिकं तस्य कथासु सावलीलभङ्ग्या निरूपितमस्ति। देशकालादीनां सीमानमतिक्रम्य तस्य काव्यकृतिः सर्वकालेषु सहृदयहृदयेषु जनयत्यपूर्वमाह्लादम्। तस्योपन्यासेषु गोरा-चतुरङ्ग-घरेबाइरे-चोखेरबालि-प्रभृतीनां महती प्रसिद्धिः। विविधासु भाषासु तस्य कथा-कविता-नाटकादीनामनुवादो जातः।

**मुन्सीप्रेमचन्द–** वाराणस्याः समीपवर्तिनि लम्हिनामके ग्रामे १८८० क्रैस्ताब्दस्य जुलैमासस्य एकत्रिंशे दिने मुन्सी-अजीबलालमहोदयस्य पत्नी आनन्दीनामधेया धनपतरायनामधेयं यं सुतं प्रासूत आगामिनि काले स्वावदानेन भारतीयवाङ्मयार्णवं समेधितवान् स एव जगति मुन्सी-प्रेमचन्दनाम्ना ख्यातिमगात्।

ग्रामस्य मद्रासायां मौलविमहोदयाद् ऊर्दूशिक्षणेन तस्य शिक्षाया आरम्भो जातः। बाल्य एव पितरौ दिवंगतौ तस्य। चतुर्दशे वयसि स पार्श्वग्रामस्य काञ्चिद्बालां परिणीतवान्। किन्तु तयोर्दाम्पत्यं सुखदं नासीत्। १८९९ क्रैस्ताब्दे स स्वग्राममत्यजत्। ततः १९०९ क्रैस्ताब्दे शिवरानीदेवीनामिकां काञ्चिद्विधवां स ऊढवान्। स सर्वकारीयोद्योगे आसीत्। १९२१ क्रैस्ताब्दे असहयोगान्दोलनकाले गोरक्षपुरे गान्धिमहोदयस्याह्वानमङ्गीकृत्य सर्वकारीयमुद्योगं पर्यत्यजत्। आङ्ग्लेयशासनस्यावसानं प्रतिपादयन् स गोरक्षपुरात् प्रकाशितायां तेहकीक-पत्रिकायां तथा स्वदेश-पत्रिकायाञ्च स ऊर्दूभाषया निबन्धान् विलेखितुं प्रारभत। सर्वकारीयोद्योगत्यागाच्चतुर्मासेभ्यः परं स कर्णपुरस्थे मारवाडीविद्यालये ऊर्दूभाषायाः शिक्षकत्वेन कार्यमारब्धवान्। किन्तु विद्यालयस्याध्यक्षेण तथा प्रबन्धकेन सह तस्य विवादवशात्तत्रत्योद्योगं परित्यज्य स पुनर्वाराणसीं प्रत्यागत्य मर्यादानामिकायाः पत्रिकायाः सम्पादकस्य दायित्वं वोढुमागतः। ततः परं स काशीविद्यापीठस्याध्यक्षत्वेन कार्यमारब्धवान्। तस्य समाप्तेः परं स्वकीयमुद्रणालयं स्थापितवान्। किन्तु ततस्तेनार्थिको लाभो न प्राप्तः। ततः पुनः स माधुरीनामिकायाः पत्रिकायाः सम्पादकस्य कार्यं स्वीकृतवान्। लक्ष्णौनगरे १९३० हंसनामिकां साप्ताहिकपत्रिकामारब्धवान्। १९३२ क्रैस्ताब्दे हंसपत्रिकया सममेव जागरणनामिकामपरां पत्रिकामप्यारब्धवान्। किन्तु इमां पत्रिकां सञ्चालयितुमसमर्थः स बहूनि रूप्यकाणि धारितवान्। तत ऋणपरिशोधार्थमन्ततो गत्वा सः अजन्तासिनेटोन-नामिकायां चलच्चित्रनिर्माणसंस्थायां चित्रकथालेखकरूपेण मुम्बैनगरीं प्राप्तवान्। तत्र स मजदूर इति एकस्य चित्रस्य कथां विलिखितवान्। किन्तु मुम्बैचलच्चित्रजगतः संस्कृत्या खिन्नः स शीघ्रमेव ततः काशीं प्रत्यावृत्तः। १९३६ क्रैस्ताब्दस्य अक्टूबरमासस्य अष्टमे दिनाङ्के बहुकालस्यानारोग्यात्परं स दिवमगात्।

षट्पञ्चाशद्वर्षात्मके तस्य जीवने स चतुर्दश उपन्यासान्, प्रायस्त्रिशतं लघुकथाश्च लिखितवान्। तद्विहाय नाटकानि, निबन्धांश्च बहून् स प्रणिनाय। तस्य बहवः कृतय आङ्ग्लभाषायां रूष-भाषायां, बहुषु भारतीयभाषासु च अनूदिताः। तस्य गोदान इति उपन्यासो हिन्दीभाषया विरचितेषु श्रेष्ठोपन्यासेषु गण्यते। तस्य लघुकथा विश्वस्य श्रेष्ठकथासु गण्यन्ते। तस्य लेखेषु तस्य कालस्य भारतीयसमाजस्य, लोकायतजीवनस्य, वित्तवज्जनसमाजस्य निम्नवित्तजनसमाजस्य वास्तविकचित्रेण साकं वैदेशिकशासनस्य अत्याचारास्तथा दुराचाराः सम्यक् प्रस्फुटिताः सन्ति। तेन रचिताः कथाः चलच्चित्रक्षेत्रेऽपि बहुधा प्रशंसितो वर्तते। तेन उपन्यास-सम्राट् इत्युपाधिरप्यधिगतः।

**गोपालचतुर्वेदी–** उत्तरप्रदेशे लक्ष्णौनगरे लब्धजन्मा गोपालचतुर्वेदी सिन्धियास्कूल(ग्वालियर), हमिदिआकालेज(भोपाले) इलाहावादविश्वविद्यालये आङ्ग्लसाहित्ये एम् ए विधाय, १९५६-५७ वर्षं यावत् भारतसर्वकारस्य रेलमन्त्रणालये विविधप्राशासनिकपदेषु स्थितवान्।

कुछ तो है, धूप की तलाश इत्यादयः काव्यसङ्ग्रहाः, प्रसिद्धपत्रिकासु व्यङ्ग्य-लेखनं, द्वादश व्यङ्ग्यसंग्रहाः गोपालचतुर्वेदिनं प्रसिद्धयन्ति। प्रेमचन्द-सम्मानं, साहित्य-अकादमी-पुरस्कारः, व्यङ्ग्यश्री-सम्मानं, साहित्यभूषणं प्रभृतीनि सम्मानानि तेनाध्यगामि।

**सादत हसन मण्टो**– पञ्जावराज्यस्य लुधियानामण्डले समरालानाम्नि जनपदे अधिवक्तृणां परिवारे १९१२ क्रैस्ताब्दे मेमासस्य एकादशे दिने सादत-हसन-मण्टोवर्येण जन्म प्राप्तम्। अमृतसरनगर्यामेकस्मिन् महम्मदीयोच्चविद्यालये तस्याध्ययनं प्रारब्धम्। किन्तु अध्ययने तस्य रुचिर्नासीत्। म्याट्रिकुलेशनपरीक्षोत्तरणे द्विरसफलो जातः सः। किन्तु अनौपचारिकाध्ययने तस्य महती रुचिरासीत्। आङ्ग्लोपन्यासानामध्ययनं तस्येष्टं भवति स्म। एवमपि श्रूयते यत्कदाचित् तेन अमृतसररेलनिस्थाने स्थितात्कस्माच्चिदापणात्स एकं पुस्तकं चोरितवानपि। १९३१ क्रैस्ताब्दे, कथञ्चित् परीक्षामुत्तीर्य स हिन्दुसभामहाविद्यालयं प्राविशत्। १९३२ क्रैस्ताब्दे पितुर्मरणात्परं स कतिचन दिनानि स आर्थिकचिन्तायां मग्न आसीत्। एतस्मिन् काले विपश्चितः कवेराब्दुलबारि-अलिगमहोदयस्य प्रोत्साहनेन स रूष-फ्रेञ्चभाषयोः समृद्धसाहित्यं पठितुमारभत। कतिषुचिदेव मासेषु स विक्टरहुगोमहोदयस्य The Last Day of a condemned Man इत्यस्य फ्रेञ्च-उपन्यासस्य ऊर्दूभाषया अनुवादं प्रास्तौत्। स चानुवादः सारगुज़श्त-ए-आसीर इति नाम्ना प्रकाशितः। अस्कार-वाइल्डमहोदयस्य वेरा इत्यस्य अनुवादेन स साहित्यजगति प्रसिद्धिमाप्तवान्। क्रमशः आब्दुलबारिवर्यस्य प्रोत्साहेन स रूषी अफसाने इति नाम्ना प्रसिद्धानां रूषकथानामनुवादं प्रकाशितवान्। १९३४ क्रैस्ताब्दे आलिगढमुस्लिमविश्वविद्यालये स स्नातकपदवीं प्राप्तुं गतः। १९३६ क्रैस्ताब्दे स मुम्बैनगरीं प्राप्य मुसाव्विर इति काञ्चित् चलच्चित्रपत्रिकां सम्पादयितुमारभत। चलच्चित्रजगति कार्यं कुर्वतैव तेन १९३९ क्रैस्ताब्दे साफियानाम्नी कन्या परिणीता। १९४१ क्रैस्ताब्दे स सर्वभारतीयाकाशवाण्यां कार्यं स्वीकृतवान्। तत्राकाशवाण्यां प्रसारणाय स बहूनि श्रुतिनाटकान्यलिखत्। पुनः १९४२ क्रैस्ताब्दे स मुम्बैनगरीं प्रत्यागत्य चलच्चित्रेभ्यः कार्यं कर्तुमारब्धवान्। देशविभाजनात् परं १९४८ क्रैस्ताब्दे स पाकिस्तानं गतः। तत्र गत्वा स पत्रिकादिषु लेखितुं प्रारभत।

तस्मिन् समये परिवारप्रतिपालनाय स लिखित्वा धनोपार्जनमारभत। स पत्रिकाणां कार्यालयं प्राप्य लेखं विलिख्य पारिश्रमिकं स्वीकृत्यागच्छति स्म। परिश्रमेण तस्य शरीरं क्षीणं जातम्। तस्य कदभ्यासेषु कश्चिदासीत् सुरापानम्। आर्थिकदुर्गतिकारणात् न्यूनमूल्येनोपलभ्यमानया सुरया तस्य शरीरं व्याधिपीडितं जातम्। १९५५ क्रैस्ताब्दे स सिरोसिसरोगेण पीडितो जातः। तेनैव रोगेण द्विचत्वारिंशद्वर्षवयसि सोऽम्रियत। तस्य मरणात् पञ्चाशद्वर्षेभ्यः परं २००५ क्रैस्ताब्दे तस्य स्मृतौ पाकिस्तानदेशस्य पत्रालयीयमुद्रा प्रकाशिता।

तस्य प्रसिद्धकथासु टोबाटेकसिंह इति कथा अन्यतमा वर्तते।

**अरुणरञ्जनमिश्रः**– उत्कलेषु खोर्धाजनपदे भगवानपुरशासने(हलदिआ) १९५९ क्रैस्ताब्दे सेप्टेम्बरमासस्य पञ्चमे लब्धजन्मा डा. अरुणरञ्जनमिश्रः उत्कलभाषायां प्रसिद्धः कविः कथाकारः समीक्षकः गायकश्च अधुना शान्तिनिकेतने संस्कृतविभागे उपाचार्यपदे विराजते। अष्टानां काव्यसङ्ग्रहाणां, द्वयोः कथासङ्ग्रहयोः, त्रयाणाम् अनुवादसङ्ग्रहाणामन्येषाञ्च बहूनां ग्रन्थानां स्वामी अयं संस्कृतकवितायां कथासु चापि सिद्धहस्तः। अस्य प्रसिद्धग्रन्थाः- अवश उपत्यका, जन्मान्धर स्वप्न, इन्द्रद्युम्नर गाँ, मडर्न राइटिंगस आफ ओडिशा। इयं कथा तस्य जन्मान्धस्य स्वप्नः (२००७) संग्रहाद् गृहीता।

**रस्किन् बण्डः**– अस्वतन्त्रभारतवर्षे कसौलिनामके स्थाने ब्रिटिशवायुसेनाया अधिकारिणः अब्रे-बण्डस्य एडिथ-क्लार्कवर्यायाश्च पुत्रः रस्किन्-वर्यः १९३४ क्रैस्ताब्दे मेमासस्य नवदशे जनिं प्राप। जामनगरे, देहरादूने, सिमलायां च तस्य बाल्यं यापितम्। बाल्ये एव मातापित्रोर्विवाहविच्छेदात् तस्य दशमे वयसि पितुर्मरणाच्च स एकाकित्वमयं बाल्यमतिवाहितवान्। तस्य शिक्षणं सिमलानगरे बिशप-कटन-विद्यालये आसीत्। तत्रैव १९५२ क्रैस्ताब्दे स स्नातकपदवीं प्राप्तवान्। अध्ययनं तस्य प्रियं कार्यमासीत्। शिक्षणं समाप्य स लण्डननगरीं गतः। तत्र तेन विचित्राणि कार्याणि जीविकार्थं कृतानि। चत्वारि वर्षाणि तत्र यापयित्वा भारतप्रीत्या पुनर्भारतदेशमेव प्रत्यागतः। देहरादूने तस्य वास आरब्धः। पत्रिकादिषु विलिख्यैव तेनाजीविका सम्पाद्यमाना वर्तते। १९६४ क्रैस्ताब्दे स मुसौरिसमीपे लण्डूरिनामके स्थाने गृहं निर्माय एतावत्पर्यन्तं तत्रैव निवसति।

बण्डवर्यः सप्तदशे वयसि तस्य प्रथमां कथां लिखितवान्। सा कथा १९५७ वर्षे John Llewellyn Rhys पुरस्कारेण सभाजिता। ततः परं तेन बहवः कथाः उपन्यासाश्च लिखिताः।

तस्य पञ्च उपन्यासाः, सप्तत्यधिकाः कथाः, प्रबन्धाः, यात्राप्रबन्धाः, गीतानि, पद्यानि च सन्ति। बालसाहित्ये तस्य महद्योगदानं वर्तते। १९९२ क्रैस्ताब्दे स साहित्य-अकादमीपुरस्कारेण सभाजितस्तथा १९९९ क्रैस्ताब्दे पद्मश्री-उपाधिना भूषितः।

**जि श्रीनिवास रावः**– आन्ध्रप्रदेशस्य हनम् कोण्डा स्थाने १९२८ क्रैस्ताब्दे जनिं प्राप्य आङ्ग्ललेखने प्रसिद्धिं प्राप्तवान्। सामाजिक-मानसिक-समस्याश्च अस्य कथाः विशदयन्ति। Pen Pal इति कथा प्रथमतः दा लास एनजेलेस् टाइमस् पत्रिकायां १० मार्च १९८० क्रैस्ताब्दे प्रकाशिता, द्वितीयतः दा रिडर्स डाइजेष्ट १९८२ मे अङ्के प्रकाशिता।

**रियुनोसुके अकुतगवा**– जपानदेशे टोकियोमण्डले क्योबशिजनपदे १८९२ क्रैस्ताब्दस्य मार्चमासस्य प्रथमदिने जातः रियुनोसुकेवर्यः। पिता तोशिज़ो नीहारा माता च फुकु नीहारा। रियुनोसुके इति नाम्नः अर्थस्तावत्, ड्रागनस्य(ड्रागन इति काल्पनिको जन्तुः) पुत्रः। तस्य जन्म ड्रागनस्य वर्षे, ड्रागनस्य मासे, ड्रागनस्य दिने, ड्रागनस्य होरायां जातमासीदिति तस्य तादृशं नाम कृतमासीत्। तस्य जन्मनः परं तस्य मातुरस्वास्थ्यवशात् स तस्य मातुलेन दत्तकरूपेण गृहीतः। मातुलगृहादेव तस्य अकुतगवेति उपनाम प्राप्तम्। १९१० क्रैस्ताब्दे स विद्यालयं प्रविष्टः। तस्य विद्यालयस्य सतीर्था बहवः अग्रिमे काले प्रख्याताः

साहित्यिका अभूवन्। १९१३ क्रैस्ताब्देऽसौ टोकियो-इम्पिरियल-विश्वविद्यालये आङ्ग्लसाहित्यमध्येतुं प्रविष्टः। तत्रैव तस्य साहितीसर्जने पटिमा प्राथम्येन दृग्गोचरोऽभूत्। छात्रदशायामेव स बाल्यसखीं यायोइ-योशिदानामधेयां परिणेतुमिष्टवान्। किन्तु तस्य परिवारे तयोः प्रेम न स्वीकृतम्। ततः १९१८ क्रैस्ताब्दे फुमि-सुकामोटोनामिकां कन्यां परिणीतवान्। तयोः पुत्रत्रयमासीत्। स्नातकपदवीं प्राप्य कतिचन दिनानि स नौसेनाया आभियान्त्रिकविद्यालये आङ्ग्लाध्यापकस्योद्योगं कृतवान्। केभ्यश्चिद्दिनेभ्यः परं स कार्यान्तरं सर्वमपि विहाय साहितीनिर्माणे एव पूर्णतया निरतो जातः। छात्रदशायामेव स लेखनं प्रारब्धवानासीत्। तस्य प्रथमकथा आसीत् राशोमोन् इति। तां कथां विलिख्य स प्रख्यातलेखकस्य नटसुमे-सोसेकिवर्यस्य दृक्पथमायातः। तेन प्रोत्साहितः सन् स तस्य साप्ताहिकसाहित्यसम्मेलनं प्रत्यपि गन्तुमारब्धवान्। एतस्मिन्नेव काले स हाइकुपद्यान्यपि लेखितुं प्रारभत। १९२१ क्रैस्ताब्दे स ओसाका मैनिचि शिन्बुन् इति पत्रिकायाः पत्रकाररूपेण चीनदेशमगमत्। तत्र चतुर्मासान् स्थित्वा प्रबलानारोग्यकारणात् स पुनर्देशं प्रत्यागतः।

चीनदेशात् प्रत्यागमनात्परमेव १९२२ क्रैस्ताब्दे तस्य विख्यातकथा याबु नो नक (एकस्मिन् कुञ्जे) इति प्रकाशपथमायाता। लघुजीवनस्यान्तिमभागे स मानसिकरोगेण पीडितो जातः। अवास्तवानि वस्तूनि स प्रत्यक्षीकर्तुं प्रारभत, तथा उन्मत्तो भविष्यामि इति भीत्या पीडितः सञ्जातः। १९२७ क्रैस्ताब्दे स सकृदात्महत्यायै प्रायतत। किन्तु व्यर्थः सन्नन्ते तस्मिन्नेव वर्षे पञ्चत्रिंशे वयसि स आत्महत्यामेव कृतवान्।

तस्य लेखेषु प्रकृतिवादस्य विरोध आसीत्। प्रायः १९१४ क्रैस्ताब्दादारभ्य १९२७ पर्यन्तं त्रयोविंशतिवर्षेषु स प्रायेण सार्धशतं लघुकथा व्यलिखत्। उपन्यासापेक्षया लघुकथायामेव तस्य रुचिर्दृश्यते। जपानदेशस्यैतिहासिकवृत्तान्याश्रित्य नवीनकल्पनया स ऐतिहासिककथा बह्वीर्लिखितवान्। तस्य विशिष्टकथासु हन (नासा), जिगोकु हेन् (नरकजवनिका), बुटोकल् (कन्दुकम्) इत्यादीनां नामानि दिङ्मात्रम्। तस्यान्तिमजीवनस्य लेखा बहुलतया तस्यात्मकथैव। एतेषु लेखेषु दाइदोजि शिन्सुके नो हंसेल् (दाइदोजिशिन्सुके-महोदयस्यारम्भिकजीवनम्), टेङ्किबो (मरणपञ्जीकरणपत्रिका) इत्यादयः प्रसिद्धाः। तस्य कथानां वैशिष्ट्यमिदमासीद्यत् स पाठकं पूर्वाग्रहान्वितमकृत्वा कस्मिंश्चिद्रहस्ये पातयति यस्य रहस्यस्य समाधानं पाठकेन स्वयं कर्तव्यं भवति। तस्य एकस्मिन् कुञ्जे इति कथामाश्रित्य चलच्चित्रं निर्मितमासीत्। १९३५ क्रैस्ताब्दे तस्य मरणात् परं तस्य मित्रं कन्-किकुचिवर्यः तस्य सम्माने नवोदितसाहित्यकाराणां कृते तन्नाम्ना अकुतगवापुरस्कारस्य प्रतिष्ठां कृतवान्।

**अलिव श्रेइनर–** अलिव-एमिलि-एल्बर्टिना-श्रेइनर दक्षिण-आफ्रिकादेशस्य ईस्टर्न-केपस्थाने वेस्लेयान-मिशनारी-सोसाइटि-संस्थाया एकस्मिन् शाखाकेन्द्रे याजकत्वेन सेवमानस्य गटलब-श्रेइनरवर्यस्य रेबेका-लिण्डलवर्यायाश्च जातेषु द्वादशसन्ततिषु नवमी सन्ततिः। तस्यास्त्रयाणामुपरतानामग्रजानाम् अलिवार-एलबार्ट-एमिल-नामधेयानां स्मृतौ तस्या नाम कृतमासीत्पितृभ्याम्। १८५५ क्रैस्ताब्दे तस्या जन्म। पितुर्दारिद्र्यवशात् सा द्वादशे वयसि तस्या अग्रजस्य थियोफिलसमहोदयस्य सकाशं गता। थियोफिलसमहोदयः कस्मिंश्चिद् विद्यालये अध्यक्षपदव्यासीन आसीत्। तत्रैव तस्याः विद्यालयीयशिक्षणं प्रारब्धम्। तस्याः परिवारः साम्प्रदायिकानामासीत्। किन्तु तस्याः भ्रातरो भगिन्य इव सा सम्प्रदायविषये बद्धश्रद्धा नासीत्। हर्बर्ट-स्पेन्सरमहोदयस्य First Principles ग्रन्थं पठित्वा तस्य विचारैः प्रभाविताऽभूत् सा।

जीविकारूपेण सा गृहभृत्यायाः कार्यं स्वीकृतवती। किन्तु बहुत्र गृहकर्तॄणां कामुकप्रवृत्तेरत्याचारेण पीडिता सा बहुत्र कार्याणि परित्यज्य परिवारेण सह स्थातुं गृहं प्रत्यागमत्। गृहे अध्ययनमेव तस्या मुख्यं कार्यमासीत्। किन्तु केभ्यश्चिद्दिनेभ्यः परं पुनस्तया धनार्जनार्थं कार्यं स्वीकर्तव्यमभवत्। कार्याय तया बहुषु नगरेषु परिभ्रमणं कृतम्। अस्मिन् काले प्राप्तैरनुभवैरेव सा The Story of An African Farm तथा Dream Life and Real Life इति ग्रन्थद्वयं परिपुष्टं वर्तते। यद्यपि एतन्मध्ये सा व्याजनाम्ना ग्रन्थलेखनं प्रारब्धवती तथापि तस्या लक्ष्यमासीद् वैद्या भवितुम्। कथञ्चित् किञ्चिद् धनं सञ्चित्य सा १८८० क्रैस्ताब्दे ब्रिटेनदेशं गतवती। किन्तु तत्र गत्वापि तस्या लक्ष्यं न पूरितम्। अस्वास्थ्यवशात् सा अध्ययनाय प्रशिक्षणाय वा अयोग्या आसीत्। अगतिकतया लेखनमेव तस्या जीविकानिर्वाहस्य केवल उपायः अभवत्। अतः औषधेन शारीरिकरोगस्य चिकित्सां कर्तुमसमर्था सा लेखन्या सामाजिकरोगस्य चिकित्सायां बद्धादरा जाता। सामाजिकसमस्या विषयीकृत्य सा कथानिबन्धादिलेखनं प्रारब्धवती। नारीवादस्तस्या लेखनस्य मुख्यो विषय आसीत्। १८८९ क्रैस्ताब्दं यावत् योरोपमहादेशस्य विविधदेशान् अटित्वा सा पुनः दक्षिण-आफ्रिकां प्रत्यागता। तत्रागत्य सा राजनीतिक्षेत्रं प्रविष्टा। १८९३ क्रैस्ताब्दे पुनः ब्रिटेनदेशं गतवती। १८९४ क्रैस्ताब्दे सा प्रख्यातवैद्येन स्यामुयेल-कर्नराइटमहोदयेन विवाहमप्यकार्षीत्। किन्तु विवाहात् परं तस्या अनारोग्यं वर्धितम्। तस्याः प्रथमा पुत्री जन्मन एकदिनात् परं मृता। जातिवादं विनिन्द्य सा लिखन्ती एव आसीत्। बहुषु संस्थासु, बहुषु सभासु सा भाषणादिकमपि करोति स्म। क्रमशः तस्याः स्वास्थ्यं नश्यदासीत्। १९१३ क्रैस्ताब्दे सा चिकित्सार्थं पुनः ब्रिटेनदेशं गता। किन्तु प्रथमविश्वयुद्धकारणात् तया तत्रैव स्थातुमापतितम्। तत्रैव स्थित्वा सा युद्धं विरुध्य लेखितुं प्रारभत। १९२० क्रैस्ताब्दे युद्धस्य समाप्तेः परं सा दक्षिण-आफ्रिकादेशं प्रत्यागता। तत्रैव तस्या अन्तिमदिनानि यापितानि। तत्रैव १९२० क्रैस्ताब्दे रात्रौ निद्रायामेव तस्या प्राणा देहं परित्यज्य गताः। तस्याः शरीरं किम्बार्लेनामके स्थाने समाहितम्। तस्याः पत्युर्मरणादनन्तरं तस्याः शरीरं समाधेः पुनरुत्थाप्य बाफेल्स्कप-पर्वतस्य शीर्षदेशे तस्याः पत्युः, कन्यायाः, प्रियशुनकस्य च समाधीनां पार्श्वे पुनः समाहितम्।

तस्याः साहित्यकर्मसु The Story of an African Farm, Dreams, Dream Life and Real Life, A Letter on

the Jew, Woman and Labour, Thoughts on South Africa, Undine इत्यादयः प्रसिद्धाः।

**मपासाँ–** लरे-ला-पोइत्तेविन्-गर्भे गुस्तवे-डी-मपासाँ-महोदयस्य प्रथमपुत्रत्वेन अगस्तमासस्य पञ्चमे दिने १८५० क्रैस्ताब्दे फ्रान्सदेशे जातः हेनरी-रेने-एलबार्ट-गाइ-डी-मपासाँ-महोदयः। तयोर्माता लरे-वर्या स्वतन्त्रमनस्का महिला आसीत्। यदा मपासाँमहोदयस्य वयः एकादशवर्षाण्यासंस्तथा तस्यानुजः हार्भे-महाशयः पञ्चमवर्षीय आसीत् तदा तयोर्मातुः पितुश्च विवाहविच्छेदोऽभूत्। तत उभावपि पुत्रौ मात्रा सहैवास्ताम्। माता साहित्येषु बद्धादरा आसीत्। अग्रिमं वर्षद्वयं मात्रा सहैव स स्थितवान्। त्रयोदशवर्षवयसि साहित्याध्ययनार्थं स प्रेषितः। १८७० क्रैस्ताब्दे स्नातकपरीक्षामुत्तीर्य पर्सियादेशेन सह फ्रान्सदेशस्य युद्धे स शौर्येण युद्धवान्। १८७१ क्रैस्ताब्दे नर्माण्डीनगर्याः स प्यारिसनगरीं गतः। तत्र नौसेनाया लिपिकरूपेण दशवर्षाणि कार्यं कृतवान्। एतस्मिन्नेव काले गुस्तावे-फ्लबार्टवर्यस्य प्रेरणया स लेखनं प्रारब्धवान्। तस्यैव गृहे प्रख्यातसाहित्यिकैः सह तस्य परिचयोऽप्यभूत्। १८७८ क्रैस्ताब्दे तस्य विभागान्तरे नियुक्तिरभवत् तथा तस्मादेव वर्षात् प्रसिद्धपत्रिकासु स निबन्धान् लेखितुं प्रारभत। तस्यावकाशकालः कथोपन्यासादिलेखनेन याप्यते स्म। १८८० क्रैस्ताब्दे तस्य प्रथमप्रसिद्धकथा Boule de Suif प्रकाशिता। ततः परं तेनाजीवनं विश्ववाङ्मयः निरन्तरं कथोपन्यासैः समृद्धिं नीतः। स विविधैर्गुप्तनामभिः लिखति स्म। जोसेफ-प्रुनियार, गाई-डी-भेलमण्ट् इत्यादीनि तस्य गुप्तनामानि सन्ति। अन्तिमजीवने स मानसिकरूपेणास्वस्थो जातः। सर्वदापि रोगभयेन मृत्युभयेन स पीडितो भवति स्म। १८९२ क्रैस्ताब्दे जनुयारीमासस्य द्वितीये दिने स आत्महत्यायै प्रायतत किन्तु असफलः सन् कस्मिंश्चित् प्रख्याते मनोरोगचिकित्सालयं नीतः। तत्रैव १८९३ क्रैस्ताब्दस्य जूलैमासस्य षष्ठे दिने तस्य मृत्युरभवत्।

आधुनिकलघुकथानां पथिकृत्सु मपासाँवर्यः अन्यतमः। तस्य अद्भुतकथावस्तु समरसेट-मम, ओ-हेनरी इत्यादीनां प्रसिद्धानां कथाकाराणां प्रेरणारूपमासीत्। तस्य कथासु मनुष्यमनसो दुःखनैराश्यादिकं विचित्रतया प्रस्फुटति स्म।

**लुइगि पिराण्डेलो–** इटलीदेशे सिसिलिनगर्याः समीपवर्तिनि कस्मिंश्चिद्ग्रामे समृद्धपरिवारे १८६७ क्रैस्ताब्दे जूनमासस्याष्टाविंशे दिने जातः लुइगि-पिराण्डेलोमहोदयः। पिता स्टिफानोमहोदयस्य पारिवारिका आकरा आसन्। मातापि समृद्धपरिवारादेव समागतासीत्। बाल्यात्प्रभृति प्रौढा गृहभृत्या मारिया-स्टेला तस्मै लोककथाः श्रावयन्त्यासीत्। ताभिः कथाभिः तस्य कल्पनासामर्थ्यं प्रावर्धत। द्वादशे एव वयसि स तस्य प्रथमं नाटकं विरचितवान्।

पित्रा यान्त्रिकपाठान् पठितुं प्रेषितोऽपि स कलाक्षेत्रमेव प्रविष्टवान्। १८८० क्रैस्ताब्दे तस्य पिता सपरिवारः पालेर्मोनगरीं गतः। तत्रैव स तस्य शिक्षणं समापितवान्। ग्रन्थाध्ययनमेव तस्य प्रधानं कर्मासीत्। प्रधानतया स समकालिककवीनां लेखान् पठति स्म।

पिराण्डेलोवर्यः तस्यैव आत्मीयया कयाचित् कन्यया सह प्रणयसूत्रेणाबद्धो जातः। तस्या नामासीत् लीना इति। तस्याः परिवारस्य दुराग्रहोऽयमासीद्यत् स शीघ्रमध्ययनादिकं परित्यज्य पारिवारिकवाणिज्ये मनो निदध्याद्येन स शीघ्रं लीनां परिणेतुं शक्नुयात्। तस्मात् १८८६ क्रैस्ताब्दे स पितुर्वाणिज्यं प्रविष्टः। तथा तेषामाकरेषु कार्यं कुर्वता तेन ये अनुभवाः प्राप्तास्तैरेव स आगामिनि काले प्रख्यातान् उपन्यासान् कथाश्च व्यलिखत्। किन्तु तस्य वाणिज्ये प्रवेशात् परं लीनायाः परिवारस्य विवाहाग्रहो न्यूनो जातः। ततः स पुनरध्ययनार्थं विश्वविद्यालयं प्रविष्टः। १८८७ क्रैस्ताब्दे प्रगताध्ययनार्थं स रोमनगरीं प्राप्तः। तत्र तस्मिन् काले एकतो विशिष्टाः राजनैतिक-सामाजिकविप्लवानां प्रबलं वातावरणमासीद् अपरतश्च अवक्षीयमाणानां नैतिकमूल्यानां बीभत्सचित्रमप्यासीत्। प्रखरनीतिवादिनः लुइगिमहोदयस्य तत् सह्यं नासीत्। तेन प्रपीडितः स तस्य मल-गिकोण्डोनामधेये प्रथमकाव्यसङ्ग्रहे मूल्यावक्षयस्य प्रकटचित्राणि विलिखितवान्। रोमविश्वविद्यालयस्य लातिनभाषाया अध्यापकेन सह विवादवशात् स विश्वविद्यालयाद्बहिष्कृतः। ततस्तस्याध्यापकानां सकाशात् शंसापत्रं स्वीकृत्य स जर्मनीदेशे बननगर्यां गतः। वर्षद्वयं यावत् बननगर्यां तस्य वासः सांस्कृतिककार्यैः परिपूर्ण आसीत्। स जर्मनसाहित्यं सम्यगधीयान एव स्वीयं लेखनकार्यं तथा अनुवादकार्यमपि पूर्णरूपेण कुर्वन्नासीत्। १८९१ तमे वर्षे स डक्टरेट-उपाधिं प्राप्तवान्। जर्मनीदेशे तस्यायं वासस्तस्य जीवनस्य काञ्चन दृढभूमिं विरचायामास। ततः स्वदेशं प्रत्यागत्य प्रसिद्धैः साहित्यिकैः सह मेलितुं लेखितुञ्च प्रारभत। १८९३ क्रैस्ताब्दे स Marta Ajala-नाम्ना तस्य प्रथमं प्रसिद्धं ग्रन्थं प्रणीतवान्। स च ग्रन्थ १९०१ क्रैस्ताब्दे l'Esclusaनाम्ना प्रकाशितः। १८९४ क्रैस्ताब्दे तस्य प्रथमो लघुकथासङ्ग्रहः Amori senza Amore प्रकाशितः। तस्मिन्नेव वर्षे पितुराग्रहेण स काञ्चित् कुलीनां शिक्षितां लज्जाशीलाम् एण्टोनियेट्टानामधेयां कन्यां परिणीतवान्। तयोर्दाम्पत्यं सुखदमासीत्। स तस्य साहित्यकर्मणि व्यापृत आसीत् तथैव तस्य द्वौ सुतौ काचित् सुता च जाताः। एतदभ्यन्तरे पत्रिकाप्रकाशकैरपि तस्य सम्बन्धो जातः। तस्य लेखाः पत्रिकास्वपि प्रकाशिता भवन्ति स्म।

१८९७ क्रैस्ताब्दे रोमनगर्यां कस्मिंश्चिद् विद्यालये इटलीयनभाषाशिक्षकत्वेन स कार्यमपि स्वीकृतवान्। अग्रिमे वर्षे स तस्य मित्रैः साकं काञ्चित् साप्ताहिकपत्रिकां प्रकाशयितुं प्रारभत। १९०३ क्रैस्ताब्दं यावत् तस्य जीवनं सुखमयमेवासीत्। तस्मिन् वर्षे तस्य पितुराकरेषु जलप्लावनं जातम्। तत्र स न केवलं स्वीयं धनमपि तु लुइगिवर्यस्य विवाहकाले प्राप्तं यौतुकधनमपि नियोजितवान् आसीत्। दुःसंवादवाहि तत्पत्रम् एण्टोनियेट्टा आकस्मिकतया पठित्वा स्वीयं मानसिकसाम्यं नाशितवती। लुइगिवर्यः अनेन प्रबलतया खिन्नः प्रथममात्महत्यां कर्तुं यत्नं कृत्वापि कथञ्चिदात्मानं सान्त्वयित्वा कर्मसु मनो न्यधात्। स विद्यालये अधिकतया वर्गान् स्वीकर्तुं प्रारभत। इटलीयनभाषया सह स जर्मनभाषामपि पाठयितुं प्रारभत। याभ्यः पत्रिकाभ्यः स निःशुल्कं स्वलेखान्

प्रकाशयितुं ददाति स्म तासां पत्रिकाणां सकाशाद् धनमयाचत। एतस्मिन्नेव काले स Il Fu Mattia Pascal नाम्ना उपन्यासं लेखितुं प्रारभत यस्य कथावस्तु तस्य मनोरोगिण्या भार्याया दर्शनेन स्फुरितमासीत्। अस्मिन्नुपन्यासे लुइगिवर्यस्य जीवनस्य बह्वो घटना उल्लिखिताः सन्ति। अनेनोपन्यासेन तस्य प्रसिद्धिः देशान्तरेष्वपि गता। जर्मनभाषायामयमुपन्यासः १९०५ वर्षे अनूदितः। ततः तस्य लेखनमनुवर्तते स्म। स बहूनि नाटकानि, उपन्यासान्, कथाः, निबन्धांश्च निरन्तरं लिखति स्म। प्रथममहायुद्धे तस्य पुत्रः स्टिफानो सैनिकत्वेन गतस्तथा अष्ट्रियादेशीयैः बन्दीकृतः। अनेन दुःखितः स इतोऽपि बहून् उत्तमान् लेखान् लिखितवान्। युद्धसमाप्तेः परं तस्य पुत्रः पुनर्गृहमागतः किन्तु तस्य पत्न्या मानसिकी स्थितिः क्रमशः क्षीयमाणा आसीदित्यतः सा कश्चिन्मनोरोगचिकित्सालयं नीता। भार्यया सहायं विच्छेदस्तस्य कृते प्रबलदुःखद् आसीत्। तथापि तस्य लेखने नाटकेषु शैथिल्यं नाजायत। १९२५ क्रैस्ताब्दे इटलीदेशे फेसीवादस्याभ्युत्थानेन तस्य भाग्यं प्रसन्नं जातम्। स मुसोलिनेः कृपादृष्टौ पतितस्तथा सर्वकारपक्षतस्तस्य नाटकानां कृते प्रबलं प्रोत्साहनं लभ्यमानमासीत्। मुसोलिनिना सह सुसम्पर्कवशात् स देशान्तरभ्रमणस्यापि उत्कृष्टमवकाशमलभत। किन्तु क्रमशः फेसीनेतृभिः सह तस्य सम्पर्कः क्षीणो जातस्तथा १९२७ क्रैस्ताब्दे फेसीदलस्य तस्य परिचयपत्रं तेन नेतृणां पुरत एव छिन्नम्। ततः परमाजीवनं फेसी-आरक्षकाणां चरास्तस्य परितश्चरन्ति स्म। तस्य साहित्यिकावदानाय स १९२९ क्रैस्ताब्द Academic of Italy तथा १९३४ क्रैस्ताब्दे नोबेलप्रशस्त्या सभाजितः। अन्ते १९३६ क्रैस्ताब्दे डिसेम्बरमासस्य दशमदिने स्वीयगृहे स एकाकी स्थित्वैव इहलोकमत्यजत्।

तस्य लेखेषु तस्य सांस्कृतिकं नैराश्यं प्रकटं दृश्यते स्म। तस्य प्रसिद्धलेखेषु Vecchi e i Giovani, l Fu Mattia Pascal, Il Turno, Uno, Nessuno e Centomila, Enrico IV, L’Imbecille, Così è (Se Vi Pare) इत्यादयः सन्ति। तस्य काव्यग्रन्थाः Mal Giocondo, Pasqua di Gea, Elegie Renane, Zampogna, Fuor di Chiave सन्ति।

**फ्रान्स काफका–** अधुनातनस्य चेक-प्रजातन्त्रदेशस्य राजधान्यां प्राग्-नगर्यां मध्यवित्तयहूद्यपरिवारे १८८३ वर्षस्य जूलैमासस्य तृतीये दिने जनिमलभत। तस्य पिता हर्मन-काफकामहोदयः कश्चिद् वणिगासीत्। स तस्य पित्रोः षडपत्येषु प्रथम आसीत्। तस्य माता शिक्षिता महिला आसीत्। तस्य मातापि वाणिज्ये पितुः सहायार्थं गृहाद् बहिर्गच्छति स्म। दिने द्वादशहोराः तौ दम्पती गृहाद्बहिरेव अतिष्ठताम्। फ्रान्सप्रभृतयो भ्रातरः गृहभृत्यैः धात्रीभिश्चापाल्यन्त। फ्रान्सस्य मातृभाषा आसीत् जर्मनभाषा। किन्तु स चेकभाषामपि सम्यग्जानाति स्म। षष्ठे वयसि स प्राथमिकविद्यालयं प्रविष्टः। तत्रत्यशिक्षां परिसमाप्य स उच्चविद्यालयं प्रविष्टः। उच्चविद्यालयीयशिक्षां समाप्य स चार्लस-फर्डिनण्ड-विश्वविद्यालये रसायनशास्त्रं पठितुं प्रविष्टः किन्तु सप्ताहद्वयं रसायनं पठित्वा स विधिशास्त्रं पठितुं गतः। तत्रैवच्छात्राणां परिषदि सदस्यो बभूव। तस्यां परिषदि साहित्य-संस्कृतिविषये चर्चा भवति स्म। तत्रैव स लेखनं प्रारब्धवान्। १९०६ क्रैस्ताब्दे तेन डक्टर अफ ल Doctor of Law इत्युपाधिः प्राप्तः।

अग्रिमवर्षे तस्मै इटलीदेशीयया कयाचित् वाणिज्यसंस्थया लिपिकत्वेन नियुक्तिर्दत्ता। तत्र प्रातरष्टवादनात् सायं षड्वादनं यावत् तेन कार्यं करणीयं भवति स्म। तस्य कार्यस्य समयविषये स सुखी नासीत्। यतो हि तेन लेखनकार्ये मनो निधातुं न शक्यते स्म। अतः १९०८ क्रैस्ताब्दे स तस्याः संस्थाया उद्योगं परित्यज्य बोहेमियाराज्ये अन्यस्यां संस्थायामुद्योगं स्वीकृतवान्। तत्रत्यकार्यं सम्यक् कुर्वन्नेव स लेखनादिकमपि कुर्वन्नासीत्। १९११ क्रैस्ताब्दे स तस्यावुत्तस्य वाणिज्ये भागं गृहीतवान्। तत्रैव स्वीयमित्रैः साकं प्रथममहायुद्धस्य समाप्तिं यावत् स प्रागनगर्यां साहित्यं सेवमानः स्थितः। तस्मिन् काले तेन नाटकेषु नटनेऽपि मतिर्दत्ता। १९१७ क्रैस्ताब्दे स यक्ष्मारोगेण पीडितो जातः। १९२३ क्रैस्ताब्दे स बर्लिननगरीं गतः। तत्र स कयाचित् पञ्चविंशतिवर्षीयया शिशुविद्यालयशिक्षिकया तिष्ठति स्म। तया सह तस्य प्रणयः प्रारब्धः। किन्तु तत्र तस्य रोगो वर्धितः। अतः अन्ततो गत्वा स पुनः प्रागनगरीं गतः। तत्रैव कस्मिंश्चित् चिकित्सालये १९२४ क्रैस्ताब्दस्य जूनमासस्य तृतीये दिने स मृतः।

फ्रान्समहोदयस्य लेखास्तस्य मृतेः परमेव प्रसिद्धिं गताः। तस्य जीवत्काले स केवलं कतिचन कथा एव लिखितवान्। उपन्यासेषु केवलं मेटामरफोसिस् इत्येव तस्य केवल उपन्यासः। किन्तु यत्किमपि तेन लिखितमासीत् तस्य मित्रस्य म्याक्स-ब्रडमहोदयस्य सकाशे सुरक्षितमासीत्। तस्मै फ्रान्स एकस्मिन् पत्रे लिखितवान्-

“प्रिय म्याक्स, मम अन्तिमोऽनुरोधोऽयं यत्, यत्किमपि मया त्यक्त्वा गतं…दैनन्दिनीरूपेण, पाण्डुलिपिरूपेण, पत्ररूपेण (मम अन्येषां च), चित्ररूपेण, अन्येन केनचिद्वा रूपेण अपठित्वैव ज्वालनीयम्।”

किन्तु ब्रडमहोदय इममनुरोधं रक्षितुं नैच्छत् तथा तस्य मृत्योः परं दशसु वर्षेषु तस्य कृतयः क्रमशः प्रकाशिताः। अन्याः सर्वा अप्रकाशिताः कृतयः १९३९ क्रैस्ताब्दे प्यालिष्टिनियागमनकाले तेन सह स नीतवान्। फ्रान्सस्य प्रणयिनी डोरा अपि तस्य २० पुस्तिकाः, ३५ पत्राणि च संरक्षितवती। तेषामपि काले प्रकटनं जातम्।

**ग्रीमभ्रातरौ–** ज्याकब-लुडविग-कार्ल-ग्रिममहोदयस्तथा विलिहेल्म-कार्ल-ग्रिममहोदयो यथाक्रमं १७८५ क्रैस्ताब्दस्य जनुयारीमासस्य चतुर्थे तथा १७८६ क्रैस्ताब्दस्य फेब्रुयरीमासस्य चतुर्विंशे दिने जर्मनीदेशस्य फ्राङ्कफुटनगर्याः समीपे जनिमलभेताम्। ज्याकबस्य जन्मन एकादशे वर्षे तेषां पिता दिवङ्गतः। वर्षद्वयात् परं तस्य पितामहोऽपि दिवमगात्। तेषां माता तदा महता कष्टेन परिवारं प्रतिपालयन्ती आसीत्। तेषां बृहत्परिवारे नवसु भ्रातृषु षड् जीविता आसन्। विद्यालयीयशिक्षणं समाप्य तावुभावपि भ्रातरौ मार्बुर्गविश्वविद्यालयं प्रविष्टः। विश्वविद्यालये एव तौ भाषातत्त्वविषयेऽध्ययनं प्रारब्धवन्तौ। अग्रे ताभ्यामेव भाषातत्त्वे Grimm’s Law इति नाम्ना प्रसिद्धं तत्त्वं प्रतिपादितम्।

वस्तुतः तयोर्भाषातत्त्वे कृतस्य गवेषणस्य अवान्तरफलरूपेणैव उपकथासङ्कलनमागतम्। १८०८ क्रैस्ताब्दे ज्याकबः वेस्टफालियाराज्ञः सभाग्रन्थागारिकस्योद्योगमलभत। १८१२ क्रैस्ताब्दे भ्रातृभ्यां तयोः प्रथमम् उपकथासङ्कलनं प्रकाशितम्। ताभ्यां कृषिकाणां ग्रामीणानाञ्च सकाशादिमाः कथाः सङ्कलिता आसन्। १८३० क्रैस्ताब्दे तावुभावपि गटिनजेननगरीं गतौ। तत्रत्यविश्वविद्यालये ज्याकबः अध्यापकस्य प्रधानग्रन्थागारिकस्य च पदं प्राप्तस्तथा विल्हेल्मः १८३५ क्रैस्ताब्दे तत्रैव अध्यापकस्य पदं प्राप्तवान्। १८३७ क्रैस्ताब्दे ह्यानुवरराज्यस्य राज्ञा प्रथम-अर्नेस्ट-अगस्टसः यदा उदारं संविधानं स्तम्भितवान् तदा अपरैः पञ्चभिरध्यापकैः सह मिलित्वा तौ भ्रातरौ अपि तस्य सिद्धान्तस्य विरोधं कृतवन्तौ। एते सप्त इतिहासे गटिनजेन-सप्तकम् इति नाम्ना प्रसिध्यन्ति। अस्य परिणामरूपेण ते विश्वविद्यालयान्निष्कासिताः। ततस्तौ कासेलनगर्यां तयोर्भ्रातुः लुडविगवर्यस्य गृहे स्थितवन्तौ। ताभ्यां तत्र कस्यचित् कोषस्य निर्माणे मतिर्दत्ता। ताभ्यां पुनरपि उद्योगं लब्धवन्तौ आजीवनं कोषनिर्माणे एव बद्धादरौ आस्ताम्। १८५४ क्रैस्ताब्दे विल्हेल्मः तथा वर्षचतुष्टयात् परं ज्याकबः दिवङ्गतौ।

ताभ्यां प्रायः १८०६ क्रैस्ताब्दादारभ्य लोककथानां सङ्कलनमारब्धमासीत्। १८१० क्रैस्ताब्दे उपकथानां प्रथमं सङ्कलनं प्रकाशमायातम्। १८१२ क्रैस्ताब्दे ताभ्यां षडशीतिकथानामेकं सङ्कलनं प्रकाशितम्। एवं ताभ्यां जीवनं यावद् बह्व्यो लोककथाः सङ्कलिताः प्रकाशिताश्च।

**चार्लस तथा मेरी ल्याम्ब–** लण्डननगर्यां जन-ल्याम्बवर्यस्य कनिष्ठः पुत्रः चार्लसः तथा तस्माद् एकादशवर्षैर्ज्येष्ठा कन्या मेरी तयोः साहित्यकीर्त्या संस्मर्येते सर्वैः। चार्लसवर्यस्य बाल्यजीवनस्य कथा सम्यङ्ङ ज्ञायते। मेरी एव तं पाठयति स्म इति ज्ञायते। वाचि अस्पष्टतावशात् चतुर्दशे एव वयसि विद्यालयशिक्षणं समाप्य स प्रथमतः कस्यचिद् वणिजः कार्यालये किञ्चित्कार्यमलभत। किन्तु शीघ्रमेव तेन ईष्ट-इण्डिया-संस्थायां लिपिकस्योद्योगो लब्धः। तत्रैव पञ्चविंशतिवर्षाणि तेन यापितानि। तत्रैव तेन लेखनादिकं प्रारब्धम्। यावता तेन कविरिति प्रसिद्धिः प्राप्ता स मानसिकरूपेण अस्वस्थो जातः। तेन षड्सप्ताहान् यावत्स कस्मिंश्चिन्मनोवैद्यालये यापितवान्। तद्वर्षमासीत् १७९५ क्रैस्ताब्दः। तस्मादेकस्माद् वर्षात् परं १७९६ क्रैस्ताब्दस्य सेप्टेम्बरमासस्य द्वाविंशे चार्लसस्य भगिनी मेरी मनोरोगिणी सञ्जाता। सा सहसा कयाचित् छुरिकया स्वमातरं हतवती। मनोरोगवशात् तस्या दण्डो न जातः किन्तु सा चिकित्सार्थं वैद्यालयं प्रवेशिता। १७९९ क्रैस्ताब्दे तस्य पिताऽपि दिवमगात्। ततः मेरी चार्लसश्च एकत्रैव निवासं प्रारब्धवन्तौ।

तयोर्गृहे लण्डननगर्याः महान्तः साहित्यिकाः साप्ताहिकमेलनायागच्छन्ति स्म। स्यामुयेल-कोलरिजमहाशयस्तस्य सतीर्थस्तथा निकटमित्रमासीत्। १८०७ क्रैस्ताब्दे चार्लसस्तथा मेरी मिलित्वा Tales from Shakespeare इति ग्रन्थे शेक्सपीयर-कृतनाटकानां कथारूपं दत्तवन्तौ। तत्र सुखान्तनाटकानि मेरी तथा दुःखान्तनाटकानि चार्लसः रूपान्तरितवान्। तेनान्यान्यपि बहूनि पुस्तकानि विरचितानि सन्ति। तेषु काव्यग्रन्थाः प्रबन्धाश्च सन्ति। १८१९ क्रैस्ताब्दे चतुश्चत्वारिंशे वयसि स कस्याश्चित् नट्याः प्रणयपाशे पतितः किन्तु तयोः सम्बन्धे तस्या असम्मतिवशादाजीवनमकृतदारः सन्नेव नवपञ्चाशद्वर्षवयसि स दिवमगात्। तावत्पर्यन्तं तौ भ्रातृभगिन्यावेकत्रैवास्ताम्।

मेरी चार्लसस्यापेक्षया दशभिर्वर्षैर्ज्येष्ठा। तस्या मानसिकरोगात् भ्रातैव तस्याभिभावकः सञ्जातः। ताभ्यामेकत्रैव जीवनं यापितम्। १८२३ क्रैस्ताब्दे ताभ्यां मिलित्वा काचिदनाथा बाला दत्तकरूपेण स्वीकृता। तस्या नामासीत् एम्मा-ऐसोला इति। १८०७ क्रैस्ताब्दे सा चार्लसेन सह Tales from Shakespeare इति ग्रन्थं प्रकाशितवती तथा क्रमशः अन्यानपि बहून् किशोरपाठ्यग्रन्थान् प्रकाशितवती। सा एकाकिनी अतिप्रसिद्धं Mrs. Leicester's School इति ग्रन्थं लिखितवती। आजीवनं मानसिकरोगात् सा न मुक्तिं प्राप्तवती। भ्रातुर्मृतेरपि दशवर्षेभ्यः परं सा मृतवती।

**एडुआर्डो गेलियानो–** उरुगुयेदेशस्य मण्टेभिडिओनगर्यां मध्यवित्तक्रैस्तपरिवारे एडुआर्डोवर्यस्य १९४० क्रैस्ताब्दस्य सेप्टेम्बरमासस्य तृतीयदिने जन्म। लातिन-अमेरिकीयबालानाम् इव तस्यापि पादकन्दुकक्रीडको भवितुं स्वप्न आसीत्। कथञ्चिद्विद्यालयीयशिक्षणं समाप्य स उदरपालनाय कार्यमारब्धवान्। बहुषु स्थानेषु बहूनि कार्याण्ययं कृतवान्। चतुर्दशे वयसि स कस्याश्चित् पत्रिकायाः कृते प्रथमवारं स्वीयं व्यङ्ग्यचित्रम् cartoon विक्रीतवान्। १९५९ क्रैस्ताब्दे तस्य प्रथमो विवाहः। १९६० वर्षात् पत्रकाररूपेण तस्य जीवनमारब्धम्। वर्षद्वयस्य कृते स Época पत्रिकायाः प्रधानसम्पादकत्वेन कार्यं कृतवान् ततः परञ्च University Press इत्यत्र प्रधानसम्पादकरूपेण स्थितवान्। १९६२ क्रैस्ताब्दे तस्य विवाहविच्छेदोऽभूत्। तस्मिन्नेव वर्षे गार्सियेलाबेरो-महोदयामेष परिणीतवान्। १९७३ क्रैस्ताब्दे उरुगुयेदेशे सामरिकं शासनं प्रारब्धम्। स शासकैर्बन्दीकृतस्तथा बन्दिदशायाः परं देशान्निष्कासितः। तस्य प्रसिद्धस्य ग्रन्थस्य Open Veins of Latin America इत्यस्य प्रकाशने न केवलम् उरुगुयेदेशस्य शासकैः निषेध आरोपितः अपि तु चिलिदेशे अर्जेण्टिनादेशे च अस्य प्रकाशनं निषिद्धम्। देशान्निष्कासितः सः अर्जेण्टिनादेशं गतः। तत्र Crisis इत्येकां पत्रिकां सम्पादयितुमारब्धवान्। १९७६ क्रैस्ताब्दे स पुनर्विवाहमकरोत्। किन्तु तस्मिन्नेव वर्षे अर्जेण्टिनादेशं सेनया अधिकृतं तथा तस्य मरणदण्ड उद्घोषितः। स पुनः पलाय्य स्पेनदेशं प्राप्तः। तत्रैव तस्य प्रख्यातकृतिः Memoria del fuego (Memory of Fire) प्रकाशिता। १९८५ क्रैस्ताब्दे स स्वदेशं प्रत्यागतः। तत्र तदा गणतन्त्रं प्रतिष्ठितमासीत्। स गणतान्त्रिकसर्वकारस्य पक्षमाश्रित्य बहु लिखितवान्। वेनेजुयेलादेशस्य कराकासनगर्यां TeleSur इति दूरदर्शनवाहिन्या आरम्भात् परं स तस्या वाहिन्या परामर्शदातृसमितिं प्रविष्टवान्। पुयेर्तोरिकोदेशस्य स्वातन्त्र्यायापि स बहु यतितवान्।

तस्य प्रसिद्धकृतिषु Open Veins of Latin America इति ग्रन्थे योरोपनिवासिभिः अमेरिकादेशीयैश्च लातिन-अमेरिकास्थदेशानां लुण्ठन-शोषणस्य इतिहासं सुष्ठु प्रतिपादितवान्। Memoria del fuego (Memory of Fire) इत्यत्रापि खण्डत्रये तत्रत्य इतिहास एव विवेचितः। The Book of Embraces तस्यापरा प्रख्याता कृतिः। २०१० क्रैस्ताब्दे स The Stig Dagerman पुरस्कारेण सभाजितः।

**ओ हेनरी–** विलियम-सिडनि-पोर्टर-महोदयो यो हि ओ हेनरी इति व्याजनाम्ना बह्वीः लघुकथा अलिखत्स सेप्टेम्बरमासस्य एकादशे १८६२ वर्षे अमेरिकादेशे उत्तरकैरोलिनास्थाने जनिमलभत। तस्य पिता अलगेर्नोन-सिडनि-पोर्टरमहोदयो वैद्य आसीत्। माता मेरी-जेन-वार्जिनिया-सुवैम-पोर्टरमहोदया विलियमस्य तृतीये वर्षे यक्ष्मारोगेण मृतिमाप्नोत्। पित्रा सहैव विलियमो मातामह्या गृहमधिष्ठितवान्। तत्र बाल्यात् तस्याध्ययने रुचिरुत्पन्ना। कस्याश्चिदात्मीयायाः प्राथमिकविद्यालये अध्ययनं समाप्य स उच्चविद्यालयं प्रविष्टः। १८७९ क्रैस्ताब्दे स कस्यचिद् आत्मीयस्य औषधापणे कार्यमारब्धवान्। १८८१ क्रैस्ताब्दे वैद्यकीयाध्ययनं समापितवान्। १८८२ क्रैस्ताब्दे स टेक्ससनगरीं समागतः। तत्र स स्पैनिशभाषां तथा जर्मनभाषामधीतवान्। ततः १८८४ क्रैस्ताब्दे सः अस्टिननगरीं प्राप्य स चिकित्साव्यवसायं कृतवान्। ततोऽन्यान्यपि बहूनि कार्याणि कृतवान्। तत्र स सङ्गीतनाटकादिष्वपि भागं गृह्णाति स्म। स गीटारयन्त्रे म्याण्डोलिनयन्त्रे च पटुरासीत्। १८८७ क्रैस्ताब्दे एथोल-एस्टेस-महोदयां परिणीतवान्। १८८८ क्रैस्ताब्दे तयोः कश्चित्पुत्रो जातः। होराभ्यन्तरे स पुत्रो मृतवान्। ततः १८८९ क्रैस्ताब्दे तयोः काचित् पुत्री उत्पन्ना। इत आरभ्य स बहुषु संस्थानेषु बहूनि कार्याणि कुर्वन्नासीत्। ततः स कस्याश्चिद् व्यङ्ग्यपत्रिकायाः प्रकाशनमारभत। तस्याः पत्रिकायाः प्रायः पञ्चदशशतं ग्राहका आसन्। किन्तु १८९५ क्रैस्ताब्दे सा पत्रिका स्तब्धा। यतो हि पत्रिका एव तस्याजीविका आसीत्। किन्तु पत्रिकाचालनेन तस्य परिवारप्रतिपालनं न भवति स्म। ततः स हौस्टननगरीं प्राप्तः। तत्र स the Post इति पत्रिकायां लेखनं प्रारब्धवान्। मासे पञ्चविंशतिडालराणि तस्य वेतनमासीत्। क्रमशस्तस्य जनप्रियताऽवर्धत। तेन तस्य वेतनमप्यवर्धत। दौर्भाग्यवशात् तस्य हौस्टननगरीवासकाले First National Bank of Austin इति संस्थायां गणनापरीक्षणं जातम्। तत्र गणनायां दोषः प्राप्तः। दौर्भाग्यवशात्स तस्यामेव संस्थायां कार्यं करोति स्म। सोऽपि दोषीति निश्चितः। स कथञ्चित् ततः पलाय्य प्रथमतः न्यू-अर्लिन्सनगरीं ततश्च हण्डुरासदेशं प्राप्तः।

तस्य पत्नी पुत्री च तस्याः पितृगृहे एव स्थितवत्यौ। किन्तु सा अत्यन्तमस्वस्थाऽभूदिति कृत्वा सा तेन सह स्थातुं हण्डुरासदेशं गन्तुं नापारयत्। अन्ततः स एव हौस्टननगरीं सम्प्राप्तः। किन्तु सा १८९७ क्रैस्ताब्दे जूलैमासस्य पञ्चविंशे दिने मृता। पूर्वं कृतस्य दोषस्य कारणात् स कारागारं प्रेषितः। तत्र स वैद्यकीयाध्ययनं कृतवानिति कृत्वा औषधभाण्डारे कार्यं प्राप्तम्। तस्मात्तेन कश्चित् पृथक् प्रकोष्ठोऽपि प्राप्तः। तत्रैव स्थित्वा विविधच्छद्मनाम्ना चतुर्दशकथा अलिखत्। एतस्मिन्नेव काले ओ-हेनरी इति व्याजनाम स गृहीतवान्। एतन्नाम्ना तस्य प्रथमा कथा Whistling Dick’s Christmas Stocking। इयं कथा McClure’s Magazine पत्रिकायां १८९९ क्रैस्ताब्दे डिसेम्बरमासे प्रकाशिता। तस्यैव मित्रमेकं तस्य कथाः प्रकाशकेभ्यो ददाति स्म। तेन प्रकाशकैरपि न ज्ञातं यल्लेखकः कारायामस्तीति। १९०१ क्रैस्ताब्दे स कारागारान्मुक्तिं प्राप्य पिट्सबर्गनगरीं गतः। तत्रैव तस्य श्वशुरौ तस्य पुत्रीमानीतवन्तौ। तस्य पुत्री कदाचिदपि न ज्ञातवती यत् स कारायामस्तीति। १९०२ क्रैस्ताब्दे स न्यू-यर्कनगरीमागतः। प्रकाशकाः प्रायः अत्रैव भवन्ति स्म। अत्र स पूर्णतया लेखने एव मतिं दत्तवान्। अत्र स्थित्वा स त्रिशताधिकाः कथा व्यलिखत्। New York World Sunday Magazine पत्रिकायां स एकं वर्षं यावत् प्रतिसप्ताहमेकैकां कथामलिखत्। तस्य कथाः समीक्षकैर्निन्दिता अपि पाठकैरादृताः। १९०७ क्रैस्ताब्दे स पुनर्विवाहमकरोत्। इयं तस्य पत्नी तस्य बाल्यकालस्य काचित् सखी। तस्या नामासीत् सारा-लिण्डसे-कोलम्यान इति। अत्यधिकसुरापानात् तस्य स्वास्थ्यं नष्टम्। १९०९ क्रैस्ताब्दे सारा तं त्यक्त्वा गतवती। अग्रिमे वर्षे जूनमासस्य पञ्चमे स मृतः। सिरोसिसरोगः, बहुमूत्रतारोगस्तथा हृत्पिण्डस्य वृद्धिस्तस्य मृतेः कारणमासीत्।

योरोपमहादेशे तदा मपासावर्यस्य प्रसिद्धिर्महत्यासीत्। ओ-हेनरीमहोदयः the American answer to Guy de Maupassant इति प्रसिद्धिमवाप। तस्य कथायां सामान्यास्तथा विशिष्टा विविधै रूपैः समागताः। the Gift of Magi, The Ransom of Red Chief, The Cop and the Anthem, A Retrieved Reformation, I don’t believe I know you इत्यादयस्तस्य प्रसिद्धकथास्वन्यतमाः। उत्तमलघुकथाकाराणां कृते तस्य नाम्ना ओ-हेनरी-पुरस्कारः दीयते।

**एण्टन चेकव–** १८६० क्रैस्ताब्दे जनवरीमासस्य नवविंशे राष्यादेशस्य दक्षिणे भागे तगनरग-नगर्यां पावेल-येगोरोविच-चेकवस्य गृहे तस्य पत्न्या येवजेनियावर्यया कश्चित्सुतः सूतो य एण्टननामधेय आसीत्। पञ्चदशवर्षाणि यावद्विद्यालये ग्रीकशिक्षामधीत्य परीक्षायामनुत्तीर्णो भूत्वा स विद्यालयमत्यजत्। १८७६ क्रैस्ताब्दे तस्य पिता निर्धनतामापद्य उत्तमर्णेभ्य आत्मानं रक्षितुं मस्कोनगरीं पलायितः। तत्र परिवारस्यान्ये सर्वे गताः किन्तु एण्टनः पारिवारिकसम्पत्तीर्विक्रेतुमध्ययनं समापयितुं च तत्रैव त्यक्तः। इतोऽपि वर्षत्रयं तत्रैव स महता कष्टेन यापितवान्। उदरपूरणाय उपार्जनेन साकमेव स एतस्मिन् काले प्रभूतमधीतवान्। १८७९ क्रैस्ताब्दे स ततो मस्कोनगरीं गत्वा तत्रत्यविश्वविद्यालये वैद्यकशास्त्रस्याध्ययनाय प्रविष्टः। केभ्यश्चिद्दिनेभ्यः परं सम्पूर्णपरिवारस्य दायित्वं तेन स्वीकरणीयमभवत् तथा स पठनेन सममेव पत्रिकासु विविधैश्छद्मनामभिर्लेखितुं प्रारभत। तस्य लेखा व्यङ्ग्यपूर्णा भवन्ति स्म। लेखकत्वेन स महतीं ख्यातिमगात्। १८८४ क्रैस्ताब्दे स वैद्यो जातः। तस्मिन्नेव वर्षे स यक्ष्मारोगेण पीडितो जातः किन्तु कस्मायपीमां वार्तां स न श्रावितवान्। तस्य लेखाः क्रमशः ख्यातिं प्राप्नुवन्त आसन्। १८८७ क्रैस्ताब्दे तस्य At Dusk इति

कथासङ्ग्रहः पुशकिनपुरस्कारं प्राप्नोत्। तस्मिन्नेव वर्षे तेन यूक्रेनदेशं प्रति गतम्। तत्र भ्रमणेन स लेखाय कथावस्तूनि सङ्गृहीतवान्। तद्वर्षे काचिन्नाट्यसंस्था तं नाटकलेखनाय नियुक्तिमदात्। १८८९ क्रैस्ताब्दे तस्य भ्रातुर्मरणेन पीडितः स काञ्चित्प्रख्यातां कथामलिखत्। १८९० क्रैस्ताब्दे जपानदेशस्य साखालिनद्वीपेषु स मासत्रयमुषितवान्। १८९२ क्रैस्ताब्दे स मेलिखोवोनामके स्थाने किञ्चिद्राज्यं क्रीत्वा तत्रैव सपरिवारमुषितुं प्रारभत। तस्य लेखा अनुवर्तन्ते स्म। १८९७ क्रैस्ताब्दे तस्य श्वासकष्टवशात् परीक्षणे कृते यक्ष्मारोगेण स पीडित इति ज्ञातम्। १९०१ क्रैस्ताब्दे स परिणीतवान्। किन्तु १९०४ क्रैस्ताब्दं यावत् रोगेण पीडितः स कथञ्चिज्जीवितवान्।

तस्य कथासु हासकथाः मुख्याः। Three Sisters, The Cherry Orchard, The Seagull, The Murder, Ostrov Shakhalin इत्यादयः प्रसिद्धाः।

☆ ☆ ☆

# सीताहरणम् अन्याश्च रचनाः कदम्बकम्[१]

(कालूरिहनुमन्तरावकृतस्य ग्रन्थस्य समीक्षा)

प्रसिद्धस्य कथाकारस्य कालूरिहनुमन्तराववर्यस्य नवीनो ग्रन्थो हस्तमायातः। ग्रन्थस्याभिधा सीताहरणम् अन्याश्च रचनाः कदम्बकमिति। अष्टादश निबन्धा एकं नाटकं तिस्रः कथाश्चास्मिन् कदम्बे विद्यन्ते।

निबन्धेषु नव रामायणमाधृत्य। तत्र रामायणे वर्णितानां चरित्राणां काल्पनिकत्वनिरसनपूर्वकं वास्तविकत्वख्यापनपरे प्रथमे प्रबन्धे रामो वास्तविक इत्याख्ये ये विचारा निबन्धकारैः प्रसृतास्तेषां वास्तविकत्वे कः सन्देहः? वस्तुतः सम्प्रदाये सुस्थास्थानामस्माकं भारतीयानां रामस्य वास्तविकत्वे सन्देहो न स्यादेव। अथाप्यर्वाचीनानां केषाञ्चिदापातरमणीयानां युक्तीनां प्रतिपादनेन येषां बुद्धौ दोलाचलो भवति तेषां कृते एतैः प्रसृतो युक्त्यानायः ज्वरपीडिताय वैद्यतल्लजकृतोऽगद इव सुखकर इति निश्चप्रचं वक्तुमर्हामः। यद्यपि साम्प्रदायिकानां केषाञ्चिदत्र केचित्सन्देहा अवश्यं स्युः। 'राम ऋग्वेदकालिक' इति वदतो निबन्धकारस्य युक्तिर्नितरां रामस्यावास्तवत्वख्यापकानां मुखं भञ्जयेत्। निबन्धादिदमपि स्पष्टं प्रतिभाति यद्यथा रामायणस्य महाभारतस्य च प्रामाण्यं निबन्धकारैरङ्गीक्रियते न तथा पुराणानामिति। रामायणस्य विषये चास्माकं या दृष्टिस्ततः किञ्चित्परावृत्य निबन्धकारः रामायणविषयिणीं काञ्चिदपरां दृष्टिं ददाति - "रामस्य पितृवाक्यपालनं सीतायाः पातिव्रत्यं लक्ष्मणभरतयोर्भ्रातृभक्तिश्च।" इति।

द्वितीये प्रबन्धे रामायणस्य प्रसिद्धस्यैकस्य प्रकाशनस्य अल्पप्रसिद्धस्य चापरस्य प्राचीनस्य संस्करणस्य तुलां विदधातीति स्पष्टं निबन्धस्य शीर्षकादेव। तत्र च रामायणस्य संशोधितसंस्करणप्रकाशनस्येतिहासमपि लेशतः ज्ञास्यन्ति पाठकाः। सुन्दरेण कोष्ठकेन संशोधितप्रकाशन-प्राच्यप्रकाशनयोर्मध्ये श्लोकसङ्ख्याया विशेषान्प्रतिपादयन् बहूपकरोति शोधकर्तॄन्। उभयरामायणगतानां श्लोकानां वैशिष्ट्यान्यपि यथावत् प्रकाशयतो निबन्धकारस्य शोधदृष्टिः शोधश्रद्धा च स्फुटं प्रकाश्यते।

रामायणमहाभारतयोरुद्धृतयो रामकथयोस्तुलना तृतीयनिबन्धस्य विषयः। रामायणे रामस्य मानुषगुणानां वर्णनमेव मुख्यो विषय इति दृढं प्रतिपादयति राववर्यः। रामायणकथायाः सम्यगवबोधाय वाल्मीकिरामायणेन सहैव महाभारतीयरामोपाख्यानस्याप्यध्ययनं कर्तव्यमिति स्फुटैः शब्दैः प्रकाशयति निबन्धकारः।

रामायणकथाव्यक्तीनां वैविध्यमित्यस्मिन् प्रबन्धे रामायणीयानां व्यक्तीनां सद्गुणा यथायथं वर्णिताः। राक्षसानामपि काचित् सभ्यता आसीदिति सयुक्ति सुन्दरं प्रत्यपादि। यद्यपि तत्रैकं वाक्यं, 'वनागमनादेशं श्रुत्वा रामो मनसि खिन्न' इति रामयणीं कथामनुसरत्युत नेति सन्दिग्धे मनः।

लक्ष्मणस्य विवाहविषये उत्तमो विचार उपस्थापितः। लक्ष्मणस्य ऊर्मिलेति पत्नी बभूव तस्याश्च अङ्गदचन्द्रकेतू पुत्रौ बभूवतुरिति पुराणेभ्यो जानीमः। किन्तु जाकोबिमहोदयेन ये प्रश्नाः स्वग्रन्थे निर्दिष्टाः तेषामुत्तरदानाय प्रयत्नः कृतो निबन्धकारेण। निबन्धः सुन्दरः। युक्तिजालं पूर्वनिबन्धेष्विव दृढं न वर्तत इति भाति।

कलत्रपदं भार्यार्थकमुत नेति विचारयति ग्रन्थकारः अग्रिमे प्रबन्धे। उदाहरणानि यथायथं परिशील्य तेन कलत्रशब्दस्यार्थं सुष्ठु निश्चिनोति च।

रामायणस्योत्तरदेशीयपाठानामाकलनेन संशोधितप्रकाशने इतोऽपि कानिचित् संशोधनानि कर्तव्यानीति सयुक्तिकं प्रत्यपादि अग्रिमे प्रबन्धे।

रामायणस्य व्याख्यानं कुर्वद्भिः प्राचीनैः अर्वाचीनैश्च व्याख्यातृभिः कुत्र कुत्र स्खलितिराचरिता किं च तासां स्खलितीनां कारणं स्यादिति सुष्ठु विचार्यते अग्रिमे प्रबन्धे। तत्रार्वाचीनानामाधुनिकसामाजिकस्थितिमालम्ब्य रामादीनां दोषान्वेषणस्य यो दुष्प्रयासस्तस्य विरोधः कृतोऽस्ति।

पायसादेव रामादीनामुत्पत्तिः। तस्य च पायसस्य कीदृशो विभागो दशरथेन यज्ञगतैर्ज्येष्ठैर्वा कृत आसीदित्यत्र बहुविधानि मतानि विराजन्ते। तेषामुदाहरणपुरस्सरं तत्र मीमांसां कर्तुं कश्चिद्यत्नः कृतोऽस्ति पायसविभागाख्ये प्रबन्धे।

कर्णस्य विषये अल्पं जानद्भिरेव प्रायस्तस्य चरित्रविवरणे प्रयत्नपराः सन्तो बहूननर्थान् जनयन्ति बहुत्र। महाभारतस्य मुख्यतमचरित्रेषु कर्णः अन्यतमः। तस्य यावन्तः सद्गुणास्ततोऽधिका दुर्गुणा आसन्निति महाभारतपरिशीलनेन मम भाति। अथापि स महाभारतकथाया मुख्या चालिका शक्तिरिति तु निश्चप्रचं वक्तुं शक्यते। दुर्योधनस्य बहुषु दुष्कृत्येषु शकुनेरपेक्षयापि कर्णस्य प्ररोचना प्रमुखा आसीत्। तस्य अस्त्रपारङ्गमत्वे सत्यपि वीरत्वे सन्देहो वर्तत एव। बहुत्र सङ्गरेषु कर्णो युद्धभूमिं त्यक्त्वा पलायत इति महाभारते वर्ण्यते। यद्वा भवतु, महाभारतस्य विचारकैर्बहुभिः कर्णचरित्रस्यैकदेशमादाय तस्य विचारः कृतः। प्रकृतग्रन्थे कर्णाभिधे निबन्धे ततो भिन्नः कश्चन यत्नो दृश्यते। कर्णचरित्रविषये इतोऽपि गम्भीरः शोधो भवतु ततश्च इदानीमिवान्यान्यपि तथ्यानि प्रकाशितानि भवन्तु इति निबन्धकारः प्रार्थ्यते।

जगति बहुलतया चर्चितेषु चरित्रेषु द्रौपद्याश्चरित्रमन्यतमम्। तया सह कृतानामन्याय्यानां समीचीनं तथ्यसम्पूर्णं विवरणं प्रस्तौति निबन्धकारः द्रौपदीं प्रति केचन भ्रमाः इत्याख्ये निबन्धे। तद्विषयकाः केषाञ्चित् प्रचलितानां भ्रमाणामत्र प्रमाणपुरस्सरं

---

[१]समीक्षित ग्रन्थः-सीताहरणम् अन्याश्च रचनाः कदम्बकम्, ग्रन्थकारः-कालूरिहनुमन्तरावः, प्रकाशकः-लेखक एव, प्रथमसंस्करणम्-२०१२, मूल्यम् ₹ १२०/-, पुटाः-4+232, (1/8 डेम्मी)।

निवारणं क्रियते।

श्रीमद्भगवद्गीतायाम् अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितमिति श्लोकस्य किं तात्पर्यं, कुतो दुर्योधनस्य मनसि प्रतिभाति यत् तदीयं बलम् अपर्याप्तं पाण्डवानां च बलं पर्याप्तमिति। कथं व्याख्यातारः अस्य श्लोकस्य व्याख्यानं कुर्वन्ति कश्च व्याख्यानक्रमः अत्र आस्थेयो भवतीत्यादिकं सर्वं कतरः श्लोकार्थ इति प्रबन्धे विचार्यते।

केषाञ्चित् शब्दानां प्रयोगविषये जनाः प्राय एव भ्राम्यन्ति। भूतकालिकलकाराणां त्रयाणां विषये एवमेव भ्रमः प्रचलति। सम्प्रति लुङो लिटश्च प्रयोगे काठिन्यमनुभवद्भिः प्रायः क्तवत्वादिप्रत्यया एवाश्रियन्ते। ये च लुङादीनां प्रयोगं कुर्वन्ति तैश्च को नियम आस्थेय इति विषये, एवं भविष्यत्कालिकलकारयोः लुट्-लृटोर्विषये को नियमः, उभयपदिधातुषु कदा आत्मनेपदप्रयोगः कदा च परस्मैपदप्रयोगः, त्वद्भवच्छब्दयोः प्रयोगे को नियमः, सर्वनाम्नां प्रयोगे को नियम इत्यादीन् कांश्चन विषयान् सुष्ठु उदाहरणादिपुरस्सरं प्रकाशयता निबन्धकारेण उपकृताः सामान्यतया संस्कृतभाषाप्रयोगशीलाः। तत्र हि वैयाकरणानामवैयाकरणानां च कृते प्रयोगविज्ञानं सुष्ठु प्रतिपादितम्।

कन्याशब्दस्य प्रयोगः कदा करणीयः? कश्च कन्येति शब्दस्यार्थः? कश्च भेदः कन्या-कुमार्योश्च। वृद्धकुमारी भवेन्न तु वृद्धकन्येति सुष्ठु निरूप्यते शास्त्रप्रमाणोदाहरणपुरस्सरम्। सोत्साहं पठनीयोऽयं सर्वैरिति भावये। शीर्षकमस्ति निबन्धस्य कन्याशब्दार्थः इति।

काश्मीरदेशवास्तव्यस्य भल्लटकवेः उपदेशप्रचुरं शतकं लोके बहुलतया प्रचारितं नास्ति। किन्तु काव्यस्य सौन्दर्यमुपदेशपरिपूर्णत्वञ्च कस्यापि सहृदयस्य हृदयाह्लादजनकं भवेदित्यत्र नास्ति संशीतिलेशः। अन्यापदेशशतकमिति काव्ये कविः अर्थान्तरन्यासेन बहून् उपदेशानवर्णयत्। प्रतिश्लोकमेव व्यञ्जना काव्यस्योत्तमकाव्यत्वे निदानं भवति। अस्य काव्यस्य सुष्ठु समीक्षणं कृतवते निबन्धकाराय धन्यवादा अर्प्यन्ते।

संस्कृतसाहित्य हास्यरसस्य नास्ति नैयून्यम्। तत्रापि केषुचिदल्पख्यातेषु सुख्यातेषु च काव्येषु हास्यरसस्य प्रयोगानुदाहरणपुरस्सरं विवृणोति निबन्धकारः। सुन्दरोऽयं निबन्धः।

अग्रिमे प्रबन्धे कश्चिद्बहुचर्चितो विषयश्चर्च्यते। सामाजिकप्रगतौ साहित्यस्यास्ति महद्योगदानम्। किन्तु अद्यत्वे समाजः साहित्यमनुसरति, साहित्यं वा समाजोऽनुसरतीति निश्चप्रचं वक्तुं न शक्नुमः। साहित्यिकैः बहु विचिन्त्य साहित्यं क्रियते। काव्यालापांश्च वर्जयेदिति शास्त्रनिषेधे सत्यपि साहित्यस्य निर्माणमनुमन्यमानानामृषीणां तु साहित्यं शिवेतरक्षतये इत्येव मतमासीत्। प्राचीनीनामयमेवाभिप्रायः सर्वदापि प्रासङ्गिकतामावहति। किन्तु किमद्यत्वे साहित्यिकैः मनसि निधाय साहित्यं क्रियते, कश्च साहित्ये देशकालादिनिर्बन्धः इत्यादीन् गम्भीरान् विषयान् चर्चमानो निबन्धकारः साहित्यविषये नवीनामेव दृष्टिं करोति।

अन्तिमे निबन्धे लियोटोलस्टोयवर्यस्य प्रख्यातस्य कथाकारस्य जीवनं कृतिश्च विचार्यते।

ग्रन्थस्याग्रिमो भागो भवति मध्यमणिः। सीताहरणमिति नाटकम्। नाटके सम्पूर्णा रामायणी कथा विव्रियते। रामायणीं कथामाश्रित्य कृतानि नाटकानि नाल्पीयांसि। अथापि सीताहरणं तेषु नूनं पदं करिष्यतीत्यत्र नास्ति संशयलेशः। नाटकेऽस्मिन् द्वात्रिंशत्पुरुषपात्राणि, नव स्त्रीपात्राणि च सन्ति। रावणेन सीताया हरणादारभ्य सीतोद्धारपर्यन्ता कथा नाटकस्य विषयः। पञ्चस्वङ्केषु निबद्धमिदं नाटकं रामायणीयं कथावस्तु यथावन्नानुस्त्रियते। नाटकमधीत्यैव तज्जानन्तु पाठका इति, नाटकमिदं स्वयमेव समीक्षणार्हः नास्य निबन्धस्यांशत्वेन नाटकस्य समीक्षां कर्तुं मन उत्सहते इति च नाटकमिदमसमीक्षितं त्यजामीति क्षमां याचे नाटककारम्। अपरस्मिन् निबन्धे नाटकं समीक्ष्यत इति प्रतिजाने च।

अथ कथाः। प्रथमा कथा कैकेयीनिर्वेदमिति दशरथस्य मरणात्परं कैकेय्या मनःस्थितिं वर्णयति। यावता कालेन कथा पठितुं शक्यते तावत्कालं यावत्कैकेय्याश्चिन्तनमेव कथायां वर्ण्यते। सुन्दरी कथा। अवश्यम्पाठ्या।

आधुनिकाः कवयो यथा गद्यकविता लिखन्ति तथैव कथां लिखति कथाकारः। रोगपीडितः कश्चिन्मध्यवित्तः पुरुषः वैद्यालये स्थितो मरणमाशङ्कमानः मरणात्परं तस्य कुटुम्बस्य का गतिर्भवेदिति विचारयन् सामान्यमध्यवित्तानामन्तस्स्थवेदनां सुष्ठु प्रकटयति कथामाध्यमेन। लेखनशैली कथाकारस्य स्वकीया मोदावहा चास्ति।

तृतीयायां कथायामुमाया अन्तिमाभिलाषस्यान्तो वर्णितः। कथान्तु कतासरित्पाठका अपठन्नेव पूर्वम्। प्रयोगकौशलं, कथारचनकौशलं च कथाकारस्य पुनर्वक्तव्यं नास्त्येव।

शीर्षकारहिता कथा शेषम्माया जीवनं विवृणोति। रामावधानिनश्च कथायामस्यां शताब्द्याः पूर्वतनी आन्ध्रप्रदेशस्य सामाजिकी स्थितिः कियता परिमाणेन ज्ञायते पाठकैः।

दरिद्रायाः सुभद्राया अल्पीयसा यत्नेन धनं सङ्ग्रहीतुं गताया दुर्गतिरत्र वर्णिता। समाजस्याधोगतिरपि अस्यां कथायां वर्ण्यते।

ग्रन्थस्यान्तिमे पाठकानां पाठसौविध्यार्थमनुबन्धः कश्चिद्योजितः। अनेन ग्रन्थस्य पाठे पाठकानां सौविध्यं नूनं स्यात्। बहूनां शब्दानां तात्पर्यमत्र वर्णितम्।

ग्रन्थे अक्षरसंयोजना इतोऽपि सुष्ठु भवेच्चेत् सुन्दरं भवेदिति भाव्यते।

☆ ☆ ☆

# अच्युतानन्दकथासाहित्यम्[1]

(अच्युतानन्ददाशकृतकथासङ्ग्रहस्य समीक्षा)

**भूमिका–** आचार्यः अच्युतानन्ददाशः १९६० तमे ईशवीयसंवत्सरे मेमासस्य विंशे दिने स्वजनुषा समेधितवान् उत्कलभुवम्। तिरुपतौ केन्द्रीयसंस्कृतविद्यापीठे अद्वैतवेदान्ते शास्त्रि-उपाधिमधिगतवद्भिरेभिः व्याकरणे पालिभाषायां च आचार्योपाधिरप्यधिगतः पुणेविश्वविद्यालयात्। एतैः कारकतत्त्वमाश्रित्य शोधं कुर्वाणैः एम्.फिल्.-उपाधिरपि प्राप्तः। तथा च भवानन्दतर्कवागीशस्य कारकचक्रे शोधं कुर्वद्भिरेभिः १९८७तमे ईशवीयाब्दे विद्यावारिधिरप्यधिगतः।

ततः पुणेनगरे एव शोधकार्ये रता इमे १९९०तमे ईशवीयाब्दे मध्यप्रदेशस्य सागरविश्वविद्यालये संस्कृतविभागे अध्यापनकर्मणि नियोजिताः। जीवनस्यान्तिमं दिनं यावदेभिस्तत्रैव सेवा विहिता।

तन्मध्ये एभिः यू.के., फ्रान्स, मङ्गोलिया, अमेरिका इत्यादिषु राष्ट्रेषु व्याख्यानादिकम् अददुरिमे। मङ्गोलियाराष्ट्रियविश्वविद्यालये एते संस्कृतविभागे संस्थापकाध्यापकरूपेण कार्यमकार्षुः।

एतैः बहवो ग्रन्थाः सम्पादिताः। तेषु सप्तटीकोपेतः व्युत्पत्तिवादः, विवेकार्थप्रकाशिका इत्यादयः प्रसिद्धाः। बहून् शोधप्रकल्पान् एते समापितवन्तः।

बहूनां ग्रन्थानां कृते ई-शास्त्रनिर्माणमेषामपरं मुख्यं कार्यम्। एभिः नाट्यशास्त्रस्य, अभिनवसरस्वत्याः, न्यायसूत्राणां, तर्कसङ्ग्रहस्य अन्येषां च ग्रन्थानाम् ई-शास्त्रं विनिर्मितम्।

आधुनिकसंस्कृतकथासाहित्यस्य संवर्धनाय भगीरथकल्पैरेभिः कथासरिन्नाम्नी पत्रिकासुरधुनी प्राकट्यमानीता २००५तमे ईशवीयाब्दे। सा पत्रिका सम्प्रत्यपि आधुनिकसंस्कृतकथासाहित्यं समेधयन्ती प्रवहति।

एतेषामाचार्याणां कथासाहित्यं सङ्ख्या महत्त्वं नैव भजते। एतावता तैः प्रणीतानां कथानामेकः सङ्ग्रहः श्रीमता नारायणदाशेन सम्पादितः संस्कृतभारत्या प्राकट्यमानीतः। तस्य च सङ्ग्रहस्य अच्युतानन्दकथासाहित्यमित्यभिख्या। तत्र तैः प्रणीतः कश्चित् प्रबन्धः षट् कथाश्च पञ्चाशति पुटेषु विधृताः।

कथासाहित्ये अच्युतानन्ददाशस्य भागग्राहः - साहित्यसंस्कृत्यादिक्षेत्रेषु कस्यचिज्जनस्य योगदानमुभयथा भवितुमर्हति। कृतिसंयोजनेन नवदृष्टिदानेन च। यथा आलङ्कारिकाः प्रस्थानकर्तार आचार्याः काव्यानि नासृजन्, किन्तु नवीनाया दृष्टेः प्रसारणेन महदुपाकुर्वन् वाङ्मयविश्वम्। एवञ्च कवयः तदनुसारिभिः काव्यैः संवर्धयामासुर्वाङ्मयभाण्डारम्। आचार्या अच्युतानन्ददाशवर्यास्तु आधुनिककथासाहित्यमुभयथोपाकुर्वन् - नवदृष्टिदानेन कृतिसर्जनेन च। कथासाहित्यविषये एतेषां कथासाहित्यं सङ्ख्या महत्त्वं न भजते। यथा प्रत्यपादि पूर्वमेव यदेषामेक एव कथासङ्ग्रहः षड्भिः कथाभिरलङ्कृतः लोकलोचनपथमधितिष्ठत इति। अकाले ऐहलौकिकं शरीरं यदि तैः नात्यक्ष्यत तर्हि न जाने एतेषां कतिभिर्वा कृतिभिः कथं संवर्धितः स्याद् गीर्वाणवाणीवाङ्मय एभिर्महानुभावैः।

नवदृष्टिदानम् - यथा पूर्वं प्रतिज्ञातम्, आचार्यैः कृतिसंयोजनेन नवदृष्टिदानेन इत्युभयथाऽपि वाङ्मयः समेधितः इति। आचार्यैः २००३ तमस्य ईसवीयवर्षस्य सेप्टेम्बरमासस्य सप्तमाष्टमदिनाङ्कयोः सागरविश्वविद्यालयस्य संस्कृतविभागेन आधुनिकसंस्कृतगद्यसाहित्यमिति शीर्षकेण आयोजितायां शोधसङ्गोष्ठ्यां प्रास्ताविकभाषणं प्रदत्तम् आसीत्। तत्र प्रणिधानयोग्यं वाक्यम् एकम् उदाजिहीर्षामि "गद्यं नाम वाचः सार्वजनीनं व्यावहारिकं रूपं चिराद् वरीवर्ति। प्रवृत्तिनिवृत्त्यौपयिकतया यां वाचं लोकः प्रयुङ्क्ते, या च वाक् शिष्टजनव्यवहारस्य शिष्टाचारपरम्पराया वा धुरं धत्ते, या वाक् पश्यन्त्यात्मना व्यक्तित्वं निर्माति, या च मध्यमात्मा विचारवैभवं बिभर्ति, या च वैखरीरूपात्मना लोकचरित्रं प्रख्यापयन्ती वाक्प्रतिष्ठं जनं विधत्ते सा गद्यात्मिकैवेति नास्ति संशीतिलेशोऽपि। गद्यात्मिकां सर्वजनमनोगतामेतां वाचं लोकनियन्त्रिकां को नु न वेद।"

अथापि संस्कृतसाहित्ये गद्यसाहित्यस्य नैयून्येन नूनं दूयते संस्कृतप्रेमिणां हृदयम्। नापि गद्यसर्जने उत्साहोऽपि तथा दृश्यते संस्कृतज्ञेषु यथा दृश्यते पद्यसाहित्यसर्जनोत्साहः। तत्र पद्येन यशःप्राप्तिः सुकरा। छन्दोबद्धतया निर्मितं पद्यं कदाचित् चमत्कृतिरहिता कदाचिद्दोषदुष्टाऽपि च्छन्दोमार्गगामिनी स्वदोषान् छादयन्ती तात्कालिकमपि कल्पयति स्वस्थलं पाठकहृदये। किन्तु गद्यं पदेषु लेशमात्रं स्खलितमपि वैरस्यकारक भवतीति "गद्यं कवीनां निकषं वदन्ति" इति अभियुक्तोक्तिः। दाशवर्यस्तु स्वभाषया इदमेव सुन्दरतरं प्रतिपादयति, "मम त्वित्थं भाति यद् रेलमार्गगामिनीव कविताकामिनी च्छन्दोमार्गगामिनी द्रुतं तत्प्रणेतारं यशोराशिभिरासिञ्चन्ती स्वलक्ष्यस्थलं प्रापयति। किन्तु मध्यदेशे प्रशस्ततरं मार्गमन्विषन्ती लोकवाहिनीव नैकविघ्नशङ्किनी स्वैरं प्रयाति गद्यरचना। काले एव कविः स्वलक्ष्यस्थलमधिगच्छति वा न वा को नु वेद।"

तस्मादेव धनपालेनोक्तं, "व्याघ्रादिव समाघ्रातो गद्याद्व्यावर्तते जनः" इति। एवमाधुनिकानां गद्याद् व्यावर्तमानानां गद्यं तृणाय मन्यमानानां पण्डितम्मन्यानां च मोहमपनोदयता दाशवर्येण संस्कृते गद्यासाहित्यस्य महत्याः परम्परायाः अल्पीयसि परिसरे समाकलनं कुर्वता गद्यसाहित्यसर्जने सर्वेषाम् अभिमानं वर्धयितुं सुष्ठु यत्नः कृतः।

एवञ्च अद्यत्वे नीडायितविश्वस्य धारणा यदा समग्रं वैश्विकसमाजं प्रभावयन्ती दृश्यते तदा इतरभाषासाहित्यस्य पुरतः संस्कृतसाहित्यस्य स्थानं कल्पयितुं कथासाहित्यस्य विस्तारस्य विकल्पः कोऽपि नास्तीति तु निश्चप्रचम्। किन्तु समकालमेव

---

[1]समीक्षितग्रन्थः-अच्युतानन्दकथासाहित्यम् (संस्कृतकथानां सङ्ग्रहः), ग्रन्थकारः-अच्युतानन्ददाशः, सम्पादकः-नारायणदाशः, प्रकाशिका-संस्कृतभारती, नवदेहली, प्रथमसंस्करणम् - २०११, मूल्यम् ३०/-, पुटाः-८+४६ (१/८ डेम्मी)।

एतदपि विचार्यं यदिदानीन्तन वैश्विकसाहित्यस्य गतौ नास्ति कोऽपि नियामकः यथाऽऽसीत्पुरा कवीनां पुरस्तात्। एतदत्यन्तं स्पष्टं यद् यद्यपि भगवता मम्मटेन कवेर्नियतिकृतनियमराहित्यं प्रत्यपादि किन्तु तादृशालङ्कारशास्त्रप्रतिपादकस्य ग्रन्थस्य प्रणयनं कुर्वद्भिरेभिराचार्यैः कवेः पूर्णस्वातन्त्र्यं नैवेष्टमासीत्। तदेव प्रस्थानाचार्याणां शास्त्रग्रन्थप्रणीतेः सार्थक्यम्। कविना केचन नियमा अवश्यम्पाल्या आसन्नेव। अत एव संस्कृतनाट्यपरम्परायां दुःखपरिणामि नाटकमेकमपि न दृश्यते। कवयो निरङ्कुशा अपि शास्त्रमुल्लङ्घ्य स्वकृतीः नासृजन्। इदं संस्कृतसाहित्यस्य उत्कर्षाय अपकर्षाय वा कल्प्येतेति तु विवादास्पदम्। किन्तु इदं सत्यं निराकर्तुमशक्यं यत्संस्कृतसाहित्यमेव तादृशं साहित्यं यत्र लक्ष्याणि लक्षणमनुसृत्य सृष्टानि। अन्यत्र तु लक्ष्याण्यनुसृत्य लक्षणग्रन्थाः सृष्टाः। इदानीं प्रश्नोऽयं समुपतिष्ठते यत्, किमिदानीं साहित्यसर्जकैरिमे नियमाः पालनीया उत न, विशेषतः संस्कृतसाहित्यनिर्माणप्रसङ्गे? विपश्चिदपश्चिमानां विदितमेवैतद्यद् वैश्विकसाहित्ये ईदृशेषु नियमेषु न काऽपि श्रद्धा आस्थीयते। न केवलमेतावत्, ईदृशनियमेषु श्रद्धा साहित्यस्य विकाशे अन्तरायायते। कालकवलिताः वैदेशिकानुसरणतत्परा भारतीयसाहित्यिका अपि प्राचीनपरम्परासु हृतश्रद्धाः सम्प्रति ते इव साहित्ये स्वैराचारपरायणा दृश्यन्ते। अस्य क्रमस्य च समर्थका एव प्रायः आधुनिका दृश्यन्ते। किन्तु आश्चर्यमिदमस्ति यद् आचार्याः दाशवर्याः विचारेण पूर्णतः साम्प्रतिका अपि वस्तुविवेकं न व्यस्मरन्। तेषामिदं वचः सर्वदा स्मार्यम्, "इतरभाषानुसरणपरायणाः केचन संस्कृतभाषायामपि तथाविधाः कथाः विरचयन्ति याः मन उद्वेजकारिण्यः भवन्ति। भाषा-साहित्य-दृष्ट्या अयं नवोपक्रमः अभिनन्दनीयः स्यादपि, किन्तु तत्र कविमर्यादायाः लोकमर्यदायाश्च उल्लङ्घनं यथा न स्यात् तथा दृष्टिर्देया।"

अस्मिन्नेव प्रबन्धे तैः केचन प्रश्नाः उत्थापिता येषां प्रश्नानामुत्तरमद्यापि सुदुर्लभमवतिष्ठते। इत्थमेषामाचार्याणां कथासाहित्यविषयिणी नवीना दृष्टिः उपस्थापिता यया दृष्टिमन्तो भवेयुः कथासर्जकाः।

**कृतियोजनम्–** आचार्यस्य कृतयोऽपि वैशिष्ट्यानि बहूनि बिभ्रति। कथासाहित्यस्यय प्रवर्धनाय स्वेनैव प्रतिष्ठितायां कथासरित्पत्रिकायामेषां कथाः प्रकाशिताः। तत्र आचार्याणां षट् कथाः प्रकाशिताः। आसु द्वे लघुकथे, द्वे टुप्कथे, काचन अनूदितलोककथा, काचन अनूदिता टल्स्टयवर्येण विलिखिता कथा च प्राकाश्यं गताः।

**लघुकथे–** एषां लघुकथाद्वयस्यापि मुख्यं वैशिष्ट्यमस्ति यदुभे अपि कथे पशून् अधिकृत्य। मनुष्यस्य भूमिकाऽत्र कथयोरनुघटकत्वेनैव। उभयोरपि कथयोः कथनशैली अपूर्वा।

**शुकसंविद्–** शुकसंविदिति कथायां श्रीविद्या काचन प्रवासिनी भारतीया स्त्री या संस्कृतेन भाषितुमशिक्षत। तस्याः एव स्नेहिता देवश्रीः। देवश्रियाः पिता, देवश्रीः, श्रीविद्या च क्वचिदाश्रमपदं गच्छन्ति कस्यचन महापुरुषस्य साधकस्य दर्शनं प्राप्य आशीर्वादान् प्राप्तुम्। तत्र गत्वा श्रीविद्यया महाराजात् कञ्चन शुकं प्राप्नोत्। अयं शुकः न सामान्य इति संसूच्य महाराजः श्रीविद्यामाशीर्भिरभिनन्दति। श्रीविद्या तं शुकमामेरिकादेशं नयति। यस्मिन् दिने शुकः आमेरिकां प्राप्नोति तद्दिनं भवति सेप्टेम्बरमासस्य एकादशः - तदेव अभिशप्तं दिनम्।

शुकस्तु असामान्यः आमेरिकामागम्य एव श्रीविद्यां सूचयति आगामिनीं विपदं "रक्षो वैमानिकः" इति वाक्यं वदन्। किन्तु किमाबाल्यमामेरिकामधितिष्ठमाना भारतीयसाधनसम्पद्विषये हृतश्रद्धा श्रीविद्या शुकस्य संविदमवगन्तुं शक्ष्यति, शुकस्य सङ्केतं ज्ञात्वा रक्षितुं शक्ष्यति स्वामागामिविपदः इति पाठकाः पठित्वा जानन्तु।

कथायामस्यां वर्तते किञ्चिद्रहस्यं यत् श्रीविद्यया एव उद्घाटयति अन्ते कथाकारः। किन्तु तद्विहायापि कथायां स्वल्पीयसि परिसरे देवश्रियाः, श्रीविद्यायाः, देवश्रियाः पितुः, कल्याणात्मपादस्वामिनां च चरितं काभिश्चिद्घटनाभिः आपाततः महत्त्वहीनाभिः सुष्ठु प्रत्यपादि। स्फुटशब्दैः सन्त्रासवादस्य निन्दनमकुर्वन्नऽप्याचार्य एकस्य दृश्यस्य वर्णनमात्रेण सन्त्रासवादस्य भीतिदेन चित्रेण पाठकानां विवेकमाहन्ति।

कथायां प्रवृत्तो वार्तालापः अत्यन्तमनोहरः। भाषा नातिसरला नातिजटिला मनोहरा च। कथायां चरित्राणां नामानि स्थानानि च साम्प्रतिकसमाजस्य सुष्ठु प्रातिनिध्यं वहति।

**मा गामनागाम्–** वैदिकमन्त्रभागमेव कथायाः शीर्षकं कुर्वन्नाचार्यः कथया कमपि विशिष्टं सन्देशं दातुमिच्छति। कथायाः शैली विचित्रा। आधुनिकनगरीषु वसद्भिः कृतेन परिवेशस्य दूषणेन पीडिता भोज्यलाभार्थमश्रुभिः परिप्लुता काचिद् गौरात्मकथां श्रावयति। सा एव इयं कथा। कथायामियं धेनुः कैश्चिन्नीतिरहितैः पीड्यमाना कैश्चिच्च सम्प्रदायेषु बद्धश्रद्धैः कदाचित् सेव्यमाना च कथञ्चिदात्मनो जीवितस्य रक्षायै प्रयतते भृशम्। स्वमातुः दुर्गतिं दृष्टवत्या अनया जगतः बहूनि मुखानि भृशं परिलक्षितानि। मन्दिरपरिसरेषु अनाहूतप्रविशन्त्याः तस्याः लगुडहस्तेन ताडनं कुर्वतां भक्तम्मन्यानां मुखानि, श्याली गोमाता इति निरीहं जीवं दुर्वचनैर्विध्यतां मुखानि च यथा लक्षितानि तथैव शुष्कशरीरायाः मालिन्यावलिप्तशरीराया अपि तस्या जलेन पादं प्रक्षालयन्त्याः तिलकैः भालं लिम्पन्त्याः तस्यै स्वादुसुपक्वभोजनप्रदात्र्याः श्रद्धानायाः मुखमपि दृष्टम्। गोर्दिव्यत्वे पौराणिकं किमपि रहस्यं गोर्मुखात् प्रतिपादयत्याचार्यः "मनुष्यलोक-गोलोकयोः मध्ये अस्ति कश्चन दिव्य-संबन्धः। अत एव मन्ये परमेष्ठिलोकादुपरि वर्तमानं परब्रह्मणः लोकं गोलोकनाम्ना जनाः व्यवहरन्ति। गोलोकस्य स्वामी गोपालकः। गोलोकप्राप्तिरेव मनुष्यलोकस्य परम् अभीप्सितम्। अत एव वयमपि मनुष्यसंसर्गं विना जीवनं निरर्थकं मन्यामहे। ये नाम अस्मत्कुलीनाः मनुष्यलोकसंसर्गे निवसन्ति तेषां जन्म सफलं निरापदं च चिन्तयामः।" पूर्वं जन्तवः यस्मिन् देशे भूतवल्यादिभिः पाल्यन्ते स्म, यत्र वृक्षलतानद्यादयः प्रपूज्यन्ते

स्म नित्यं, यत्र गोः सम्पूजनेन दिनमारम्भयन्ति स्माग्निहोत्रिणः तस्मिन्नेव देशे सभ्यताया नाम्ना प्रगतेश्च नाम्ना परिवेशस्य दूषणं कुर्वताम्, आत्मनः मूल्यबोधराहित्यं सम्पादयतां, स्वार्थनिमग्नानां जनानां विवेकरहिततया भविष्यतः स्वापत्यस्यापि जीवितस्य विपदमाकारयतामविमृश्यकारितायाः कारणात् काचिद्गोमाता प्लाष्टिक्-भक्षणेन आसन्नमरणा ध्वनिवर्धकयन्त्रमहिम्ना निशमति मन्दिरे उच्चारितं वैदिकं मन्त्रं - "मा गामनागाम्" इति। ऋजुवर्णनं, कौटिल्यराहित्यं चास्याः कथाया अपूर्वं वैशिष्ट्यम्। कथावस्तुनि चमत्कृतिप्रदायकानां कौटिल्यानामभावेऽपि कथाया काचनाद्भुता गतिरस्ति यया आन्तं कथापठनस्योत्साहे न किञ्चन नैयून्यं जायते पाठकस्य।

**टुप्कथे–** कथारचनं यथा टुप्कथारचनं तु ततोऽपि सुदुष्करतरम्। जगति अङ्गुलिगण्या एव कथाकाराः सन्ति ये टुप्कथारचनेन ख्यातिमध्यगुः। रवीन्द्रनाथादयो द्वित्रा एव कथाकाराः सार्थकटुप्कथामारचयाम्बभूवुः। अच्युतानन्ददाशवर्यास्तु टुप्कथारचने स्वपाटवं प्रादर्शयन्। आचार्यस्योभयोरपि टुप्कथयोरस्त्याधुनिकसमाजस्य नैराश्यस्य नग्नप्रदर्शनम्।

**कपालपाणिः–** उपपञ्चदशैर्वाक्यैः कथेयं निबद्धा। सर्वविधान् उपाधीन् समधिगतः परिणीतः कश्चित् कन्याजनकः प्रकाशयत्यात्मनो नैराश्यम्।

"बुभुक्षापि लज्जते मामभिभवितुमद्य। किशोर्यामपि जरतीव करुणं प्रेक्षते मां कन्या, नाम्ना कमनीया। रोगाक्रान्तायास्तस्याः नास्त्यौषधं नो वा पथ्यम्। पत्नी तु चिरादेव दिवं गता आवयोः स्थानं कल्पयितुं तत्र।" नैराश्येन तस्य दक्षकरतलः स्वकपालादन्यत्र न गच्छति, तस्मात्स आत्मानं कपालपाणिरहम् इति आक्रोशति।

यथा उद्योगहीनतायाः समस्या कथमस्मद्देशमभिभवतीति सुष्ठु चित्रितं कथायामस्यां तथैव प्राप्तोपाधीनां यूनामन्यत्रोद्योगलाभमनपेक्ष्य स्वयमुद्योगकल्पनासामर्थ्यमुत अद्यतनीनशिक्षायां तादृशसामर्थ्यकल्पनशक्त्यभावश्च भृशं द्योतितः।

**शीर्णं पाटलदलम्–** इयं कथापि आकृत्या पूर्वतन्या कथया सादृश्यं भजते। काचन प्रोषितभर्तृका पत्युः प्रत्यावर्तनाशया रेलनिस्थाने प्रतीक्षते स्वपुत्र्या। पुत्र्यास्तु विद्यालये अनुष्ठानं किमपि वर्तते। पुत्री तदर्थं प्रतीक्षते। किन्तु सा जानाति मातुर्हृद्गतां व्यथाम्। अतः "मध्ये सुभद्रा, सप्तवर्षदेशीया तनया मामपृच्छत् - पितरं ननु पत्रं लिखसि?"

साम्प्रतिके काले सामयिकमोहगर्ते पतितानां यूनां युवतीनां च प्रेमनामकभीषणरज्ज्वा आकर्षणेन अपरिणामदर्शि यदाचरणं तस्य कुफलं, सरलहृदयानां हृदयभञ्जकानां वञ्चकानां च दुष्कृत्यं च सुवर्णितमस्यां कथायामतीव मर्मस्पर्शितया।

**पुनरुक्तलोककथा–** आचार्यैः काचन लोककथा पुनरुक्ता। इयं लोककथा मङ्गोलियादेशीया। मङ्गोलियादेशे सप्तर्षिमण्डलस्योत्पत्तिमाश्रित्य या कथा प्रचलति तस्याः कथायाः सुष्ठु पुनरुक्तिरियम्। वैशिष्ट्यं तु अस्याः एवमस्ति यत्, पुनरुक्तकथायां मङ्गोलियादेशस्य संस्कृतिः सम्यक् प्रत्यपादि।

अनूदितकथा - लेवटॉल्स्टायवर्येण नरस्य लोलुप्त्वस्य कुफलप्रदर्शनपरा कथा काचन लिखिता। इयं कथा पूर्वमप्यनूदिता भगीरथप्रसादत्रिपाठिभिः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य अनुसन्धान-संस्थाया भूतपूर्वनिदेशकैः या चौखम्बाविद्याभवनात् प्रकाशिता १९७० तमे ईशवीयाब्दे। किन्तु अनेनानुवादेन सम्प्रति कृतस्यानुवादस्य वर्तते सुमहान् भेदः। अस्मिन्ननुवादे पूर्वतनानुवादापेक्षया भाषासारल्यं विशिष्टम्। तथैव पूर्वतनानुवादे पात्राणां नामानि संस्कृतीकृतानि। किन्तु प्रकृतानुवादे पात्राणां नामादिकं मूलान्न विशिष्यते।

**उपसंहारः–** इत्थमाचार्यस्य अच्युतानन्ददाशवर्यस्य संस्कृतकथा-साहित्ये भागग्रहणमतिविशिष्टमिति अलं बहुना।

☆ ☆ ☆

# श्रीरामकृष्णदर्शने वेदान्तत्रयसमन्वयः

(वेदान्तमधिकृत्य समायोजितायां राष्ट्रियविचारगोष्ठ्यां प्रस्तुतं समापनभाषणम्)

ध्यानाभ्यासवशीकृतेन मनसा तन्निर्गुणं निष्क्रियं
ज्योतिः किञ्चन योगिनो यदि परं पश्यन्ति पश्यन्तु ते।
अस्माकं तु तदेव लोचनचमत्काराय भूयाच्चिरं
कालिन्दीपुलिनोदरे यन्नीलं महो धावति॥[१]

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्महृदा य आदिकवये मुह्यन्ति यत्सूरयः।
तेजोवारिमृदां यदा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि॥[२]

तव कथामृतं तप्तजीवनं कविभिरीरितं कल्मषापहम्।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ये भूरिदा जनाः॥[३]

भारतधरणीरियम् अवतारसूः। अत्रैव रामश्यामादयो लोकशिक्षायै भृशं विचित्रास्तनूरधुः। अस्यामेव भूमौ प्रपञ्चहितकारि श्रुतिजातं तस्य महतो महीयसो निःश्वासभूतं सत्यद्रष्टृणामृषीणां ज्ञानविषयः बभूव।

तत्र श्रुतौ जनिमृतिचक्रस्य अविद्याहेतुकस्य तरणाय उपदेशाः कृताः। भगवत्यां श्रुतौ सर्वदुःखप्रशमनाय ये उपदेशा आम्नातास्तेषां सङ्ग्रहणं व्याख्यानञ्च भगवता बादरायणेन ब्रह्मसूत्र-पुराणेतिहासादिभिरकारि। श्रुत्यादिषूक्ता अर्थाः कथं पालनीया आचरणीया इति स्मृतिपुराणादिषूपवर्णिता विविधाभिः कथाभिः युक्तिभिश्च।

कालक्रमेण लोकस्य क्षीयमाणां मेधां विलोक्य श्रुतिसूत्रादीनामर्था आचार्यैः लोकोपकाराय स्वस्वधिया व्याख्याताः। एवं वेदान्तस्य अद्वैत-विशिष्टाद्वैत-द्वैत-शुद्धाद्वैत-द्वैताद्वैत-अचिन्त्यभेदाभेदादयो नानापक्षाः सम्भूताः। तत्तन्मतीया विद्वांसः परपक्षखण्डनपुरस्सरं स्वमतं प्रतिष्ठापयामासुः।

क्रमेण कश्चित्काल इत्थं समागतो यदा पण्डिताः केचन तत्तदाचार्याणां मतान्यालम्ब्य विचारसर्वस्वान् वादान् कुर्वाणा लौकिकानां दृष्टौ वेदवेदान्तादिशास्त्राणाम् आचारप्राधान्यं नाशयन्तः विचारमात्रप्राधान्यं प्रतिष्ठापयामासुः।

किन्तु वस्तुतस्तु शास्त्राणि किंस्वरूपाणि भवन्ति इति चेत् शास्त्राणि अस्माकम् इतिहासरूपाणि सिन्ति इति मे स्फूर्तिः। इतिहासो नाम कासाञ्चिद् व्यक्तीनां घटनानां वा समूहमात्ररूपो न भवति। अपि तु अवरजानां मार्गदर्शनाय पूर्वजैरनुभूतानां तत्त्वानां यथार्थविवरणमेव इतिहासः।

इत्थमेव श्रुतिः सर्वापि अखण्डा सर्वब्रह्माण्ड-कल्पादिष्वपि अभिन्ना अभ्युदयनिश्श्रेयसप्राप्त्युपायभूता सत्यद्रष्टृणां साधकानाम् अनुभवपथमारूढानां तत्त्वानां वाचा प्रकटीकृतं रूपम्। एतदर्थमेव च आगमप्रामाण्यस्य पारम्यं शास्त्रकारैः भृशं प्रत्यपादि महतैव कण्ठघोषेण। भर्तृहरिचरणानां वचनम्–

चैतन्यमिव यश्चायमविच्छेदेन वर्तते।
आगमस्तमुपासीनो हेतुवादैर्न बाध्यते॥[४]

एवञ्च शास्त्रं किम्प्रयोजनम्–

इदं पुण्यमिदं पापमित्यतस्मिन् पदद्वये।
आचाण्डालं मनुष्याणां समं शास्त्रप्रयोजनम्॥[५]

अर्थाद् आचरणे शास्त्रं प्रमाणम्। अन्यथा सर्वशास्त्रवैयर्थ्यप्रसङ्गः। अत्र श्रीरामकृष्णकथामृतस्य कश्चित् प्रसङ्गः उल्लेख्यः। कश्चित् पाषण्डी दुराचारपरायणः वेदान्तिनमन्यः पञ्चवट्यां न्यवसत्। बहुभिः तस्य विषये परमहंसानां सविधे निवेदितम्। एकद्युः परमहंसैः स पृष्टः- कथं त्वमित्थं दुराचारान् करोषि? तदा तेन उक्तम्- भोः ब्रह्म सत्यं जगन्मिथ्या- अतस्त्वया श्रूयमाणमपि मिथ्याभूतम्। मया क्रियमाणमपि मिथ्याभूतम्। तदा परमहंसा अत्यन्तरूढशब्दैस्तं ततर्जुः।

श्रुतिः कथयति–

अविद्यायामितरे वर्तमानाः स्वयं धीराः पण्डितम्मन्यमानाः।
दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः॥[६] इति।

इत्थमेव कदाचिदन्यः भक्तः साधकः परमहंसानुपसृत्य अवदत् – ब्रह्म सत्यं जगन्मिथ्या इति उपदेशः। तर्हि ईश्वरपूजनादिकं

---

[१] गीतागूढार्थदीपिका
[२] भागवते १/१/१
[३] तत्रैव
[४] वाक्यपदीये ब्रह्मकाण्डे
[५] वाक्यपदीये ब्रह्मकाण्डे
[६] कठोपनिषद्

भगवन्नामजपादिकञ्च सर्वं त्यक्तुं शक्यं किल इति। तदा परमहंसैस्तु समाधानमित्थमुक्तम्- भोः! अयं भावः सरलो न भवित। यतो हि तादृक्स्थितौ वक्ता, श्रोता, वचनं सर्वं मिथ्याभूतम्। तर्हि तत्र कुतस्तव विश्वासः। पुनः सोहं, सोहम् इति सहस्रधा उच्चारयामः। किन्तु मनसि सहस्रं कामासक्तयः संशयाश्च सन्ति। तेन को लाभः। एतदेव भगवता गीतायामुक्तम्–

क्लेशोऽधिकतरस्तेषाम् अव्यक्तासक्तचेतसाम्।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते॥[७]

किञ्च, या सोऽहमिति भावना त्वया उच्यते सा परमार्थदशा इति किल त्वया मन्यते। ततोऽपि उच्चतरा स्थितिर्वर्तते। परमार्थता सा न भवति। एतदेव माण्डूक्यकारिकायां पश्यामश्चेत्–

न निरोधो न चोत्पत्तिर्न बन्धो न च साधकः।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥

एवं तर्हि इदानीमनुभूयमानो भेदोऽस्ति वा न वा? भेदस्य पारमार्थिकीं सत्ताम् अङ्गीकुर्वन्तु वा न वा व्यावहारिकीं सत्तामङ्गीकृत्यैव सर्वं शास्त्रं प्रवर्तते। अतो भेदस्तु अस्त्येव। तदेव शङ्कराचार्यैः अध्यासभाष्ये- सत्यानृते मिथुनीकृत्य नैसर्गिकोऽयं लोकव्यवहारः इति लौकिका वैदिकाश्च सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि भविन्ति[८]- इत्यादीनि वाक्यानि उक्तानि।

अतः द्वैतं व्यवहारे स्वीकर्तव्यमेव। एवमेव पूर्णतामिच्छता साधकेन विशिष्टाद्वैतमप्यङ्गीकार्यम्। चिदचिद्विशिष्टम् अद्वैतं ब्रह्मेति ते मन्वते। तत्र परमहंसाः उदाहरन्ति- यथा कपित्थफलं (बिल्वफलं) केनचिदिष्टम्। स तस्य त्वचं बीजानि तन्तूंश्च त्यक्त्वा सारमात्रं ग्रहीष्यति। किन्तु तस्मै आवश्यकं तु सम्पूर्णं फलमेव। अन्यथा पूर्णता नायाति – भारेण न्यूनं भवति- किन्तु तत्त्वतः अद्वैतं तिष्ठति। भगवान् उपमां कथयति लवणप्रतिमा समुदस्य जलं परिमातुं गता। पुनर्न प्रत्यायाता। ब्रह्मविद् ब्रह्मैव भवति।

तर्हि येषां विग्रहाणामर्चनम् अस्माभिः क्रियते? तत्र परमहंसाः कथयन्ति सच्चिदानन्दवारिधौ भक्तिरूपहिमेन जलं तुहिनं भूत्वा आकारं गृह्णाति। ज्ञानसूर्ये उदिते पुनः सर्वमेकीभूतं भवति। किन्तु केचिदाकारा नित्याः। तदेव चिन्मयरामः, चिन्मयश्याम इति परमहंसा व्याहरन्। तस्मादेव भक्ताः साम्यरूपं मोक्षमपि नेछन्ति कदाचित्। यथा चैतन्यमहाप्रभोर्वचनम्–

न धनं न जनं न सुन्दरीं कवितां वा जगदीश कामये।
मम जन्मनि जन्मनीश्वरे भवताद्भक्तिरहैतुकी त्वयि॥[९] कुलशेखरः–
नाहं वन्दे तव चरणयोर्द्वन्द्वम् अद्वन्द्वहेतोः
कुम्भीपाकं गुरुमपि हरे नारकं नापनेतुम्।
रम्या रामा मृदुतनुलतानन्दने नापि रन्तुं
भावे भावे हृदयभवने भावयेयं भवन्तम्॥[१०] शङ्कराचार्यः-
न मोक्षस्याकाङ्क्षा भवविभववाञ्छापि च न मे
न विज्ञानापेक्षा शशिमुखि सुखेच्छापि न पुनः।
अतस्त्वां संयाचे जननि जननं यातु मम वै
मृडानि रुद्राणि शिवशिवशिवानीति जपतः॥[११] मधुसूदनसरस्वतीपादाः
वंशीविभूषितकरान्नवनीरदाभात् पीताम्बरादरुणबिम्बफलाधरोष्ठात्।
पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात् कृष्णात्परं किमपि तत्त्वमहं न जाने॥[१२] एवञ्च आचरणे भक्तिः- द्वैतं सर्वेषाम् आचार्याणाम् अभिप्रेतम्।

तस्मात् तत्त्वविचारस्तु कर्तव्यः। किन्तु तदपेक्षया प्रधानं शास्त्राचरणम्। अन्यथा वाग्वैखरी शब्दझरी भुक्तये न तु मुक्तये भविष्यति। गीतायामपि अत एव भगवता उक्तम् –

यः शास्त्रविधिमुत्सृज्य वर्तते कामचारतः।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्॥[१३]

किमपि तत्त्वं- द्वैतं, विशिष्टाद्वैतम्, अद्वैतं वा- अङ्गीक्रियताम्। ततः कतरत् सत्यमिति सुधियो विभावयन्तु। वयं तु न जानीमः। यथा पद्मलोचनः विष्णुशिवयोः कतरो ज्यायान् इति पृष्टः अन्यतरमपि न दृष्टवान् को ज्यायानिति कथं वदेयम् इति उदतरत्।

एवमेव सर्वं तत्त्वं सत्यम्। अनन्तं सच्चिदानन्दसागरं यो यथा दृष्टवान् स तथा वर्णयति। यथा कृकलासं कश्चन रक्तं दृष्टवान्, कश्चन नीलं दृष्टवान्, कश्चन पीतं दृष्टवान्- यः तं सर्वदा पश्यति स जानाति सर्वे वर्णा अस्य सम्भवन्ति।

एवं यः सच्चिदानन्दसमुद्रं जानाति स जानाति सर्वं सत्यम्। किन्तु न कथयति। नारदः दृष्टवान्, शुकः स्पृष्टवान्, महादेवस्तु

---

[७]भगवद्गीता
[८]शाङ्करब्रह्मसूत्रभाष्ये अध्यासभाष्यम्
[९]शिक्षाष्टकम्
[१०]मुकुन्दमालास्तोत्रम् १
[११]अन्नपूर्णास्तोत्रम्
[१२]गीतागूढार्थदीपिका
[१३]भगवद्गीता

गण्डूषत्रयं पीत्वा मग्नस्तत्रैव समाहितः इति रामकृष्णपरमहंसाः। आचार्यास्तु सर्वे शद्धेयाः परमप्रामाणिकाः। अतः स्वीये भावे स्थित्वा साधनपथमवतरामः। स्वीये भावे निष्ठा स्यात्, अन्यस्य विद्वेषो न कार्य। उद्धारस्तु भविष्यति। भगवानेव प्रतिजानीते–

ये तु सर्वाणि कर्माणि मयि सन्न्यस्य मत्पराः।
अनन्येनैव योगेन मां ध्यायन्त उपासते॥
तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।
भवामि न चिरात्पार्थ मय्यावेशितचेतसाम्॥[१४] अत ऊर्ध्वं न संशय इति प्रतिज्ञायते भगवता। तद्वचसि विश्वस्य आचर्यताम्। वेदान्तः अनुष्ठीयताम्- इति विवेकानन्दश्रीचरणाः।

तर्हि एवम्भूतस्य अपूर्वदर्शनस्य अभिधान्तरं कल्पयित्वा नवीनवादः उपदिशयते वा? नैव। वस्तुतस्तु नेदं नवीनं तत्त्वम्। इयमेव सनातनी परम्परा। अतोऽस्य किमपि अभिधान्तरमपि न कल्प्यते। एतद्विचारणीयं नास्ति, आचरणीयम्। अतः श्रीरामकृष्णजीवनदर्शनमित्येव अस्य परिचयः। विवेकानन्दश्रीचरणाः कथितवन्तः एतस्मिन्नवतारे भगवान् शास्त्रादिकम् यथाविधि न पठितवान्। किन्तु तस्य अनुभवाः सर्वे शास्त्रमर्यादामनुल्लङ्घ्य वर्तते। अतः शास्त्राणां याथायथ्यप्रख्यापनमेव अस्य अवतारस्य प्रयोजनम्। अतः शास्त्रवचस्सु श्रद्धानैरस्माभिः वेदान्त आचरणीयः तेनैव च आत्मनो मोक्षः जगतश्च हितं भविष्यति इत्यपि मन्यामहे।

क्षीरसागरतरङ्गशीकरा
सारतारिकतचारुमूर्तये।
भोगिभोगशयनीयशायने
माधवाय मधुविद्विषे नमः॥[१५]

☆ ☆ ☆

---

[१४] भगवद्गीता
[१५] मुकुन्दमालास्तोत्रम्

# हेमशकटिकस्य समीक्षात्मकमध्ययनम्[1]

(एच.आर.विश्वासकृतस्य संस्कृतोपन्यासस्य समीक्षा)

०.भूमिका– काव्यं न वाक्याद् भिद्यते। प्रात्यहिकैर्यैर्वाक्यैः सामान्या भाषन्ते, मनोगतं भावं प्रकटयन्ति, हार्दं प्रकटयन्ति, तैरेव वाक्यैः कविभिरपि काव्यानि रच्यन्ते। तान्येव पदानि, त एव शब्दाः, त एव ध्वनयः। अथापि वर्तते काव्यस्य काव्यत्वं येन सामान्यैर्भाष्यमाणानि सामान्यवाक्यानि काव्याद् भिद्यन्ते।

रमणीयार्थप्रतिपादकत्वं रसमयत्वं वा काव्यस्य जीवातुभूतमिति प्रतिपादयन्ति साम्प्रदायिकाः। अत्र यैः वाक्यैः रमणीयोऽर्थः प्रकट्यते तदेव काव्यमिति अक्षरार्थस्वीकारे बीभत्सादिरसस्थले जुगुप्साकरस्यार्थस्य वर्णनपरकाणां वाक्यानां काव्यत्वं, शुष्कं काष्ठं तिष्ठत्यग्रे इत्यस्य नीरसतरुवर इत्यस्यापेक्षया अपकृष्टत्वं च विहन्येतेति निश्चप्रचम्। किञ्च, नहि कविः घटिताभ्यो घटनाभ्यः सुतरां भिन्नं किमपि तत्त्वं वर्णयति। तथा सति तस्य कपोलकल्पितत्वेन उपेक्षैव क्रियते सुधीभिः। काव्ये कविः उदयमयमानं सूर्यं, विहायसि डयमानं विहगं, कलकलायमानां नदीं, माध्याह्निकं नैःशब्द्यमलङ्कुर्वन्तं वाहीकस्य वेणुनादं, तरङ्गायितं गर्जन्तं वारिधिं, गोखुरोत्थां धूलिं, वर्षासु नृत्यन्तं मयूरं, वसन्ते कूजन्तं पिकं, चपलयुवत्या मुग्धां दृष्टिं, सरलशिशोः पूतं हासं, श्यामलं वनं, रुक्षं पर्वतमेव वा वर्णयति–सर्वमिदं प्रत्यक्षमेवानुभवन्ति सर्वे, किमेतेषां वर्णनेन! पुनश्च कवेर्वर्णनीयेषु कानिचन निसर्गसुन्दराणि–न तेषां रामणीयकं कविना प्रतिपादनमपेक्षते; कानिचन जुगुप्साकराणि–न शतधा कालिदासेन वर्ण्यमानोऽपि सहृदयस्याहृदयस्य वा आह्लादकानि स्युः।

किन्तु न तेन कवेः सम्बन्धः। कविस्तु स्वहृदयोद्गतं भावं सहृदयहृदयं प्रापयति वर्णनीयवस्तुद्वारेण। नहि वर्णनीयस्य वस्तुनः सौन्दर्यं, न वा तद्वस्तु स्वयं वर्ण्यते कविना। अपि तु रामणीयकमेव वर्ण्यते–तत्र उपायभूतानि भवन्ति वस्तूनि, दूतभूतानि च पदानि। अत एव करुणस्यापि रसत्वम्। अत एव च करुणदृश्यं प्रत्यक्षतः पश्यन् सहृदयो यावद् दुःखमनुभवति, ततः समधिकं दुःख्यति स कवेः करुणं वर्णनं पठन्। पुनः पुनश्च तद्दुःखमनुभवितुमपीच्छति। (यद्यपि रसस्फूर्तौ तस्य दुःखस्य दुःखमिति व्यवहारो न भवति।)

एवञ्च हार्दमानन्दं व्यङ्क्तुं कविः नैसर्गिकम् अनैसर्गिकं च वस्तु स्वयमेव सृजति। यत्तु वास्तवप्रपञ्चे तस्य वस्तुनः सादृश्यं तत्तु काकतालीयमेव। काव्ये वर्णितं वस्तु न विधातृसृष्टे अस्मत्प्रत्यक्षे जगति पदं कुरुते, तद्वाराजते कवेः कल्पनाप्रपञ्चे। निरङ्कुशाः कवयः[2]। कवेर्निरङ्कुशतया तस्य कल्पनायां कोऽङ्कुशः? कविः स्वकल्पनागतं यथेष्टं वर्णयति स्वेष्टया रीत्या, न तत्र कमपि नियमं कर्तुमर्हति नियतिरपि।

अस्मादेव कारणात्, काव्यस्य विषयः, काव्यस्य भेदो वा स्वरूपत इदमित्थमिति न निर्णेतुं शक्यते। वेदेष्वप्यत एव गायत्र्यादिभिः शुद्धच्छन्दोभिः साकमेव विभ्राजन्ते विराड्गायत्री-निचृद्गायत्र्यादयो भेदा यत्र गायत्र्याः शुद्धता विहन्यते। अतो लक्ष्याणि दृष्ट्वैव आलङ्कारिका लक्षणानि प्रतिपादयन्ति, न लक्षणानि दृष्ट्वा कवयस्तेषां कल्पनाया नियमनं कुर्वन्ति।

तस्मादेव क्रमशः काव्यस्य विविधा विधास्तदा तदा आयान्ति। तत्तद्देशकालगताश्च काव्यविधा अन्यैः देशान्तरे कालान्तरे च प्रयुज्यन्ते। दृष्टान्तत्वेन इदानीं भारतीयासु भाषासु प्रयुज्यमानानि सनेट्-हायकु-लिमेरिक्-पद्यानि आकलयितुं शक्नुमो वयम्।

संस्कृतवाङ्मयस्यास्मिन् नवीने युगे नहि केवलानि आलङ्कारिकैः प्रतिपादितान्येव काव्यविधानि रिरचयिषन्ति साम्प्रतिकाः कवयः। आधुनिकया रीत्या आधुनिका विषयास्तेषां वर्णनीयवस्तूनि भवन्ति। नात्र कस्यापि विदुषो विप्रतिपत्तिर्भवितुमर्हति–परिवर्तनम्, अग्रे चलनं च कालस्य स्वधर्मः।

एवमेव संस्कृतसाहित्ये सम्प्रति शिशुपालवधसदृशैः महाकाव्यैः कादम्बरीसदृशैश्च गद्यकाव्यैः सममेव स्वमर्यादया विराजन्ते आधुनिकैः रचितानि मुक्तच्छन्दांसि पद्यगन्धीनि, रागमयानि गीतानि, कथा-लघुकथा-उपन्यासप्रभृतीनि गद्यविधानि च[3]।

तादृशेष्वेव हेमशकटिकं नामोपन्यासो विश्वासवर्याणां यशोलाञ्छितानां कीर्तिस्तम्भस्यैका प्रकृष्टा शिला। संस्कृते मौलिकोपन्यासरचयितॄणां सङ्ख्या न महती। अङ्गुलिगणनीयेषु तेषु विश्वासमहोदयः स्वप्रतिभाभासा वैशिष्ट्यं प्रकाशयन् चकास्त्येवेत्यत्र न सन्देहावसरः।

१.उपन्यासः– कलायाः साहित्यस्य वा कस्याश्चिदपि विधाया इदमित्थमिति लक्षणनिर्देशो न शक्यः कर्तुम्। उपन्यासोऽपि तथैव। "विश्वजगतः असीमानां विचित्राणां जीवितलीलानां, मनुजजीवितस्य बहुमुखगतिप्रकृतेश्च यथासम्भवं सामग्रिकस्य शिल्पसमन्वितस्य च रूपस्य चित्रणमेव उपन्यासस्य लक्ष्यम्। लघुकथायाः परिसरो यत्र संक्षिप्तो, नाटकं यत्र मञ्चायोजनम् अभिनयदाक्ष्यं चाश्रयति, उपन्यासे तत्रैव वर्तते विस्तृतस्य कथानकस्य परिसरः; कस्यापि बहिर्मुखोपकरणस्यापेक्षा उपन्यासकर्तुः न भवति; तस्य शिल्पसंसारे तस्यैवैकच्छत्रं स्वाराज्यम्।"[4]

---

[1]समीक्षितग्रन्थः – हेमशकटिकम्, ग्रन्थकारः–डा.विश्वासः, प्रकाशिका-संस्कृतभारती, नई दिल्ली-११००५५, प्रथमसंस्करणम्-२०११, पुटाः-६+१४४, मूल्यम्-₹३५/-।

[2]वैयाकरणसिद्धान्तकौमुदी, भुवश्च(३.२.१३९) इति सूत्रम्।

[3]उपन्यासशब्दोऽत्र novel इति आङ्ग्लेयशब्दस्य पर्यायत्वेन स्वीक्रियते, एवमेव कथा=Fiction, लघुकथा=Short Story

[4]चट्टोपाध्यायः, कुन्तलः, साहित्येर रूप रीति ओ अन्यान्य प्रसङ्ग (वङ्गभाषीयो ग्रन्थः), प्रकाशकः-सुमनचट्टोपाध्यायः, कलिकाता, २००८। पृ.१९३।

नोपन्यासस्य संज्ञा, न वा आकारः, न च विषय इदमित्थमिति निर्देष्टुं शक्यते। उपन्यासो जीवनस्य किञ्चन सुसम्बद्धं चित्रणं यत्र इतिहासस्येव वैचित्र्यं, संवादस्येव घटमानत्वं, स्मृतिकथाया इव घटनाविश्लेषणं, भ्रमणवृत्तान्तस्य तथ्यमयत्वं, कथायाः कथानकम् एकत्र सहावस्थानेन वर्णनीयं वर्णमयं विदधते; किन्तु इतिहासं, संवादं, स्मृतिं वा प्रति नौपन्यासिकस्य किञ्चन दायित्वं भवति। अत एव आलेक्सन्दार-सेलकिर्कस्य जीवनवृत्तान्तमाश्रित्य रबिनसन्-क्रुसो इत्याख्यः प्रसिद्ध उपन्यासः स्वकल्पनया निरमायि डेनियेल्-डेफोवर्येण। एवमेव च धीवरस्य कस्यचिद् दिनत्रयात्मकस्य मत्स्यग्रहणस्य सङ्ग्रामं स्वोपज्ञशब्दैर्विवृण्वन् The Old Man And The Sea इत्याख्यं पुरस्कृतं प्रसिद्धमुपन्यासं रचयामास हेमिङ्ग्वे-वर्यः। एवञ्च विषयवैचित्र्येणापि उपन्यासः स्वयं बहुविधो भवितुमर्हति, किन्तु तत्र जीवनस्य चित्रमयता स्यात्।

२.हेमशकटिकम्– विश्वासमहोदयस्य हेमशकटिकं प्रकृत्या उपन्यास एव। उपन्यासरचकोऽत्र स्वजीवनस्य कतिचन अनुभवान् विवरीतुं चित्रनिर्मात्रा देवकीनन्दन-बसुना निर्मीयमाणायाः संस्कृतधारावाहिन्याश्चित्रीकरणम् उपजीव्यम् अकार्षीत्।[५] प्रसङ्गत एव तत्र चित्र्यन्ते विविधानि चरित्राणि, विश्लेष्यन्ते विविधा घटनाः, विचार्यन्ते समाजस्य विविधाः प्रथाः, विविच्येते जीवनस्य विविधप्राप्तीनां नित्यत्वानित्यत्वे।

उपकरणं विहाय ईश्वराद्भिन्नेन केनापि न किमपि स्रष्टुं शक्यते। उपन्याससर्जकेनापि कानिचन उपकरणान्यादायैव उपन्यासो विरच्यते। उपन्यासस्य उपादानानि प्राय इमानि भवन्ति- आख्यानभागः (Plot), चरित्राणि (Character), संवादः (Dialogue), देशकालौ परिवेशश्च (Setting and Milleu), प्रतीकं (Symbolism), शैली (Style)। प्रायः कस्यचन सफलोपन्यासस्य विचारणे तदुपन्यासगतानामेषाम् उपादानानां विचारणद्वारेण तस्योपन्यासस्य सार्विकविचारणं क्रियते समीक्षकैः।

प्रकृतोपन्यासस्य विवेचनमप्येवं रीत्या कर्तुं प्रयतिष्यामहे वयम्।

२.१.आख्यानभागः– यदाख्यानं कथानकं वाश्रित्य उपन्यासः प्रवर्तते प्रवर्धते च तदेव पाठकस्याकर्षणे मूलम्। उपन्यासे बह्वीनां कार्यकारणभावेन सम्बद्धानां, सुविन्यस्तानां घटनानां परम्परया आख्यानस्य निर्माणं क्रियते। किन्तु संवादप्रतिवेदनमिव घटनानां विवरणमात्रमत्र न भवति; मानवीयजीवनस्य विविधा गूढसमस्याग्रन्थयः अप्रतिरोध्या आवेगप्रवृत्तयश्च घटनानां विवरणेनात्र द्योत्यते। मानवजीवनस्य विविधानामायामानां रहस्यमयद्योतनया कश्चिद् उद्वेगः पाठकमनसि सृज्यते, घटनाया घटनानां वा जटिलविन्यासेन उपन्यासो मानवजीवनस्य अतलस्पर्शि गाम्भीर्यं स्प्रष्टुं यतते।

हेमशकटिकस्याख्यानभागो दृढतया सम्बद्ध आख्यानभागः। “सायङ्कालः” इति हि उपन्यासस्यारम्भः। दिवावसाने सन्ध्याया अस्पष्टता यद् रहस्यमयत्वं सृजति, तदेव आन्तं पाठकस्य कञ्चन रहस्योद्वेगं जनयति। किन्तु रहस्यमयतायां सत्यामपि घटनाः क्रमशः सुनिर्दिष्टे खाते प्रवहन्त्यः काञ्चन अनिवार्यां परिणतिं प्राप्नुवन्ति। धारावाहिन्या निर्माणमेव आख्यानस्य मुख्यो भागः। देवकीनन्दनबसोः जीवनवृत्तान्तः तथा विद्यासागरस्य विवाहप्रसङ्ग इव अनिवार्यघटनाः, धारावाहिन्यां रोहितस्याभिनयावकाश इत्येतादृश्यः आकस्मिकतया पतिता घटनाः तद् मुख्यमाख्यानं पुष्णन्ति।

द्वन्द्वः सङ्घर्षो वा (conflict) आख्यानभागस्य हृदयम्। मानवीयावेगस्य जाटिल्यस्य च स्फुटं चित्रं सङ्घातेनैव लिख्यते उपन्यासे। व्यक्तिद्वयस्य, गोष्ठीद्वयस्य, व्यक्तिसत्ताया द्विविधभावस्य, व्यक्तिमानसस्य विविधप्रवृत्तीनां, व्यक्त्या समाजस्य, अन्यविधो वाऽयं सङ्घर्षो भवितुमर्हति। अस्माद् द्वन्द्वादेव औत्सुक्यं जायते। प्रकृतोपन्यासे आख्यानस्य निर्माणे ईदृशस्य सङ्घर्षस्य यथादेशकालं निवेशनं सहृदयानाम् औत्सुक्यजनने नितरां समर्थम्। सुनयना-सुषमयोः; सुनयना-विपाशयोः; “सर्वदा एतादृशं परमसात्त्विकमेव भोजनं कुर्वतः जनस्य कथं वा उच्चैः भाषणे शक्तिः भवेत्...?”[६], “संस्कृतस्य निमित्तम् असंस्कृतज्ञैः अस्माभिः यदा एतावान् श्रमः स्वीक्रियते तदा संस्कृतज्ञैः भवद्भिः स्वल्पमपि साहाय्यं न क्रियते चेत् कथम्?”[७] इत्यादिषु स्थलेषु विद्यासागर-देवकीनन्दनयोः; विपाशा-विद्यासागरयोः; सुषमा-विद्यासागरयोः अन्येषां च व्यक्तिविशेषाणां परस्परसङ्घर्षः; दिवाकरं भृशमश्लीलं तर्जयतः देवकीनन्दनस्य व्यक्तिसत्ताया द्विविधभावस्य; पत्यौ विश्वासवत्या अपि विपाशायाः सुनयनामधिकृत्य भीतिभावः, इन्द्रेशेन सह वार्तायाः परं विद्यासागरस्य मनसि संशयः, त्रिविधानामृणानां विवरणात् सुषमायाः चित्तवृत्तेरसामञ्जस्यमित्येवं व्यक्तेरेव स्वान्तर्गतः सङ्घर्षः; चित्रसमालोचकानां देवकीनन्दनस्य विपरीतसमालोचने व्यक्ति-गोष्ठ्योः सङ्घर्षः, कुटुम्बविषये विद्यासागरेण प्रतिपादिताया परम्परायाः सुषमाया विचाराणाम् आधुनिकतायाश्च सङ्घर्ष इत्येवं बहुविधैः सङ्घर्षैः आदावेव समुद्भूतम् औत्सुक्यं यत्नेन परिरक्षद् आख्यानं क्रमशः परिणतेरनिवार्यतां स्पृशति।

२.२.चरित्राणि– यदि आख्यानमुपन्यासस्य हृदयं स्यात् तर्हि, चरित्राणि उपन्यासस्य हृत्स्पन्दनायन्ते। चरित्रैरेव आख्यानस्य स्थितिः। लघुकथायां चरित्रस्य उपस्थापनं क्रियते। उपन्यासे तु उपन्यासकर्ता विविधा घटना विवृण्वन् कस्यचित् चरित्रस्य

---

(अनुवादः समीक्षकस्य)

[५]उपन्यासकर्ता प्रकृतग्रन्थे प्रास्ताविके स्वयं लिखति, “मया प्राप्ताः अनुभवाः एव अस्य उपन्यासस्य लेखने प्रेरकाः सन्ति।”

[६]पृ.३३

[७]पृ.६५

मनोभावान्, आचरणानि वा प्रदर्शयति। तैः पाठकेन स्वयं चरित्रस्य निर्माणं कर्तुं योग्यः अवसरो लभ्यते।

अत्रोपन्यासे देवकीनन्दनस्य पूर्वजीवनवृत्तान्तस्य वर्णनेन, विद्यासागरस्य चिन्तनादीनां वर्णनेन, विपाशायाः सुनयनायाः सुषमाया रामचन्द्रस्य अन्येषां च वार्तालापैः तत्तद्घटनाभिश्च कुशलः कुविन्द इव सूक्ष्मया सावलीलया रीत्या अनेकानि चरित्राणि पटुतया निर्माति उपन्यासकर्ता।

उपन्यासे देवकीनन्दनः, विद्यासागरः, सुषमा, सुनयना इत्यादीनि पात्राणि व्यक्तित्वकेन्द्रितपात्राणि (Individual Character)–एतेषां सर्वेषां समाजगतसामान्यजनापेक्षया किञ्चिद् उल्लेखनीयं वैशिष्ट्यं परिस्फुटं भवति। तत्रैव विपाशा, दिवाकरः, सीता, रामचन्द्रः, इन्दिरेशः, रङ्गराजः, बसवराजप्पः, गुणाकरः, केशव इत्यादीनि च पात्राणि निर्विशेषपात्राणि (Type Character)–एते समाजान्तर्गताः सामान्यजना यान् वयं नित्यं मार्गेषु, यानेषु, आपणेषु, विपणीषु पश्यामः। तत्रापि विपाशा-दिवाकर-रामचन्द्र-रङ्गराजादयः एकरैखिकपात्राणि (Static Character), देवकीनन्दन-विद्यासागर-सुषमादयः वर्तुलितपात्राणि (Dynamic Chacracter)। सुनयना व्यक्तित्वकेन्द्रितं किन्तु एकरैखिकं पात्रम्।

विद्यासागरः देवकीनन्दनश्च उभावपि धीरोदात्तौ नायकौ। तत्रैव विपाशा मुग्धा नायिका। विद्यासागरमपेक्षमाणा सुनयना खण्डिता परोढा, सुषमा च अभिसारिका कन्यका भवतः।

एतेषामाचरणादीनां, तद्गतावेगादीनां च देशकालोचितेन सुन्दरेण समायोजनेन उपन्यासस्य वर्तुलाकारमाख्यानं सुपुष्टं सदग्रे सरति सलीलसलिलगत्या।

२.३.संवादः– उपन्यासे नाटकस्य प्रत्यक्षता, कथायाः परोक्षता च यौगपद्येन पदं कुरुताम्। जीवनस्य खण्डचित्राणि मञ्चं विनैवाभिनीयन्त उपन्यासस्य पत्रेषु। अनेन सहैव मानवचरित्रस्यान्तर्गूढानि रहस्यान्यपि उपन्यासे स्फुटं प्राकाश्यं यन्ति। तेनैवोपन्यासस्य रसस्फूर्तिः, तेन च तस्य जीवनचित्रनिर्माणे सार्थक्यम्। न केवलानां घटनानां मनोगतभावानां वा वर्णनेन चरित्रस्य अन्तर्निहितं रहस्यं स्फुटं भवति। संवादेन पात्राणि स्वेषां मानसवैशिष्ट्यानि प्रकाशयन्ति। संवादैरेव जीवननाट्यस्याभिनयो भवति उपन्यासस्य पुटेषु। संवादरचने एव उपन्यासकर्तुः भाषानैपुण्यं परीक्ष्यते। पात्रेण, घटनया च सुसम्बद्धस्य संवादस्य निर्माणमेव आख्यानस्य विवर्तने पात्राणां विकसने च सहायकं भवति, अन्यथा संवाद उपन्यासस्य व्यर्थभारो भवति।

उपन्यासकर्तुः संवादसर्जने पाटवं प्रकृतोपन्यासे हृदयाह्लादकं वर्तते। संवादस्यारम्भः समाप्तिश्च विशेषकौशलमपेक्षते। वधूदर्शनाय गतेन विद्यासागरेण विपाशाया वार्तालापः[८] अकस्माद् आरब्धोऽपि यथा पौर्वापर्यसङ्गतिं न जहाति तथैव तयोश्चुम्बनवर्णनेन समाप्तिं गच्छन् अनौचित्यजं वैरस्यमपि न सृजति, औत्सुक्यं च सुष्ठु रक्षति। अयं संवादः विपाशा-विद्यासागरयोर्विवाहस्य घटनायाः कार्यकारणक्रमं, विपाशायाश्चातुर्यं, विद्यासागरस्य विपाशायामासक्तिं च विवृण्वन् अनाविलं श्रृङ्गारमपि व्यञ्जयति सहृदयचेतसि। इत्थमेव आरक्षिकार्यालये दिवाकरस्य धरणीन्द्रस्य देवकीनन्दनस्य वार्तालापः[९] दिवाकरस्य देवकीनन्दनस्य च चरित्राणां विकासे सहायको भवति। विपाशया पक्वस्य ताक्रस्य भोजनकाले "पत्न्याः पुरतः पत्युः कण्ठ उच्चैः न भवति, अपि तु पत्युः पुरतः पत्न्याः कण्ठः उच्चैः भवति। एवं खलु सुनयने?" इति वाक्येन तस्योत्तररूपेण सुनयनया प्रयुक्तेन "तात! सुषमायाः आगमनं निश्चितम्।"[१०] इति वाक्येन सुनयनायाश्चरित्रं विकाशं प्राप्नोति। सुषमा-विद्यासागर-सुनयनानां मिथः "अन्यथा श्वस्तनचित्रीकरणस्य का कथा भवेत्...?" इत्यारभ्य "मम आर्यपुत्र आह्वयति"[११] इत्यन्ते संवादे विद्यासागरं घटकीकृत्य सुनयनायाः सुषमायाश्च चरित्रं विकाशमेति। विपाशाया नाम अधिकृत्य सुषमायास्तन्मातुश्च वार्तालापेन[१२] आदौ विपाशाया नामश्रवणेन रामचन्द्रस्य उपहासमिश्रस्य हासस्य रहस्यमुद्घाट्यते, तथा च सामाजिकानां कस्यचन विशिष्टमनोभावस्य प्रकटनं भवति।"यदि एतावदेव अभिनेतव्यं तर्हि सा यस्य कस्यापि पत्नी भवतु नाम, मम कोऽपि आक्षेपः नास्ति। परन्तु अन्यविधेषु आलिङ्गनचुम्बनादिषु प्रणयदृश्येषु यदि अभिनयः करणीयः भविष्यति तर्हि तु चिन्तनीयम्..." इत्यारभ्य "यदि भवत्याः श्वशुरेण सदृशः सर्वमान्यः महान् निर्देशकः सुविचिन्त्य तादृशीम् अपेक्षां करिष्यति तर्हि तु वृत्तिपरैः अभिनेतृभिः तस्याः निराकरणं कर्तुं न शक्येत इति मम भासते...।"[१३] इत्यन्तेन संवादेन सुनयनायाः सुषमायाश्च चरित्रस्य विशिष्टान् अंशान् प्रकाशयति ग्रन्थकारः।

दिङ्मात्रमुदाहृतमत्र। अन्ये च संवादा अस्योपन्यासस्य सहृदयहृदयाह्लादने नितरां सफलाः।

२.४.देशकालौ परिवेशश्च– नाटके इव उपन्यासेऽपि चरित्राणाम् आख्यानस्य च जीवनदानाय पृष्ठभूमेर्महती भूमिका। यस्यां पृष्ठभूमिकायाम् उपन्यासो रच्यते चरित्राणां घटनानां च वर्णनं तदनुसारं भवेद्, अन्यथा औचित्यं विहन्यते। परिवेशस्तु पृष्ठभूमिकाया वस्तुतन्त्रतामतिक्रम्य काञ्चिद् गभीरतां स्पृशति। यथा नाटके मञ्चस्य सज्जया वास्तवजगतः अध्यासः क्रियते तथा उपन्यासे कल्पनाया वर्णनशैल्याश्च दाक्ष्येण लेखको निर्माति पृष्ठभूमिकाम्। पृष्ठभूमिका न केवलं घटनास्थलम्, अपि तु ततोऽधिकं–घटनानां

---

[८]पृ.७३-७५
[९]पृ. २१-२२
[१०]पृ. ३३
[११]पृ. ११३-११४
[१२]पृ. १०१
[१३]पृ. २१-२२

तात्पर्यनिर्णेत्री।

प्रकृते पृष्ठभूमिका कर्णाटकराज्यं बेङ्गलूरुनगरं तत्संलग्नाश्च केचन ग्रामाः। परिवेशोऽत्र धारावाहिनीचित्रीकरणस्य स्थलम्। उपन्यासकर्ता स्वयं कर्णाटकीय इति मुम्बयीनगरीं विगणय्य स कर्णाटकमेव पृष्ठभूमिं कृतवान्। यतो हि, पृष्ठभूमिकायाः सामग्रिकः परिचय उपन्यासनिर्माणे अपरिहार्यो भवति। एवमेव चलच्चित्रक्षेत्रमपि अनेन समीपतो दृष्ट इति परिवेशनिर्माणेऽपि न काऽपि स्खलितिः अपूर्णता वा परिलक्ष्यते उपन्यासे।

२.५.प्रतीकम्– प्रतीकं तादृशं किञ्चिच्चिह्नं येन काचन अनुक्ता वार्ता प्रेष्यते। अत्र देवकीनन्दनः, सुषमा इत्यादीनि चरित्राणि प्रतीकभूतानि। यत्र एकतो देवकीनन्दनः जीवनसङ्ग्रामस्य प्रतीकभूतः, सुनयना दम्भदर्पादीनां प्रतीकभूता, तत्रैव सुषमा मोहावेशस्य, आध्यात्मिकसंशयस्य च प्रतीकभूता। विपाशायाः प्रथमदर्शनकाले कौटुम्बिकजीवनस्य महत्त्वं वर्णयतः वंशवृक्ष इत्युपन्यासस्य पठनमपि विद्यासागरस्य तत्परिवारस्य च विचाराणां प्रतीकभूतम्। तदेव विद्यासागरः कथयति, "भवती तत् स्वामिनीत्वम् इति चिन्तयतु, सहभागिनीत्वम् इति वा चिन्तयतु। अहं चिन्तयामि यद् दाम्पत्यं नाम एतदेव। मुख्यः निर्णयः यदा स्वीकरणीयः भवति तदा द्वयोरपि सम्मत्या एव सः स्वीकर्तव्यः भवति। मम गृहे सः एव क्रमः अनुस्रियते। किञ्च यदि मया काचित् योजना चिन्त्यते तर्हि प्रायः तत्र विपाशा विरोधं न करोति। अहमपि तस्याः योजनायां प्रायः विघ्नं न करोमि।"[१४] इति वाक्येन एतत् स्पष्टं ज्ञायते। पूर्वं विद्यासागरस्य विवाहे या अनिच्छा सा व्यपगच्छति। वंशवृक्ष एव तस्य कारणं किम्? कथञ्चिद् वंशवृक्षः प्रतीकभूत एव।

ज्वरपीडिता सुषमा निशीथे आत्मानं वसन्तसेनां मन्वाना चारुदत्तभ्रमेण विद्यासागरं दृढमाश्लिष्टवती। ज्वरोऽत्र मोहज्वरः। वसन्तसेनाया आचरणस्यानौचित्यं यथा मृच्छकटिकस्य रचनकाले आसीद् इदानीमपि तथैवास्ते। पितृणविमुक्त्यर्थं रोहसेनसदृशं पुत्रमिच्छन्ती सुषमा विद्यासागरमालम्बत इति आपातरमणीयाऽपि युक्तिः धर्मसङ्गता न भवति। अधर्म्येण उपायेन धर्मः न सम्पद्यते। विद्यासागरस्य चपेटिका तस्यैव प्रतीकम्। चारुदत्तेन च वसन्तसेनायां योऽनुरागः प्रदर्शितः सोऽप्यनुचित एव, तस्मादेव तस्य वध्यभूमिं यावदागमनम्। संयमः पालनीय आसीच्चारुदत्तेनापि। "इतः एकेन क्षणेन विलम्बः क्रियते चेदपि मम पराजयः निश्चितः इति तस्य अभासत" इति शास्त्रज्ञस्य धर्ममार्गाश्रयिणो विद्यासागरस्य पराजयविचिन्तना चारुदत्तस्य स्खालित्यं प्रतीकयति। "शास्त्राण्यधीत्यापि भवन्ति मूढा यस्तु क्रियावान् पुरुषः स विद्वान्" इति पङ्क्तेर्याथार्थ्यं पुनः प्रमाण्यते। संयम एव धर्ममूलम्, ईषदसंयमोऽपि महते अनर्थाय। अतः सुषमाया रूपयौवनादिषु ईषदासक्तिरपि विद्यासागरस्य स्खलनमेव सूचयति। चारुदत्तेन वसन्तसेनायामनुरागवशाद् वध्यभूमिं गत्वा प्रायश्चित्तमाचरितं, विद्यासागरः तन्मोहगर्तमीषत्पतित इति तेनापि प्रायश्चित्तमाचरणीयम्। महति शैत्ये सत्यपि शीतजलेन स्नानमेव तत्प्रायश्चित्तम्। स्नानेन शारीरमलविमुक्तिः कृच्छ्रेण च मानसमलविमुक्तिः इत्येवंविधाभ्यामुपायाभ्यां स्वस्य स्खालित्यजं दोषं क्षालयति विद्यासागरः। स्नानं मलक्षालनं प्रतीकयति।

एवमेव विविधा घटनाः पात्राणि चापि अत्र प्रतीकत्वेनोपयुक्तानि।

२.५.शैली– उपन्यासस्य शैली निरपेक्षा (Neutral) वर्तते। लेखकोऽत्र प्रथमपुरुषः सन् साक्षीव उपन्यासं विवृणोति। सरलैः शब्दैः, लघुभिः वाक्यैः, घटना एव केन्द्रस्थले संरक्षन्नुपन्यासकर्ता उपन्यासं ग्रथ्नाति। न तत्र वर्णनाया वैशद्यं वर्तते, किन्तु अपेक्षितस्य वर्णनाद् न स्खलति ग्रन्थकारः। यथा देवकीनन्दनस्य बाह्यं रूपं, तस्य गेहस्य स्वरूपं, विपाशाम् ऐदम्प्राथम्येन दृष्टवतो विद्यासागरस्य चिन्तनप्रवाहं, धारावाहिन्याश्चित्रीकरणस्य च वर्णनम् उपन्यासस्य परिनिष्ठितत्वे परिपुष्टौ च भृशमुपकरोति।

मनोहारिणी उपन्यासकर्तुः कथनशैली। प्रसादगुणप्रचुरा वैदर्भी रीतिः। भाषाऽपि सुमधुरा। 'तारा'पदवीषु, मुखवेणुना, प्रदर्शनकपाटिकायामित्यादीनां शब्दानां विनूतनप्रयोगः मनो हरति, किन्तु तत्रैव कमर्षियल्-चित्राणि इत्यादिषु स्थलेषु आङ्ग्लशब्दानां परिहारः कर्तुं शक्यते वेत्यपि विचारणयोग्यं भवति। सन्धिराहित्यमुपन्यासस्य भाषां सर्वग्राह्यां कृतवदपि क्वचित् सन्धिराहित्येन भाषायाः सौष्ठवं नष्टमिव भाति। तत्रापि सर्वत्र सन्धीनामभावेऽपि कोऽपि सर्वेऽपि इत्येवं केषुचन स्थलेषु सन्धिः प्रवाहस्य घातको भवति।

३.उपसंहारः– जीवनस्य वास्तवचित्रणमेव उपन्यासस्य मुख्यं लक्ष्यमिति विभावयन्ति समीक्षकाः। प्रकृतोपन्यासे समाजस्य कस्मिंश्चिद् रहस्यमये अंशे स्थितानां जनानां जीवनं प्रत्यक्षतः प्रकटयति ग्रन्थकारः। तत्रत्यानां सुखदुःखमोहाः, आवेगानुभूतयः, जीवनशैली, साफल्यासाफल्ये च साक्षी द्रष्टेव विवेचयति। विद्यासागरस्य चरित्रमत्र अतीव मुख्यम्। स स्वयं चित्ररङ्गाद्बहिःस्थः तत् स्थलं पश्यन्निव तिष्ठन् तत्रत्यानां चरित्राणां निरपेक्षं विचारणं कर्तुमर्हति। अत एव संवादलेखनकार्ये समाप्तेऽपि उपन्यासकारो विद्यासागरं मृच्छकटिकस्य रङ्गान्न मुक्तिमदात्। स आन्तं स्थित्वा उपन्यासस्य आख्यानं परिसमाप्तिं नयति। स्वयञ्च समाप्तेऽपि उपन्यासे सर्वैरस्पृष्टो रहस्यं जनयन् रहस्यावृत एव तिष्ठति। सुषमया वसन्तसेनामिषेण रात्रौ तेन सह यदाचरितं तदपि स स्वस्मिन्नेव निगूढं रक्षन् स्वीयं रहस्यमयतां सुष्ठु परिरक्षति। अतस्तस्य शिरश्चालनं सम्मतिसूचकमुत असम्मतिसूचकमिति निर्णयो न जातः। सोऽस्याख्यानस्य साक्षी वक्ता। स चरित्राणि न निर्माति, न वा तेषां विश्लेषणं करोति।

संस्कृतवाङ्मये मौलिकेषु उपन्यासेषु अनुपमोऽयमुपन्यासो विशिष्टं स्थानम् अधिकरोतीत्यत्र न काऽपि संशीतिः।

---

[१४] पृ. ६६

विश्वासमहोदयस्य मौलिक्यः कृतयस्तेषाम् अनुवादानामपेक्षयाऽपि मनोमोहिका भवन्तीत्यत्र सहृदयाः प्रमाणम्। तेषां कल्पनारङ्गादेवमेवाऽन्यान्यपि मौक्तिकानि प्राकट्यमायान्तु इति आशास्महे।

मुखपुटे हेमाभरणपूरितं शकटं मृच्छकटस्य, हैमशकटस्य च प्रतीकभूतम्। हेमपूरितशकटस्य पृष्ठतः अस्पष्टतया स्थिता नायिका सेविकया प्रसाध्यमाना सुषमायाः ख्यातिशोभितस्य जीवनस्य गूढतमसाच्छन्नतां द्योतयतीव।

सुन्दर्या अक्षरसज्जया शोभिते ग्रन्थे मुद्रणप्रमादानाम् आधिक्यं तत्र तत्र पाठकस्य खेदं जनयति।

☆ ☆ ☆

# फटिकलालदासेन कृतस्य रवीन्द्रकाव्ययोरनुवादस्य परिशीलनम्

## ०.भूमिका

विश्वविद्यालयानुदानायोगस्य साह्येनायोजितायामस्यामनूदितरवीन्द्र- साहित्याश्रितसङ्गोष्ठ्यां तस्य कवितद्वजस्य कविताद्वय्याः फटिकलाल- दासकृतोऽनुवादो विचारपथमेति मे प्रबन्धेऽद्य। निखिलवाङ्मये रवीन्द्रनाथस्य स्थानं न विचारणीयमद्यत्वे। न वा तस्य कवीन्द्रस्य परिचयोऽपि विशेषत उल्लेखनीयोऽस्ति प्राज्ञपरिषदि। न वा विद्वद्वरेण्यस्य काव्यानुवादधुरीणस्य नानाशास्त्रकलापारङ्गतस्य श्रीमतः फटिकलालदासवर्यस्य परिचयोऽपि कस्याप्यज्ञातो यज् ज्ञापनीयः स वर्तते। अतो भूमिकावतरणमत्र नियमपरिपालनमात्रमेव। अस्मिन् प्रबन्धे मञ्जूषानाम्न्यां प्रसिद्धतमायां पत्रिकायां १९५८-५९ ईसवीयाब्दे प्रकाशितयोः होरिखेला इत्यस्याः तथा हिं टिं छट् इत्यस्याः कवितायाः कविप्रकाण्डैः विद्वद्धौरेयैः कृतस्यानुवादस्य समीक्षां काञ्चित्कर्तुमीहे। पूर्वमेवात्र किञ्चित् प्रस्तोतव्यं यत्, नाहं तथा दिग्गजो महाकविर्वा यदहं महाकवेः कृतेः तदनुवादस्य च समीक्षायां क्षमो भवेयम्। तथापि तयोरध्ययनेन ये भावा मन्मनस्यागताः तानेव भावानत्र प्रकटयिष्यामि। दोषाः न क्षन्तव्या अपि तु स्पष्टं वक्तव्या भवद्भिर्येन तेषां शुद्धिर्भवेत्।

लेखेऽस्मिन् परिच्छेदद्वये कविताद्वयस्य विचारः करिष्यते। प्रथमे परिच्छेदे होरिखेला इत्यस्य द्वितीये च परिच्छेदे हिं टिं छट् इत्यस्य।

## १. फल्गूत्सवः

इयं कविता कवीन्द्रस्य 'कथा' इति काव्यसङ्ग्रहे 'होरिखेला' इति नाम्ना प्रकाशिता आसीत्। अस्मिन् कवितासङ्ग्रहे प्रायशः कविताः इतिहासगतवृत्ताश्रयिण्यः। राजेन्द्रलालमित्रमहोदयेन सङ्कलिताभ्यः बौद्धकथाभ्यः, टडमहोदयेन सङ्कलितात् राजस्थानस्येतिहासात्, शिखजातेरितिहासाद् भक्तमालग्रन्थविधृतवैष्णवकथाभ्यः आधिक्येन अत्रत्यानां कवितानां कथाः स्वीकृताः।[१] काश्चन कविताः कवेः कल्पितं वृत्तमाश्रित्य। प्रायः पाश्चात्त्यालङ्कारिकैः न्यारेटिभ् इति यदुच्यते अत्रत्यकविताः तच्छ्रेणीयाः। कविः स्वयं कथयति - "ईदृशलेखानाम् उत्कर्षापकर्षविचारः अनावश्यकः, मनस्तत्त्वमस्य चिन्ताया विषयः। रचनायाः प्रवृत्तयो बहवो निष्क्रियास्तिष्ठन्ति, सहसा कश्चन प्रान्तः यदि उद्बोधितो भवति तर्हि ये अज्ञातवासे आसन् ते यथोचितसूत्रेणात्मनः प्रकाशयितुमारभन्ते। सम्यग् विचार्यते चेज् ज्ञायते यत्, 'कथा'याः कविताः न्यारेटिभ्-श्रेण्यां गण्यन्ते चेदपि ताः चित्रशालाः। तासु कथायाः शृङ्खलं ग्रथितं नास्ति, ता एकैकं खण्डदृश्यम्।"[२]

प्रकृता "होरिखेला" इति कविताऽपि राजस्थानस्येतिहासात् स्वीकृतं वृत्तमाश्रित्य रचिता। कविताया रचनाकालः १३०६ वङ्गाब्दस्य कार्तिकमासस्य नवमदिनाङ्क इति सूचितम्। अर्थात् १८२१ वैक्रमाब्दस्य सौरतुलामासस्य नवमो दिनाङ्कः तथा च १८९९ क्रैस्ताब्दस्य अक्टूबरमासस्य अन्तिमभागः। कवितायां चतुर्दशस्तवकानि सन्ति। चतुर्मात्रिकदलवृत्तेन विरचितेयं कविता। प्रतिस्तबकम् अष्टौ पङ्क्तयः। स्तबकस्य द्वितीयषष्ठाष्टमीनां पङ्क्तीनाम् अन्तिमे तथैव तृतीयचतुर्थपञ्चमीनामपि पङ्क्तीनामन्तिमे ध्वनिसाम्यमस्ति। उदाहरणत्वेन प्रथमस्तबकं पश्यामः -

> पत्र दिल पाठान केसर खाँरे
> केतुन हते भूनाग राजार रानी —
> 'लडाइ करि आश मिटेछे मिञा?
> वसन्त याय चोखेर उपर दिया,
> एसो तोमार पाठान सैन्य निया —
> होरि खेलब आमरा राजपुतानी।'
> युद्धे हारि कोटा शहर छाडि
> केतुन हते पत्र दिल रानी।

अत्र द्वितीयषष्ठाष्टमीनाम् अन्तिमे आनी-इति ध्वनिः समानः अस्ति। तथैव तृतीयचतुर्थपञ्चमीनामपि इया-इति ध्वनिः समानः अस्ति।

कविवरेण्यैः फटिकलालदासैः कृतः अस्याः कविताया अनुवादः अपि मूलानुकारी वर्तते। अनुवादकेन उपजातिच्छन्दोनिबद्धाभ्यां पद्याभ्यामेकस्य स्तबकस्यानुवादः प्रस्तुतः। केवलं द्वितीयं पद्यमिन्द्रवज्रायां वर्तते। एवमाहत्य चतुर्दशभिः युग्मकैः समग्राऽपि कविता संस्कृतेनोपनिबद्धा। अर्थात्, मूलकवितायामाहत्य ११२ पङ्क्तयः सन्ति, संस्कृते च ११२ पादैः ताः पङ्क्तयः अनूदिताः। मञ्जूषानाम्न्याः पत्रिकायाः त्रयोदशवर्षस्य चतुर्थ्यां सङ्ख्यायां १९५८ क्रैस्ताब्दस्य अक्टूबरमासे अयमनुवादो मुद्रितः आसीत्।

अनुवादः मूलस्यानुसारी वर्तते। कवीन्द्रकृतीनामनुवादो नैव सुकर इत्यत्र को वा संशीतिलेशः। वैशिष्ट्येन यदा रवीन्द्रनाथस्य कवितायाः पद्यानुवादः क्रियते तदा तु तत्कर्म नितरां क्लिष्टं प्रतिभासाध्यं च भवति। किन्तु तत्कर्मसम्पादनाय प्रतिभायाः प्रज्ञायाश्च

---

[१] 'कथा' इति ग्रन्थस्य प्रथमसंस्करणस्य विज्ञापने कविनैवैतत् सूचितम्।

[२] 'कथा' इति ग्रन्थस्य 'सूचना' इत्यस्मिन्नंशे १९४० ईसवीयाब्दस्य जुलैमासस्य विंशे दिने एतत् कविना लिखितम्। अनुवादः शोधकर्त्रा।

यथार्थः समावेश आसीदेव दासवर्य इति निश्चप्रचम्। प्रकृतकविताया अनुवादे मूलं यथावदनुवदति स्वशब्दैः दासवर्यः। यथा रवीन्द्रनाथस्य सुकुशलं वर्णनं तथैव वर्णनमनुवादेऽपि दृश्यते। यथा वा मूले संलापाः सन्ति, तथा संलापा अपि तेनैव रूपेण अनूदिता वर्तन्ते। यथा -

| | |
|---|---|
| पत्र पड़ि केसर उठे हासि, | पाठानसैन्यैर्महिषी नृपस्य |
| मनेर सुखे गोँफे दिल चाड़ा। | विधास्यते फल्गुविलासलीलाम्। |
| रङिन देखे पागड़ि परे माथे, | ज्ञात्वेति पत्रे स जहास वीरो |
| सुर्मा आँकि दिल आँखिर पाते, | ममार्ज कूर्चं च सहस्रकृत्वः॥ |
| गन्धभरा रुमाल निल हाते — | आवर्त्य हर्षादथ गुम्फकोटी |
| सहस्रवार दाड़ि दिल झाड़ा। | वर्णाढ्यमुष्णीषमधत्त शीर्षे। |
| पाठान साथे होरि खेलबे रानी, | कृत्वा च सुर्माञ्जनलेपमक्ष्णो- |
| केसर हासि गोँफे दिल चाड़ा। | र्जग्राह हस्ते वरकं सुगन्धम्। |

अत्र केसरस्य दाण्डाजिनप्रकटकानि यान्याचरणानि कविना वर्णितानि तानि तयैव भाषया तथैवानूदितान्यनुवादकेन। तथैव "गोँफे दिल चाड़ा" इति वङ्गीयस्य शब्दगुच्छस्य "आवर्त्य गुम्फकोटी" इति सुन्दरः सुललितः सङ्गतः चानुवादो विहितः। ईदृशानि स्थलानि वयमग्रेऽपि प्राप्नुमः। तानि यथास्थलं वक्ष्यामोऽपि।

तृतीयस्तबके यत्र प्रकृत्या वर्णनं क्रियते कविना तत्रापि तत्प्राकृतिकसौन्दर्यं नानुवादेनापहृतम्।

तपस्यमासे मलयाद्रिवातः समाययौ केसरगन्धमत्तः।
वने वने मञ्जरिता रसाला भृङ्गाश्च सौख्यान्मनसो जुगुञ्जुः॥
स्वाधीनचित्ता इव षट्पदास्ते यथेच्छगत्या गगने विचेरुः।
पाठानसैन्याश्च दलैर्विभक्तास्तदागताः केतुनपत्तनान्ते॥

कविना मूले उक्तस्यैकस्यापि पदस्यात्र लोपो न दृश्यते।

चतुर्थस्तबके अपराह्णे राज्ञ्याः परिचारिकाः समागताः इति वर्णितम्। तत्र कवेर्वर्णनमस्ति -

केतुनपुरे राजार उपवने
तखन सबे झिकिमिकिवेला
पाठानेरा दाँड़ाय वने आसि,
मुलतानेते तान धरेछे वाँशि —

यदा सूर्यकिरणाः न सन्तापयन्ति अपि तु उपवनस्थवृक्षपत्राणां मध्यात् पतित्वा चकासति तस्य कालस्य कृते कविः शब्दं प्रयुङ्क्ते "झिकिमिकिवेला" इति। अनुवादकः अस्य अद्भुतमनुवादं करोति - "वेलार्कमन्दीभवदंशुदीप्ता" - अर्कस्य मन्दीभवद्भिः अंशुभिः दीप्ता वेला इति। सुमनोहरमेतत्।

अष्टमनवमस्तबकयोः यत्र केसरः राजस्थाननारीणां कोमलत्वाभावं विस्मितमनसा विचारयति तत्रापि अनुवादः अत्यन्तं सुललितः अस्ति। अत्र नवमस्तबकस्य मूलमनुवादञ्च उल्लिखामि –

| | |
|---|---|
| पाठान कहे 'राजपुतानीर देहे | चख्यौ स वीरः पुनरेव चित्ते |
| कोथाओ किछु नाइ कि कोमलता! | "राजस्थलस्थप्रमदाजनानाम्। |
| बाहुयुगल नग्न मृणालेर मतो, | तनौ न जाने तनुमात्रमास्ते |
| कण्ठस्वरे वज्र लज्जाहत — | कथं न वामोचितपेलवत्वम्॥ |
| बड़ो कठिन शुष्क स्वाधीन यत | मृणालमृद्वी न च बाहुवल्ली |
| मञ्जरीहीन मरुभूमिर लता।' | कण्ठस्वरो निन्दति वज्रनादम्। |
| पाठान भाबे देहे किं वा मने | शुष्काः स्वतन्त्राः कठिना ह्यपुष्पा |
| राजपुतानीर नाइको कोमलता। | लताः किमेता मरुसम्भवा वा॥" |

केवलमत्र "अपुष्पा" इति पदं मूले न दृष्टं, तथा "देहे किंवा मने" इति रवीन्द्रनाथस्य वचनस्य अनुवादे प्रतिफलनं नास्तीव भाति। यतो हि अनुवादे पेलवत्वं तनौ नास्ति इति उक्तमपि मनसि नास्ति इति अनुक्तं दृश्यते।

एकादशस्तबके यत्र राज्ञ्या सह केसरस्य संलापः तत्रापि अनुवादकः मूलं यथावदत्यन्तसुन्दररूपेणानुवदति।

| | |
|---|---|
| केसर कहे, 'तोमारि पथ चेये | उपेत्य वीरो महिषीमवादीत्, |

| | |
|---|---|
| দুটি চক্ষু করেছি প্রায় কানা!' | "প্রায়েণ জাতে তব দেবি মার্গে |
| রানী কহে, 'আমারো সেই দশা।' | নিবদ্ধদৃষ্টের্নযনে মমান্ধে!" |
| | সোচে "দশা সৈব মমাপি বন্ধো"॥ |

इत्थं त्रयोदशस्तबके "विना मेघे वज्रवेर मतो" इति वाक्यस्यानुवादं करोत्यनुवादकः "अनभ्रवज्रस्तनितानुकारि" इति। इत्थं विविधैः सुललितशब्दैः कवीन्द्रस्य भावान् अभिनवपदप्रयोगकौशलेन यथावदनुवदतः दासवर्यस्यायं समग्रोऽप्यनुवादः अतीव मनोहरः समुचितश्चेति निस्सन्देहमेव वक्तुं शक्नुमः।

## २. हिं-टिं-छट्

इयं कविता रवीन्द्रनाथस्य "सोनार तरी" इति काव्यग्रन्थे वर्तते। अत्रत्याः कविताः कविः आधिक्येन पूर्ववङ्गे अवस्थानकाले एव लिखितवान्। काश्चन कविताः शान्तिनिकेतने स्थित्वापि लिखितवान् आसीत्।[३] तासु इयं कविता अन्यतमा। १२९९ वङ्गाब्दस्य ज्यैष्ठमासस्य २२ दिनाङ्के कवितेयं विरचिता। अर्थात् १८९२ ईसवीयाब्दस्य जूनमासस्य मध्यभागे तथा च १८१४ वैक्रमाब्दस्य सौरवृषभमासस्य द्वाविंशे दिने अस्य रचना।

वङ्गीयकाव्येषु मङ्गलकाव्यानां वर्तते महती प्रसिद्धिः। वङ्गीयसाहित्यस्य मध्ययुगे मङ्गलकाव्यानि साहित्यस्य प्रभूतमंशं व्याप्य तिष्ठन्ति स्म। प्रकारेण पुराणसदृशेष्वेषु वाङ्मयेषु देवलीला मर्त्यलीला च मुख्यो विषयो भवति स्म। देवानां माहात्म्यप्रकटनपराणीमानि काव्यानि अद्य यावत् ग्रामेषु नगरेषु च तत्तद्देवभक्तैर्गीयन्ते। मनसामङ्गलं, चण्डीमङ्गलं, धर्ममङ्गलमित्यादीनि मङ्गलकाव्यानि वङ्गप्रदेशे प्रभूतां ख्यातिमध्यगुः। प्रकृता कविता हास्यरसमयी हिं-टिं-छट् इति मङ्गलकाव्यशैल्या कवीन्द्रेण विरचिता वर्तते। अतः कवितााया उपशीर्षकमपि दत्तं स्वप्नमङ्गलमिति। हबुचन्द्र इति प्रसिद्धः मूर्खराट् कस्यचिद्राज्यस्य राजा, तस्य च मूर्खतरो मन्त्री गबुचन्द्र इति काल्पनिके चरित्रे वङ्गीयसाहित्ये प्रसिद्धे। उभयोः मौर्ख्यप्रचारिकाः लोककथाः लोकमुखेषु प्रचरन्ति। हबुचन्द्रेण कश्चन स्वप्नः कस्याञ्चिद्यामिन्यां दृष्टः। तस्य स्वप्नस्यार्थमवगन्तुमक्षमेण तेन किं किमाचरितमिति वर्णनपरायामस्यां कवितायामनाविलो हास्यरसः स्फुरति प्रतिपदम्। फटिकलालदासवर्यः तस्याः कविताया अनुवादे प्रबलं पाटवं प्रदर्शयामास। मूले इव अत्रापि सुमहान् हास्यरसः निरर्गलं स्फुरति प्रतिपङ्क्ति। रवीन्द्रनाथेन अस्याः कविताया उपशीर्षकं दत्तमासीत् स्वप्नमङ्गलमिति, अनुवादकेन तु उपशीर्षकं दत्तं राजस्वप्न इति।

कवितायां दश स्तवकानि सन्ति। कवितेयं वस्वृतुयतियुतमिश्रवृत्तेन विरचिता। पङ्क्तियुगलयोरन्तिमे ध्वनिसाम्यमस्ति। स्तबकेषु पङ्क्तीनां सङ्ख्या नियता नास्ति। प्रथम-षष्ठस्तबकयोः अष्टादशपङ्क्तयः, द्वितीय-तुर्य-दशमस्तबकेषु चतुर्दश, अवशिष्टेषु च स्तबकेषु षोडश पङ्क्तयः सन्ति। किन्तु प्रतिस्तबकम् अन्ते मङ्गलकाव्यशैल्या काव्यस्यामृततुल्यत्वं, कवेर्नामकीर्तनं, श्रवणेन पुण्यलाभश्च कीर्त्यते। एवमेव अन्तिमस्तबके अस्य काव्यस्य फलश्रुतिकथनमपि दृश्यते।

अनुवादकेन उपजातिच्छन्दसा आसां पङ्क्तीनामनुवादः प्रस्तुतः। मूले इव अत्रापि दश स्तवकानि सन्ति। किन्तु स्तबकस्य श्लोकसङ्ख्या नियता नास्ति। प्रथमस्तबके सप्त, द्वितीये नवमे दशमे च पञ्च, तृतीयात् अष्टमं यावत् प्रतिस्तबकं षट् इत्येवं क्रमेण अष्टपञ्चाशद्भिः श्लोकैः सम्पूर्णा कविता अनूदिता।

कवितायां प्रतिस्तबकमन्तिमे पङ्क्ती भवतः -

স্বপ্নমঙ্গলের কথা অমৃতসমান।
গৌড়ানন্দ কবি ভণে শোনে পুণ্যবান्। इति।

तस्यानुवादस्त्वित्थम् -

स्वप्नाश्रितं मङ्गलकाव्यमेतन्मर्त्येऽत्र लोके सुरपेयतुल्यम्।
वक्तास्य गौडीयकविर्वरेण्यः श्रोतास्य विश्वे धृतपुण्यवृत्तिः॥ इति।

मूले इव अत्रापि प्रतिस्तबकमन्तेऽयं श्लोको वर्तते। अनुवादः मूलं यथार्थतः अनुसरति। हास्यरसमयी कविता अनुवादेऽपि हास्यं जनयत्येव। पदप्रयोगः सुमनोहरो वर्तते इति तु वक्तव्यं नास्ति पुनः। प्रथमे स्तबके स्वप्नस्य वर्णने एव सुतरां पाटवं प्रदर्शितमनुवादकेन। मूलं तदनुवादं च किञ्चित् पश्यामः –

| | |
|---|---|
| শিয়রে বসিয়ে যেন তিনটে বাঁদরে | त्रयः प्लवङ्गा नृपमूर्धजस्थान् |
| উকুন বাছিতেছিল পরম আদরে। | समुद्धरन्ते तरसा स्म यूकान्। |
| একটু নড়িতে গেলে গালে মারে চড়, | दभ्राङ्गकम्पे तु कपोलयुग्मे |
| চোখে মুখে লাগে তার নখের আঁচড়। | नखक्षतैस्ते ददते चपेटाम्॥ |

---

[३]सोनार तरी काव्यग्रन्थस्य सूचना-भागे एतत् कविना सूचितम्।

तत्रैव प्रथमस्तबके

पाखिर मतन राजा करे झट्पट्,
वेदे काने काने वले — 'हिं टिं छट्।'

इति पङ्क्तिद्वयस्यानुवादः अत्यन्तं सरसः।

पक्षीव राजाऽस्थिरतां गतोऽभूत् तद्वीक्ष्य तूर्णं समुपेत्य पार्श्वम्।
चक्राट ऊचे श्रवणस्य मूले हिं-टिं-छडेतत्त्रिकमक्षराणाम्॥ इति।

द्वितीयस्तबकस्यानुवादोऽपि नितरां सरसो वर्तते। केवलं मूले हबुचन्द्रस्य राज्यस्य नाम उल्लिखति कविः हबुपुरमिति। किन्तु अनुवादे राज्यस्य नाम नोल्लिखितम्। तथैव

विशुष्कगण्डाहितशीर्णहस्तास्तस्थुश्च लोका नतमस्तकेन

इति पङ्क्तौ शीर्णहस्ता इति यदुक्तं तन्मूले न वर्तते। मूले तु शीर्णत्वं गण्डस्यैवोक्तं न तु हस्तस्य।

एवमेव तृतीयस्तबकं पश्यामः -

| | |
|---|---|
| चारि दिक हते एल पण्डितेर दल— | कनोजकाञ्चीमगधादिभूषा |
| अयोध्या कनोज काञ्ची मगध कोशल। | दिग्भ्यश्चतुर्भ्यो विबुधाः समेताः। |
| उज्जयिनी हते एल बुध-अवतंस | श्रीकालिदासस्वसुरेव वंशात् |
| कालिदास-कवीन्द्रेर भागिनेयवंश। | समागतश्चापि बुधावतंसः॥ |
| मोटा मोटा पुँथि लये उलटाय पाता, | व्यावर्तयन्तो बृहतां बुधास्ते |
| घन घन नाड़े वसि टिकिसुद्ध माथा। | जीर्णानि पत्राण्यथ पुस्तकानाम्। |
| | शिखासमेतं निजमुत्तमाङ्गम् |
| | आन्दोलयामासुरशेषवारान्॥ |

अत्र केवलं कनोजकाञ्ची इति पदप्रयोगे कनोजशब्दो वङ्गे कान्यकुब्जस्य अपभ्रंशत्वेन व्यवह्रियते। अनुवादकस्तु कनोज इत्येव शब्दं प्रयुङ्क्ते छन्दोरक्षायै। (कनोज इति प्रयोगः संस्कृतवाङ्मये कुत्रचिदस्ति वा?)

चतुर्थस्तबके तु अनुवादः मनोहरोऽपि स्थलद्वये किञ्चिदिव व्यत्यस्तम्। तत्र धनक्षये नास्ति ममापि दुःखमिति द्वितीयश्लोकस्य द्वितीयः पादः। अयमंशो मूले नास्ति। द्वितीयतः, तृतीयश्लोके यवनपण्डितानां विशेषणत्वेन शशिशुभ्रवर्णाः इति यदुक्तं तदपि मूले न वर्तते।

षष्ठस्तबके "दुपुरे डाकाति" इति वङ्गीयाभाणकस्य सुन्दरतरमनुवादं प्रस्तौति अनुवादकः - "माध्याह्निकी सा ननु दस्युता स्यात्" इति। किन्तु यत्र "नयनाश्रुनीरे" इति प्रयुङ्क्ते चतुर्थश्लोके तत्र मूले तु वर्तते "आनन्दाश्रुनीरे" इति।

सप्तमस्तबकस्यानुवादः अनुपम एव।

| | |
|---|---|
| अतःपर गौड़ हते एल हेन वेला | अत्रान्तरे तत्र समागतोऽभूत् |
| यवन पण्डितदेर गुरुमारा चेला। | सज्जाविहीनस्त्रपयापि शून्यः। |
| नग्नशिर, सज्जा नाइ, लज्जा नाइ धड़े — | गौडोद्भवो यावनपण्डितानां |
| काछा-कोँचा शतवार खसे खसे पड़े। | सुनग्नशीर्षो गुरुघातिशिष्यः॥ |
| अस्तित्व आछे ना आछे, क्षीण खर्वदेह, | पश्चात्पुरस्स्थौ वसनान्तभागौ |
| वाक्य यवे बाहिराय ना थाके सन्देह। | स्थितौ गलन्तौ शतकृत्व एव। |
| | अस्त्येव नो वा कृशखर्वदेहो |
| | गम्योऽभवत् केवलवाक्यवर्षात्॥ |

अत्रापि पञ्चमश्लोके आकर्ण्यविद्यामदमिश्रवाचमिति मूले न वर्तते।

अग्रिमेऽपि स्तबके सृष्टेर्विधातुः प्रथमप्रकाशे इति पङ्क्तौ "त्रिसङ्ख्याकास्ते गुणवह्निकालाः" इति अनुवादः किन्तु मूले वर्तते शिवस्य त्रीणि नयनानि इति। अनुवादे तत्स्थले एव वह्नेः प्रयोगः कृतः।

किन्तु एते ये अंशा मूलाद् भिद्यन्ते न तत्र कोऽपि दोषः। यतो हि अनुवादक आदावेव कथयति यत् अयं तात्पर्यानुवाद इति। एवञ्च रवीन्द्रनाथस्य बह्वीनां कवितानां सुललितमनुवादं प्रस्तूय दासवर्येण महदुपकृतम्। तेऽनुवादा अस्माकमादर्शा भवेयुः।

✦ ✦ ✦

## उपयुक्ता ग्रन्थाः


१. प्रभातकुमारमुखोपाध्यायादिभिः सम्पादितायाः पश्चिमवङ्गराज्यस्य शिक्षासचिवेन १९८० क्रैस्ताब्दे प्रकाशिताया रवीन्द्ररचनावल्याः प्रथमः खण्डः।

२. क्षितीशचन्द्रचट्टोपाध्यायेन सम्पादिताया मञ्जूषापत्रिकायाः त्रयोदशवर्षस्य (१९५८ वर्षस्य) चतुर्थी षष्ठी च सङ्ख्या।

☆ ☆ ☆

# *Vibhakti* Divergence Between Sanskrit and Bengali


Abstract

Obtaining correct translation through system is not possible without identifying the divergences between a pair of language. A lot of work has been done to identify the divergences between Sanskrit, Hindi and English. This paper is a modest effort to study the*Vibhakti* Divergence between Sanskrit and Bengali and to classify them in standard divisions proposed by Shukla et.al. In addition to that an exclusive list of *vibhaktis* and post-positions that replace *Vibhaktis* in Bengali are prepared with elaboration.


## 0. Introduction

Obtaining correct translation through system is not possible without identifying the divergences between a pair of language. A lot of work has been done to study divergence between various pairs of Indian languages. Translation divergence patterns have been discussed by Dorr[Dorr, 1994] and Goyal and Sinha[Goyal and Sinha, 2009]. Beside them the significant works done are English-Hindi MT[Dave et.al., 2002], English-Sanskrit MT[Mishra and Mishra, 2008], *Vibhakti* Divergence between Sanskrit and Hindi[Shukla et.al.] etc.

Bengali and Sanskrit belong to the same Indo-Aryan family. Bengali owes a lot from Sanskrit - both in terms of its structure and lexicon. It also follows the well-known *Kāraka* system proposed by *Pāṇini*. But there are certain features in Bengali that are completely different from Sanskrit. Especially a lot of divergence is observed at the level of *sup* and *tiṅ* i.e. nominal and verbal suffixes.

In this paper, an effort is made to point out the divergences in the use of *sup-vibhaktis* (henceforth called as *vibhakti*) i.e. the nominal suffixes between Bengali and Sanskrit. Shukla et. al. has proposed a Classification of Divergences to mark the divergences of nominal suffixes between Sanskrit and Hindi. The *vibhakti* divergences between Sanskrit and Bengali will be classified using the same classes they have proposed.

## 1. *Vibhaktis* in Bengali

Since, structurally Bengali is a agglutinating language[1], syntactically and semantically the *vibhaktis* play a key role in a sentence.

In Bengali we get *vibhaktis* mainly in three forms-

### 1.1 ø (no special sign of *vibhakti*)

In Bengali *kartā* and *karma* is often denoted with ø. In Bengali we call it as *śūnya-vibhakti*. Generally it replaces *prathamā* and *dvitīya* in Sanskrit.

**Illustrations**

Ben. – *garu ghāsa khāya*
San. – *gauḥ ghāsam khādati*
Eng. – cow eats grass.

Here, both *garu(kartā*) and *ghāsa(karma)* have ø *vibhakti*.

### 1.2 Suffix

There are some suffixes that denotes various *kārakas* in Bengali. They are mainly 4 in number. Those suffixes are listed here.

***ke***- This suffix mainly denotes *karma* and *sampradāna*. Generally replaces *dvitīyā* and *caturthī* in Sanskrit.

**Illustrations**

Ben. – *chātrake mero nā*
San. – *chātram mā tāḍaya*
Eng.- don't beat the student.

*Chatra* is *karma* here. It takes *ke vibhakti* .

Ben. – *daridrake dāna karo*
San. – *daridrāya dānaṃ kuru*

[1] p. 444, *Sādhāraṇa Bhāṣāvijñāna o Bāṃlā Bhāṣā*, Shaw R., Pustaka Vipani, Kolkata, 3rd ed., 1996

Eng. - give the poor.

Here *daridra (sampradāna)* takes *ke vibhakti* .

But in a sentence where both are present, ke is used to denote the sampradāna only. For example-

Ben. – *daridrake artha dāo*
San. – *daridryāya artham dehi*
Eng. - give money to the poor.

Here *daridra (sampradāna)* takes *ke vibhakti* and *artha (karma)* takes ø.

***re-*** This is another form of ke only. Often used in poems.

**Illustrations**

Ben. – *āmi tāre dekhechi*
San. – *aham tam apaśyam*
Eng. – I have seen him.

Here *tāre(karma)* takes *re* .

Ben. – *āmi tāre diyechi*
San. – *ahaṃ tasmai adadām*
Eng. – I have given him.

Here *tāre (sampradāna)* takes *re*.

***te/e/ya -*** These *vibhaktis* are the most ambiguious *vibhaktis* in Bengali. Almost all *kārakas* are denoted by them. These *vibhaktis* are similar in action. The only differnce is they can be used with certain roots. For instance, the root *ghar* takes *e vibhakti*. The root *nadī* takes *te vibhakti*. The root *latā* takes *ya vibhakti*. By default these denote *adhikaraṇa*. But they are found to be denoting all *kārakas* and non-*kāraka* relations. It replaces almost all the *vibhaktis* in Sanskrit except *ṣaṣṭhī*.

**Illustrations**

Ben. – *biḍāle dudh kheyeche*
San. – *biḍālaḥ dugdhaṃ pītavān*
Eng. – cat has drank milk.

Here *biḍāla(kartā)* takes *e-vibhakti*. It replaces *prathamā*.

Ben. – *āmāya mero nā*
San. – *māṃ mā tāḍaya*
Eng. – don't beat me.

Here *āmāya(karma)* takes *ya-vibhakti*. It replaces *dvitīyā*.

Ben. – *auṣadhe śarīra sustha haya*
San. – *auṣdhena śarīram svasthaṃ bhavati*
Eng. – The body remains healthy by medicines

Here *auṣadha(karaṇa)* takes *e*. It replaces *tṛitīyā*.

Ben. – *āmāya ektu jāyagā dāo*
San. – *mahyaṃ kiñcit sthalaṃ dehi*
Eng. – Please give me some place.

Here *āmāya(sampradāna)* takes *ya-vibhakti*. It replaces *caturthī*

Ben. – *āmāke paḍāya virata kara nā*
San. – *māṃ paṭhanāt mā viramaya*
Eng. – Don't forbid me from study

Here *paḍā (apādāna)* takes *ya-vibhakti*. It replaces *pañcamī*.

Ben. – *bālatite jala nei*
San - *droṇyāṃ jalaṃ nāsti*
Eng. – There is no water in the bucket.

Here *bālati(adhikaraṇa)* takes *te-vibhakti*. It replaces *saptamī*.

**ra/era -** These two *vibhaktis* replaces *ṣaṣṭhī*. Any one of the two is used with specific root.

**Illustrations**

Ben. – *eṭā śyāmera bai*
San. – *idaṃ śyāmsya pustakaṃ*
Eng. – This book belongs to Shyama.

The root *śyāma*, to whom the book belongs to, takes *re-vibhakti*. It replaces *ṣaṣṭhī*.

Ben. – *gaṅgāra jala pavitra*
San. - *gaṅgāyāḥ jalaṃ pavitraṃ*
Eng. – Sacred is the water of the Ganga.

Here the root *gaṅgā* takes *ra-vibhakti*.

### 1.3 Post-positions

There are some post-positions that denote certain *kārakas*. Hence they are considered as *vibhaktis* here. These post-positions generally are placed after the root. In some cases the root followed by the post-position optionally takes *ra-vibhakti*. There are three such post-positions in Bengali.

**dvārā-** This is used to denote *kartā* or *karaṇa*. It replaces *tṛtīyā*. The root followed by this post-position must take *ra/era*.

**Illustration**

Ben. – *kālidāśera dvārā meghadūta racita hayeche*
San.- *kālidāśena meghadūtaṃ racitaṃ*
Eng. – Meghaduta is composed by Kalidasa.

Here *dvārā* marks out the *kartṛtva* in *kālidāsa*.

Ben. - *mānuṣa buddhira dvārā unnati kareche*
San. – *manuṣyaḥ buddhyā unnatimakarot*
Eng. – Man has made development by intelligence.

Here *dvārā* denotes the *karaṇatva* in *buddhi*.

**diye-** This post-position is used to denote *kartā* or *karaṇa* or *apādāna*. When it is followed by a word that ends with *ke-vibhakti*, it denotes *kartā*. When it follows a root with *śūnya-vibhakti* it denotes either *karaṇa* or *apādāna*.

**Illustration**

Ben. – *govindake diye kavitā lekhā habe nā*
San. – *govindena padya-racanaṃ na bhaviṣyati*
Eng. – Govinda may not be able to compose poems.

Here *diye* followed by *govinda* ending with *ke-vibhakti* shows that *Govinda* is *kartā*.

Ben. -*āmi cāmaca diye khācchi*
San. – *ahaṃ camasena khādāmi*
Eng. – I am eating with spoon.

Here *cāmaca* followed by *diye* denotes *karaṇa*.

Ben. - *sītāra cokha diye jala paḍache*
San. - *sītāyāḥ netrāt jalaṃ patati*
Eng. – Tears are coming out of Sita's eye.

Here *diye* followed by *cokha* that is *apādāna*.

**theke -** This is used to denote *apādāna*. It follows a root with *śūnya-vibhakti*. It replaces *pañcamī* in Sanskrit.

**Illustration**

Ben. - *gācha theke phala paḍeche*
San. - *vṛkṣāt phalaṃ apatat*
Eng. – Fruit fell from tree.

Here *gācha* followed by *theke* is *apādāna*.

## 2. Classification of Divergences

As told before, Bengali has certain features that are completely different from Sanskrit. Hence, the system of assigning *vibhakti* proposed by *Pāṇini* does not fit well as-it-is for Bengali. Unfortunately, a grammar for Bengali in the style of *Aṣṭādhyāyī* is not available. It would have been a simple task to mark out the divergences if such a grammar were available for Bengali. In the absence of such a grammar a deep study of the corpus may be helpful to point out the divergences between Bengali and Sanskrit. Here the corpus for Bengali prepared by TDIL has been used for the same purpose.

As the *vibhaktis* are not *kāraka* specific in Bengali, the scope of divergence is much higher, even for non-*karaka-vibhaktis* a lot of divergences can be found. A list of the *Aṣṭādhyāyī sūtras* where divergences are seen have been prepared here under various classifications. Some cases are also elaborated with examples.

### 2.1 Optional Divergence

Table 1 lists the *sūtras* which accounts for an additional optional *vibhakti* in Sanskrit either on account of imposed *kāraka* or on account of special *vibhakti* assignment. In all these cases Bengali allows only one *vibhakti*.

| *Sūtra* | Sanskrit | | Bengali | |
|---|---|---|---|---|
| *Parikrayaṇe sampradānam anyatarasyāṃ* | *karaṇaṃ, sampradānaṃ* | 3, 4 | *karaṇaṃ* | 3(te/e/ya) |
| *Hṛkroranyatara-syām* | *Kartā, Karma* | 2, 3 | *Kartā* | 3*(diye)* |
| *Sañjño'nyatarasyāṃ Karmaṇi* | *Karma* | 2, 6 | *karma* | 2(ke) |
| *Saptamīpañcamyau Kārakamadhye* | – | 5, 7 | – | 7(e/te/ya) |
| *Vibhāṣā Guṇe'striyām* | – | 3, 5 | – | 3(e/te/ya,dvārā) |
| *Prasitotsukābhyāṃ Tṛtīyā Ca* | – | 3, 7 | – | 7(e/te/ya) |

Table 1

Here we will have examples of *parikrayaṇe sampradānam anyatarasyāṃ*.

Ben. - *ekaśa ṭākāya ekajana karmacārī rākhā hayeche.*
San. - *śatena rūpyakaiḥ/śatāya rūpyakebhyaḥ kaścana karma-karaḥ niyuktaḥ.*
Eng. - A person has been employed for hundred rupees.

Here *śata* is *karaṇaṃ*. But it optionally becomes *sampradānaṃ* and hence takes *caturthī*. In Bengali it is used with te/e/ya that supposed to be replacing *tṛtīyā*.

### 2.2 Exceptional Divergence

Table 2 lists the *sūtras* which accunt for non-default *vibhaktis* in Sanskrit by imposing a new *kāraka* or by imposing an totally different *vibhakti*. In all these cases Bengali takes the default *vibhakti*.

| *Sūtra* | Sanskrit | | Bengali | |
|---|---|---|---|---|
| *Adhiśīṅsthāsāṃ Karma* | *karma* | 2 | *adhikaraṇaṃ* | 7(te/e/ya) |
| *Abhiniviśaśca* | *karma* | 2 | *adhikaraṇaṃ* | 7(te/e/ya) |
| *Upānvadhyāṅ Vasaḥ* | *karma* | 2 | *adhikaraṇaṃ* | 7(te/e/ya) |
| *Kṛtvo'rthaprayoge Kāle'dhikaraṇe* | *adhikaraṇaṃ* | 6,7 | *adhikaraṇaṃ* | 7(e/te/ya) |

Table 2

Some elaborations may be discussed.

Ben. - *bālakati dine dubāra snāna kare.*
San. - *bālakaḥ dinasya/dine dviḥ snāti.*
Eng. - The boy bathes twice a day.

Here the *adhikaraṇaṃ dina* is in *e-vibhakti* that replaced the *saptamī* in Sanskrit.

### 2.3 Differential Divergence

Table 3 lists the *sūtras/vārtikas* where a certain *vibhakti* is assigned either through *kāraka* or by direct assignment. But Bengali uses entirely different *vibhakti*.

| *Sūtra* | Sanskrit | | Bengali | |
|---|---|---|---|---|
| *Akarmakadhātubhir-yoge Deśaḥ Kālo Bhāvo…* | *Karma* | 2 | *Adhikaraṇaṃ* | 7(*te/e/ya*) |
| *Ślāghahnuṅsthā-śapāṃ Jñīpsya-mānaḥ* | *Sampradānam* | 4 | *Karma* | 2(*ke*) |
| *Rucyarthānāṃ Prīyamāṇaḥ* | *Sampradānam* | 4 | – | 6(*ra/era*) |
| *Nimittāt karmayoge* | – | 7 | – | 6 with janya/nimitta |

Table 3

This example may be of taken.

Ben. - *Devadattera miṣṭi bhālo lage/pachanda.*
San. - *devadattāya modakaḥ rocate.*
Eng. - Devadatta is fond of sweets.

Here in Sanskrit Devadatta is *Sampradānam*, hence, takes *caturthī*. But in Bengali it ends with *ṣaṣṭhī* i.e. *ra*.
Another Example is -

Ben. - *Dantera janya hātike māre*
San. - *dantayorhanti gajaṃ*
Eng. - Kills elephant for its tusk

Here *danta* is *nimitta* hence, marked with *saptamī*. But in Bengali it is marked with *ṣaṣṭhī* followed by *janya* that is used to denote *prayojana*.

### 2.4 Alternative Divergence

Table 4 lists the *sūtras/vārtikas* where more than one *vibhaktis* are assigned either through *kāraka* or by direct assignment. But Bengali uses only a few of them or some entirely different *vibhakti*.

| *Sūtra* | Sanskrit | | Bengali | |
|---|---|---|---|---|
| *Gatyarthakarmaṇi dvitīyācaturthyau ceṣṭāyāmanadhvani* | *karma* | 2, 4 | – | 2, 7 |
| *Pṛthagvinānānābhis tṛtīya'nyatarasyām* | – | 2, 3, 5 | – | 2 with *vinā*, 5 with *Pṛthak*. Never 3 |
| *dūrāntikārthaiḥ ṣaṣṭhyanyatarasyāṃ* | – | 5, 6 | – | 5 for *dūra* and 5, 6 with *antika* |
| *Svāmīśvarādhipati-dāyāda sākṣi-pratibhūprasūtaiśca* | – | 7 | – | 6(ra/era) |
| *Āyuktakuśalābhyāṃ Cāsevāyām* | – | 6, 7 | – | 7(e/te/ya) |
| *Tulyārthairatulo-pamābhyāṃ Tṛtīyānyatarasyām* | – | 3, 6 | – | 6 |

| | | | | |
|---|---|---|---|---|
| *Caturthī Cāśiṣyāyuṣyamadra bhadrakuśalasukhā-rthahitaiḥ* | – | 4, 6 | – | 6 |
| *Yataśca Nirdhāraṇam* | – | 6, 7 | – | 6 with *madhye* |

Table 4

Some examples are here.

Ben. - *bālaka bāḍi/bāḍite jāya*
San. - *bālakaḥ gṛhaṃ/gṛhāya gacchati*
Eng. - The boy goes home.

Here *bāḍi(karma)* takes *śunya-vibhakti* for *karma* by default and optionally takes *te* supposed to be denoting *adhikaraṇa*.

Ben. - *kavidera madhye kālidāsa śreṣṭha*
San. - *kaviṣu/kavīnāṃ kālidāsaḥ śreṣṭhaḥ*
Eng. - Kalidasa is the best among the poets.

Here *śaśṭhī/saptamī* is replaced with *dera* (plural form of *ra/era*) and is followed by a *madhye*.

Ben. - *arjunera tulya vīra nei.*
San. - *arjunena/arjunasya tulyaḥ vīraḥ nāsti.*
Eng. - None is as courageous as Arjuna

**2.5 *Non-Kāraka* Divergence**

Table 5 lists the *sūtras/vārtikas* that assignes special *vibhaktis* due to relation to certain *upapadas*. However, Bengali uses different *vibhaktis* in those cases.

| *Sūtra* | Sanskrit | | Bengali | |
|---|---|---|---|---|
| *Pratinidhipratidāne ca yasmāt* | – | 5 | – | 6 |
| *Sahayukte'pradhāne* | – | 3 | – | 6(ra/era) |
| *Abhitaḥparitaḥ-samayānikaṣāhā-pratiyoge'pi* | – | 2 | – | 6 |
| *Akartaryṛṇe Pañcamī* | – | 5 | – | *e/te/ya* replacing 3/7 |

Table 5

Some examples are here.

Ben. - *ekaśa ṭākāya baddha*
San. - *śatād baddhaḥ*
Eng. - Bound for hundred rupees.

Here *pañcamī* is replaced with *ya*.

**2.6 Bengali Specific Divergence**

As proposed in the paper of Shukla et.al. Language Specific Divergence are of two types for Hindi - Verbal Divergence and Complex-Predicate Divergence. For Bengali also we can find those types of divergences. Some divergences can be attributed to special features of Bengali.

**2.6.1 Verbal Divergence-** The *karma* of the verb *caḍā* (to climb) in Bengali, takes *śūnya-vibhakti* (default *vibhakti* for *karma*) and optionally takes *e/te/ya* (default *vibhakti* for *adhikaraṇa*). But it never supports *ke* that is another default *vibhakti* for *karma*.

Ben. - *se ghoḍā/ghoḍāte/ghoḍāya caḍe*

San. - *saḥ aśvam ārohati.*
Eng. - He rides horse.

But as told before, *se ghoḍāke caḍe* is not a possible formation.

There are some other special cases where verbs are responsible for divergences.

**2.6.2 Complex Predicate Divergence-** Some examples of complex predicate divergence in Bengali are shown here.

For the cases of *bhayārthaka dhātu* in Sanskrit the *Bhayahetu* is *apādānaṃ* and takes *pañcamī*. But in Bengali it optionally takes *theke(pañcamī) ke-vibhakti* normally used to denote *karma* and *sampradāna* or *e/te/ya*.

Ben. - *āmi sāpake/sāpera theke/sāpe bhaya pāi*
San. - *aham sarpād bibhemi*
Eng. - I am afraid of snake.

As there is no direct root for being afraid in Bengali, always a complex-predicate form *bhaya_-pāoā* or *bhaya_karā* is used. Hence, this divergence is classified under Bengali Specific Divergences and not in general divergence classes. This is to be noted that the same *sūtra* is followed as-it-is for the verb *trā*. For example -

Ben. - *Vipad theke āmāke trāṇa kara*
San. - *Vipadaḥ māṃ trāhi.*
Eng. - Save me from danger.

Here *vipad* has the same *vibhakti* as in Sanskrit.

Another example of this type of divergence is -

Ben. - *mā cheleke sneha kare*
San. - *mātā putre snihyati*
Eng. - Mother is affectionate to son.

Here in Sanskrit *putra* is *saptamyanta*, whereas in Bengali it ends with *ke* (replaces *dvitīyā* in Sanskrit. But if the structure changes and *sneha* becomes the *kartā* the subject to *sneha* takes *ra/era* followed by *upara/prati*.

Ben. - *māyera chelera prati sneha āche*
San. - *mātuḥ putrasya viṣaye snehaḥ asti*
Eng. - Mother has affection on son.

These are some examples.

## 3. Conclusion

In this paper an exclusive list of Bengali *Vibhakti* is prepared with elaborations and a modest effort has been made to point out the divergences in *sup-vibhakti* between Sanskrit and Bengali.

However, there are some other functional words that are neither *vibhaktis* nor post-positions, but are used to make exact translations of Sanskrit *vibhaktis*. *madhye, upare* etc. are some of them. They also lead to ambiguity and divergences.

A deeper study of corpus is to be made to point out all the exact places where divergences are found. This study may prove useful in resolving the *vibhakti*-level ambiguity in Bengali. This may also prove useful in some Bengali Machine Translation System. It may further help in pointing out the *vibhakti*-level divergences between various pairs of Indian languages.

✦ ✦ ✦

**Acknowledgement**

I gratefully acknowledge Prof. Amba Kulkarni, Preeti Shukla, and Devanand Shukla for their paper *Vibhakti* Divergence between Sanskrit and Hindi. This paper may be treated as an extension of that work only.

## References


1. Bonnie Dorr. *Classification of Machine Translation Divergence and a proposed Solution*. Computational Linguistics 20(4). 1994.
2. S Dave, J Parikh, P Bhattacharya. *Interlingua Based English-Hindi Machine Translation and Language Divergence*. JMT 17. 2002.
3. P Goyal, R Sinha, and K Mahesh. *Translation Divergence in English-Sanskrit-Hindi Language Pairs*. Sanskrit Computational Linguistics, Proceedings of Third International Symposium, Hyderabad. Springer-Verlag, Germany.
4. P Shukla, D Shukla, A Kulkarni.*Vibhakti Divergence between Sanskrit and Hindi.* Sanskrit Computational Linguistics, Proceedings of Fourth International Symposium, New Delhi. Springer-Verlag, Germany.
5. Giridharasharma Caturveda & Parameshwrananda Sharma. *Vaiyākaraṇasiddhāntakaumudi(Bālamanoramā-Tattvabodhinisahitā)*, Motilal Banarasidas, New Delhi.
6. P Dasgupta. *Kāraka : Duḥsvapnera Avasāna*, Ray, Shivanarayana (ed.) Jijnasa 5th year, 2nd volume
7. Rameshwara Shaw. *Sādhāraṇa bhāṣāvijñāna o Bāṃlā Bhāṣā*, Pustaka Vipani, Kolkata.
8. P Lahiri & H Shastri. *Pāṇinīyam : A Higher Sanskrit Grammar and Composition*. The Dhaka Students Library, Kolkata.


☆ ☆ ☆

# उत्फुल्लम् अन्तरङ्गम्[१]

(जनार्दनहेगडेवर्यकृतकथाग्रन्थस्य समीक्षा)

## भूमिका

सुप्रथितयशसां बहुशास्त्रपारङ्गमानां संस्कृतवाङ्मये अलङ्कारशास्त्रे च निर्बाधगतिमताम् आचार्याणां जनार्दनहेगडेवर्याणाम् उत्फुल्लम् अन्तरङ्गं सहृदयानाम् अन्तरङ्गम् उत्फुल्लयन् समाजस्य विविधाः समस्याः तेषां हृदयेषु दृढमङ्कयति। अयं कथासङ्ग्रहः २०१३ क्रैस्ताब्दे पुस्तकरूपं दधानः प्राकट्यम् अगात्। अयं कथासङ्ग्रहः कथाकारस्य चतुर्थकथासङ्ग्रहः। सङ्कलितासु पञ्चदशसु कथासु विषयवैचित्र्यम् अस्ति। क्वचित् प्रेम, क्वचिद् देशभक्तिः, क्वचित् परसेवापरायणत्वं, क्वचिद् अलौकिकत्वं, क्वचिज् जीवनशक्तेः निरन्तरं वहमानं विपुलं स्रोतः– इत्थं बहुविधानि तत्त्वानि आश्रित्य घटनाबहुलाः पात्रबहुलाः च इमाः कथा अवतारिताः। कथाग्रन्थस्य भूमिकायां लेखकः स्पष्टं सूचयति यत् कथालेखनाय विशिष्य परिश्रमेण इमाः कथा न पल्लविताः। अपि च तदा तदा मनसि उद्गतानां भावानां संरक्षणेन प्राप्ते अवसरे तेषां भावानां निरूपणेन इमाः कथाः सृष्टाः। तेन कदाचिद् आदौ उद्भूतः भावः कथालेखनकाले किञ्चिदिव परिवर्तिता अपि। तथा च, “प्रथमस्फुरणावसरे, मनसि आवर्तमाना यदा भवति तदा वा, कथायाः यत् रूपं भवेत् तदेव लेखनावसरे अपि भवेत् इति न नियमः। वस्तुतः लेखनावसरे यत् रूपं स्यात् तदेव स्थिरम्। ... अतः एव केचन कथाकाराः लेखनावसरे दीर्घकालं यावत् अपि समयस्य बाधा यथा न भवेत् तथा व्यवस्थां चिन्तयन्ति, कथायाः स्वरूपकल्पने जागरूकतां वहन्ति च। तां च जागरूकतां क्वचित् अहं वोढुं न शक्तवान्। तस्य परिणामः अपि कथासु दृश्येत एव प्रायः।” इति ग्रन्थस्य भूमिकायां लेखकेन स्वयम् उल्लिखितम्। एतेन सदाकार्यव्यग्रस्य लेखकस्य कथालेखनकाले मनोदशां वयं कल्पयामः।

शिल्पी स्वशिल्पं स्वापत्यम् इव सृजति। अपत्यसर्जने मनुष्यस्य स्वातन्त्र्यं न भवति। अपत्यस्य रूपगुणस्वभावादयः भवन्ति नियतिनियताः। किन्तु शिल्पी शिल्पं सृजन् स्वातन्त्र्यं वहति। स्वातन्त्र्यस्य अपरं रूपं च दायित्वम्। शिल्पी समाजस्य मार्गनिर्देशकः भवति। अद्यत्वे तु केवलाय आत्मानन्दाय, मनोरञ्जनाय च शिल्पं सृज्यते। क्वचित् सोद्देश्यं समाजम् अन्यथाकर्तुं, संस्कारपरम्परादिमानवैश्वर्यं नाशयितुं च विशेषप्रयत्नेन शिल्पस्य उपयोगः क्रियते। एतच्च पारतन्त्र्यवशात् क्रियते। केचन अर्थादिपारतन्त्र्येण एतत् कुर्वन्ति, केचिद् यशःपुरस्कारादिप्राप्तुकामा इत्थम् आचरन्ति, केचित् पुनः अज्ञानपारतन्त्र्येण एव परम्परां संस्कृतिं च नाशयितुं यतमानाः शिल्पम् अस्त्रत्वेन उपयुञ्जते।

प्रकृतकथाकाराः तु शिल्पस्य वास्तविकं मूल्यम् अवगच्छन्तः शिवेतरक्षतिं शिल्पस्य मुख्यं प्रयोजनं प्रतिपादयामासुः। अत एव साहित्यस्य कान्तासम्मिततयोपदेशयुक्तत्वं कल्पितम्। यथा मनोऽनुसारिणी भार्या अर्धाङ्गिनी भूत्वा प्रेम्णा पत्युः हृद्गतान् आवेगभावान् बहिरानीय मनोनैर्मल्यं सम्पादयति, संविभागेन दुःखशोकादीन् परिहरति, अत्यन्तम् आन्तरिकं शारीरं मानसं च सौख्यं च संविभज्य वर्धयति, अनुकूलप्रतिकूलपरिस्थितिषु पार्श्ववर्तिनी स्वबुद्ध्या मार्गं शास्ति, कर्तव्याकर्तव्यनिर्णये सहायिका भवति तथा आचरति काव्यम् अपि। अत एव काव्यं कान्तासम्मितं भवति सहृदयस्य मानवस्य। प्रकृतग्रन्थस्थकथासु एतत् स्पष्टम् अनुभूयते।

## लघुकथा

अत्र लघुकथा विचार्यविषयः। साहित्यस्य कस्यापि भेदस्य स्वरूपम् इदम् इत्थम् इति निर्णेतुं न शक्यते। केवलम् उपलभ्यमानानि लक्ष्याणि दृष्ट्वा तत्प्रतिपादकं किञ्चिल्लक्षणादिकं प्रतिपाद्यते आलङ्कारिकैः। एवं लघुकथाया यद्यपि आलङ्कारिकदृष्ट्या बहुविधं लक्षणम् एतावता आलङ्कारिकैः प्रतिपादितम्। किन्तु सर्जकः तानि लक्षणानि अनुसृत्य एव सर्जनं कुर्याद् इति न नियमः। वस्तुतः, सर्जकः तु तान् नियमान् लक्षणादिकम् अज्ञात्वा एव कदाचित् स्वप्रतिभया सर्जने मतिं विधत्ते। प्राय एतद् एव कारणं स्याद् यत् पूर्वाचार्यैः काव्यस्य विभाजनावसरे बहवः प्रविभागा नैव कल्पिताः। केवलम् अत्यन्तं स्थूलतया ये विभागा अवगम्यन्ते ते एव विभागाः तैः लक्षणादिपुरस्सरं निर्णीता वर्णिताश्च। नियतिकृतनियमरहितायाः कविसृष्टेः लक्षणानुसारित्वादिविवेचने तु नीरसानां समीक्षकाणाम् एव मतिः। सहृदयाः तु सृष्टेः रसास्वादने एव मतिमन्तः भवन्ति।

अथापि युगानुगुण्येन वयम् अपि समीक्षणस्य साम्प्रतिकीं रीतिम् अनुलङ्घ्य प्रकृतग्रन्थस्य विषयनिर्धारणे किञ्चिद् इव प्रयत्नम् आचरामः। प्रकृतग्रन्थस्य परिचयात्मके पुटे (verso page) ग्रन्थस्य परिचये “A collection of fifteen short stories” इति लिखितं दृश्यते। ग्रन्थकारस्तु सर्वत्र स्वसर्जनं कथा इति पदेन एव निदिशन् दृश्यते। तस्माद् आधुनिकरीत्या short story पदेन निर्दिश्यमाना साहित्यविधा एव अत्र कथापदेन निर्दिश्यते। वस्तुतः, आधुनिकसाहित्ये Story इति पदं साहित्यप्रकारविशेषस्य वाचकत्वेन तथा न उपयुज्यते। वस्तुतः, short story इत्यस्य कृते story इत्यस्य कृते च एक एव कथाशब्दः प्रयुज्यते। हेगडेवर्यः स्वीयग्रन्थस्य उपोद्घातांशे एतत् स्पष्टयन् कथयति, “कथा इति पदं ‘वस्तु’परत्वेन ‘प्रकार’परत्वेन च उपयुज्यते सर्वत्र सर्वासु भाषासु अपि।” अत्र साहित्यशास्त्रस्य परिभाषादृष्ट्या वस्तुपरत्वेन प्रयुज्यमानः कथाशब्दः story इत्यस्य पर्यायः, प्रकारपरत्वेन प्रयुज्यमानः च short story इत्यस्य पर्यायः। अतः प्रकृतप्रबन्धे वयं कथाशब्दम् इतः परं ‘लघुकथा’ इत्यस्मिन् अर्थे प्रयोक्ष्यामहे।

---

[१]समीक्षितकथाग्रन्थः– उत्फुल्लम् अन्तरङ्गम्। (पञ्चदशकथानां सङ्ग्रहः)। ग्रन्थकारः– जनार्दनहेगडे। प्रकाशिका– संस्कृतभारती, ‘अक्षरम्’, ८ उपमार्गः, २ घट्टः, गिरिनगरम्, बेङ्गलूरु– ५६००८५। प्रकाशनवर्षम्– २०१३। पृष्ठसंङ्ख्या– viii+159। मूल्यम्– ₹ ६०/-।

वस्तुतः, 'लघुकथा' इति पदम् आकारप्रकारनिर्देशकस्य पदद्वयस्य समाहाररूपम्। तत्र लघु इति पदम् आकारनिर्देशकं, कथापदं च प्रकारनिर्देशकम्। एतद् अस्माभिः स्पष्टतया ज्ञातव्यं यत्, कथा सर्वदा गद्यात्मिका एव भवेत्। अन्यथा तत् कविता अथवा पद्याद् न भिद्येत। अतः कथा नाम प्रकृते गद्यात्मिका काचन मौलिकी कविकल्पनाश्रयिणी साहित्यविधा। तस्य विषय आकारश्च न नियतः। विषयविषयकं विचारम् अग्रे प्रस्तोष्यामः, सम्प्रति कथाया आकारविषये किञ्चिद् विवेचनं कर्तव्यम्। एतावद्भिः शब्दैः पदैः वा निबद्धा भवेत् कथा इति राजाज्ञा न वर्तते। नापि लक्ष्यानुरोधेन तादृशं सुस्पष्टं लक्षणं कर्तुम् अपि शक्यते। आधुनिककथासाहित्यस्य पथिकृतः एडगार-एलेन-पो-वर्यस्य स्पष्टं वचनं, "a brief prose narrative requiring from half an hour to one or two hours in its persual." (लघ्वाकारकं गद्यात्मकं कथनं यस्य पठने अर्धहोरा, एकहोरा उत द्वे होरे अपेक्ष्येत।) किन्तु वस्तुस्थितेः विवेचनेन ज्ञायते यद्, आकारः कथायाः कथात्वं न नियमयति। यतो हि, आधुनिक्यः अतिलघ्वाकारिकाः पञ्चषपङ्क्तिनिबद्धाः कथा अपि कथा एव। यद्यपि सम्प्रति टुप्कथा उत अणुकथा इति तासां नाम कल्प्यते, किन्तु प्रकृत्या ताः कथा एव। पुनश्च विश्वख्यातानां कथाकाराणाम् ओ-हेनरिः, मपासाँ, गोगोलः, चेकवः, रवीन्द्रनाथः, ताराशङ्करादीनां कथानाम् आकारः परस्परम् अतिशयेन भिद्यते। वङ्गीयकथाकारेषु प्रसिद्धानां ज्ञानपीठपुरस्कारभाजां ताराशङ्करवन्द्योपाध्यायानां काश्चन कथा आकारेण लघूपन्यासेन औपम्यं भजते। अथापि कथा इत्येव तासां व्यवहारः। अतः शब्दस्य सङ्ख्या अथवा आकारः कथायाः कथात्वं न विशेषयति।

अतः कथा वस्तुतः प्रकारनिर्देशकम् एव पदम्। कथायाः तत्त्वं प्रतिपादयन् प्रख्यात आलोचकः ब्राण्डार-म्याथ्युजवर्यः वदति, "…a short story deals with a single character, a single event, a single emotion or the series of emotions called forth by a single situation." (काचित् कथा एकं पात्रम्, एकां घटनाम्, एकं सुनिश्चितं भावावेगम्, उत एकया परिस्थित्या समाहृतः केषाञ्चन भावानां समूहं विषयीकरोति।) वस्तुतः कथायाः वैशिष्ट्यं भवति यत् कथा प्रथमपङ्क्तेः एव आरभ्येत। तत्र वर्णनस्य, चरित्राणाम्, उपकरणानां बाहुल्यं न भवेत्। जीवनस्य खण्डचित्रस्य बाहुल्यवर्जितवर्णनेन जीवनस्य एकात्मतायाः, पूर्णतायाः वर्णनम् एव कथायाः कथात्वं निर्धारयति। प्रकृतप्रबन्धे कथायाः स्वरूपादिविषये महान् विचारः अनपेक्षितः। अथापि प्रकृतग्रन्थे कथा अस्ति उत लघुकथा इत्यस्य निर्णयाय एतावान् विचार उपस्थापनीयः अभूत्।

वस्तुतः, प्रकृतग्रन्थस्य प्रास्ताविके कथायाः कथा इति प्रबन्धे संस्कृते कथाया इतिहासं सुस्पष्टतया निरदिशद् आचार्यः। तत्रापि संस्कृते आधुनिकरीत्या लघुकथा पूर्वाचार्यैः निर्दिश्यमाना खण्डकथायाः नामान्तरम् इत्यपि तैः निर्णयः कृतः। एवञ्च कथाया अवान्तरभेदानाम् अपि विशिष्टं विवेचनम् अत्र दृश्यते। तस्माद् अत्र साक्षाद् विषयप्रवेशनम् एव वरम्।

## उत्फुल्लम् अन्तरङ्गम्

अस्मिन् कथासङ्ग्रहे पञ्चदश कथाः विलसन्ति। कथानां विषयाः विभिन्नाः। ऐतिहासिक्यः, अलौककविषयाधारिताः, स्पशकथाः यथा सन्ति तथैव जीवनस्य, समाजस्य विविधानि दुःखसुखादीनि आधृत्य मर्मस्पर्शिन्यः कथा अत्र विलसन्ति। यथा पूर्वम् एव आलोचितं, कथाकारः कम् अपि एकं भावम् आश्रित्य समस्ताः कथाः न लिखिताः। तदा तदा तैः तैः भावैः ताः ताः कथाः लिखिताः। अन्ते च तासां कथानाम् एकत्र सङ्ग्रहणं कृतम्। अतः अस्य सम्पूर्णस्य ग्रन्थस्य सामग्र्येण विवेचनं नाम एकैकस्याः कथाया एव विवेचनम्।

**सीमायां सञ्चलनम्**– सङ्ग्रहस्य प्रथमा कथा ऐतिहासिकीं पटभूमिम् आश्रित्य आधुनिकसमस्याया विवेचनात्मिका। राष्ट्राद् उपरि सम्प्रदायस्य प्रामुख्यं कल्पयतां केषाञ्चन विशिष्टसम्प्रदाये विश्वासवतां प्रतिवेशिनः राष्ट्रस्य स्वसम्प्रदायाश्रयिणः राज्ञः साहाय्येन स्वराष्ट्रस्य राज्ञः विरुद्धाचरणम् अत्र कथायाः मुख्यविषयः। कथायां सीमान्तसुरक्षायाः, गूढचरव्यवस्थायाः, प्रेम-जिहादस्य, उपासनालयस्य राष्ट्रद्रोहकर्मणि उपयोगस्य, नारीहरणस्य, अन्यमतीयानां पुनःस्वीकृति, च जीवद्रूपः विचारः प्रस्तुतः। इतिहासं पृष्ठभूमिं कृत्वा कथाकारः साम्प्रदायिकहितम् उपलक्ष्य क्रियमाणानां राष्ट्रद्रोहिकार्याणां स्पष्टं नग्नं विवरणं प्रस्तौति। कान्तासम्मिततया भारतीयसमाजस्य कृते विशिष्टानि शिक्षणानि अत्र प्रस्तूयन्ते। चम्पायाः, यूसुफखानस्य चरित्रं यथा उत्साहप्रदं शिक्षाप्रदं च तथैव युवराजस्य चरित्रम् अपि राष्ट्रनायकानां कृते आदर्शप्रायम्। कूटनीतिः अपि अत्र कश्चिद् उल्लेखार्हः विषयः।

शत्रुदेशीयानां कुतन्त्रकारिणां दण्डदानम् अपि कदाचिद् अस्मद्राष्ट्रे न्यायविचारस्य नाम्ना लक्षाधिकरूप्यकैः पाल्यमानानां वैदेशिकसन्त्रासवादिनां स्मरणं कारयति कदाचित्। पाठकेन चिन्तनीयं भवति, कः न्यायविचारः- शत्रुराष्ट्रीयाणां सन्त्रासवादिनां शीघ्रतरं दण्डनम् उत दीर्घतरविचारप्रहसनव्याजेन तेषां पालनम्?

कथा अत्युत्कृष्टा। वस्तुत ईदृश्यः समस्या इदानीम् एव भारते सन्ति इति न। पूर्वम् अपि बौद्धयुगे मुस्लिमयुगे च ईदृश्यः समस्या अवर्तन्त। कथाकारः ताः समस्याः प्रतिपादयन् इतिहासस्य साह्यं स्व्यकरोत्। नाम अपि अन्वर्थम् अस्ति कथायाः। किन्तु, ऐतिहासिककथायाः सार्थक्यं भवति ऐतिहासिकपृष्ठभूमेः निर्माणेन। कथाकारः पाठकं वर्तमानाद् इतिहासस्य स्वाभीष्टं कालं नयति ऐतिहासिककथायाम्। तत्र उपायः भवति भाषायाः, वर्णनस्य च पाटवम्। भाषायाम् इतिहासस्य अभीष्टकालस्य भाषायाः छाया तथा वर्णनम् अपि तत्कालस्य अनुकारि भवेद् ऐतिहासिककथायाम्। तेन एव पाठकः रसम् आस्वादयन् आत्मानं प्राचीने कस्मिंश्चित् कालखण्डे प्राप्नोति। किन्तु प्रकृतकथायां चरित्राणां नाम, परिवेशः, व्यवस्थादिकम् इतिहासाश्रितम्। किन्तु, कथां पठन् कुत्रापि वर्तमानम् अतिरिच्य अतीतं कालं प्राप्त इति अनुभवः मम न जातः। भाषायाम् अतीतस्य च्छाया यथा नास्ति, घटनानां वर्णनम्

अपि वर्तमानकालिकम् इव भाति। तेन अतीतस्य पटभूमिकायां वर्तमानस्य वर्णनेन कथाया रससञ्चारः क्वचिद् बाधित इव मम अभात्।

**मधुरफला वेदना–** यद् दुःखम् आपाततः रमणीयम् अपि परिणामे सुखदायकं तत् सुखम् एव सात्त्विकं सुखम्।[२] प्रेमप्रधानायाम् अपि अस्यां कथायां भ्रातुः भगिनीद्वयेन सह सम्बन्धस्य माधुर्यम् एव मुख्यम्। कथायां नाटकीयोपस्थापनं वैशिष्ट्यम् आवहति। लघुभिः संलापैः सर्वेषां चरित्राणां वैशिष्ट्यं निरूपितम्। शशाङ्कस्य मातुः सोद्वेगवचनेन समाजस्य मानसिकी स्थितिः एकस्याः शुद्धभारतीयजननन्याः च मानसिकी स्थितिः सुष्ठु उपस्थापितं कथाकारेण। पितुः वचनम् अपि एतादृशम्। यत्र कयाचिद् एकया परिस्थित्या बह्वनां भावावेगानां समूहस्य समाहृतिः भवति तादृशी एषा लघुकथा। यामिन्याः श्रीकरस्य च विवाहस्य कथा मध्यबिन्दौ स्थिता वैशाल्याः विवाहं, तद्विषयिणीं समस्यां तत्परिहारञ्च स्वाभाविकतया एव आकर्षति। क्वचिद् अपि वैशाल्याः विवाहप्रसङ्गः अप्रासङ्गिक इति न भाति। इदम् एव लघुकथायाः स्वारस्यम्।

नागेन्द्रः स्वविवाहस्य निमन्त्रणं नीत्वा आगत इति वचनेन वैशाल्याः मुखस्य विच्छायता, तस्य रहस्यं च एकमासात् प्राक् तस्यै पृष्टं किञ्चिद् एकं वचनं मानवीयमनस्तत्त्वस्य वैचित्र्यं प्रकाशयति। भ्रातृभगिन्योः पारस्परिकसंलापाः तन्मध्यपातिनः विविधा व्यवहाराः च अनाविलं कञ्चन आनन्दरसं सृजति पाठकमनसि। अन्ते च भ्रातुः स्थानं भगिन्याः जीवने कीदृशम् इति निरूपयन् कथाकारः कथाम् उपसंहृतवान्। एतद् अपि कथाकारस्य कथाकथन पाटवम् एव सूचयति।

कथायां केचन मुद्रणदोषा रसभङ्गस्य कारणं भवति। यथा यामिन्याः प्रेमिणः शशाङ्कस्य च प्रथमदर्शने श्रीकुमार इति परिचयं ददाति यामिन्याः प्रेमिकः। किन्तु कथायाम् अनन्तरं तस्य श्रीकर इति नाम उपयुक्तं सर्वत्र। एवम् एव अन्ते वैशाली अनुजं शशाङ्कं सम्बोधयन् तम् अग्रज इति वदति। एवम् अन्ये अपि केचन अक्षरदोषाः कथायां दृष्टाः।

**परिधेः विस्तारः–** नरोत्तमचन्द्रशेखरयोः एषा कथा विशिष्टा। चन्द्रशेखरस्य पत्न्याः कामिन्याः शीलम्, अपत्यसुखं, सम्पूर्णं जीवनं च पूर्णतया नाशितवतः नरोत्तमस्य पश्चात्तापः, प्रकृतिदौर्बल्यम् इत्यादिकं भोगसर्वस्वजीवनस्य अतृप्तिं दुःखं च प्रतीकयति। तत्र एव चन्द्रशेखरस्य जीवनं सरलजीवने उन्नतचिन्तनं प्रतीकयति। क्रमेण प्रेयसः श्रेयसः च प्रतीकभूतौ इमौ।

चन्द्रिका नैर्धन्यस्य कारणेन चन्द्रशेखरं निराकृतवती। किन्तु कथाकारः स्वाभीप्सया तस्याः वर्तमानेन नष्टशीलेन पत्या समानां पदवीम् अलङ्कुर्वन् परिवारप्रेमी दृढचरित्रः कोमलहृदयः चन्द्रशेखरः तस्याः गण्डयोः चपेटाम् इव ददाति। कथायां फ्लाशबैक-तन्त्रस्य उपयोगः सुन्दरः अस्ति। स्वजीवनानुभवान् सहमानया कामिन्या जीवनविषयिणीं वास्तविकीं दृष्टिं विकसितवती इति तस्या द्वित्रैः वाक्यैः वर्णयन् कथाकारः स्वस्य पाटवं प्राकाशयत्।

कथायाम् अद्यतनच्छात्रेषु ब्रह्मचर्यस्य अभावः, व्यभिचारः, कालेन मनुष्यस्य मनसः परिवर्तनम् इत्यादयः अंशाः सुष्ठु वर्णिताः घटनाभिः। व्यभिचारस्य अविवेकित्वं कामिन्या यद् दर्शितं तदर्थं तया अमातृत्वम्, अर्बुदरोग इत्यादयः दण्डा अधिगताः। किन्तु, कथाकारः सूक्ष्मतया व्यञ्जयति यत्, तस्याः कृते सर्वापेक्षया पीडाकरः दण्ड आसीद् इयं भावना यत् तस्याः अविवेकित्वेन सा स्वजीवनस्य रक्षकाय चन्द्रशेखराय एकम् अपत्यम् अपि दातुम् अशक्ता इति। एवं दशा चन्द्रिकाया अपि। सा अपि नैर्धन्यम् उपलक्ष्य चन्द्रशेखरम् अवज्ञाय आजीवनं दुःख्यति। एवञ्च यौवने अविमृश्यकारित्वं, श्रेयः-प्रेयसोः चयने भ्रान्ति च स्पष्टतया वर्णयन् कथाकारः अन्तिमे जीवनस्य परिधेः विस्तारे एव समग्रं सुखं विलसति इति समग्रमानवजातेः कृते इमां शिक्षां प्रदाय पाठकस्य मनसि अतृप्तिं रक्षन् एव उपसमहरद् इति कथाकारस्य कथारचनकौशलं विजयतेतराम्।

**आतङ्कास्त्रयः आनन्दाश्च त्रयः–** कथायाम् अस्याम् अलौकिकशक्तेः विवरणेन त्रासः, विस्मय इत्यादीन् विविधान् भावान् जागरयन् कथाकारः अभिचारकर्मणः सूक्ष्मविषयान् कथाच्छलेन वर्णयति। सामान्यत आधुनिककथासु पुरोहितानां वञ्चकत्वम् एव प्रतिपादयन्ति लेखकाः। अत्र तु ततः विपरीतं वर्णनं कुर्वता कथाकारेण कासाञ्चन सामान्यपृच्छानां युक्तियुक्तम् उत्तरम् अपि उपास्थापयत्। एवम् एव अन्यमतीयेन सरलमतेः बालिकायाः वञ्चनस्य वर्तमानकालिकी समस्या अपि मनाग् अत्र उपस्थापिता। कथायाम् अचल-अनल-अनिलसम्बन्धिनी विपद्, उद्योग-उत्पत्ति-उद्वाहसम्बन्धिन आनन्दाः च भाषाचमत्कारम् अपि सृजन्ति।

द्रढीयान् विश्वासः- कथायां कृषिसम्बन्धिन्यः अद्यतन्यः समस्याः भृशम् उपस्थापिताः। वाणिज्यसंस्थाभिः कृषकवञ्चनम्, भूगर्भस्थजलसमस्या च यथा एकतः निराशतां जनयति, तथैव एकस्याः सचेतनमहिलायाः सामान्यप्रतिवादस्य सुमहान् सामाजिकः परिणामः अन्यत उत्साहस्य सर्जनं करोति। समग्रकथायां पात्रचित्रणस्य औचित्यं मनोहारकं वर्तते। अन्ते च रमया विधवानां विवाहस्य विषये यः प्रसङ्ग उपस्थापितः सः अपि अत्यन्तं मर्मस्पर्शी वर्तते। सामान्यतः अस्मिन् प्रसङ्गे विधवायाः पुनर्विवाहस्य निदानम् एव कल्पयन्ति कथाकाराः। किन्तु प्रकृतकथाकारः पुरुषस्य विपत्नीकजीवनयापनस्य निदानं कल्पयन् वास्तविकीं भारतीयदृष्टिम् उपस्थापयति पाठकानां पुरतः।

**अनुकम्पः आधाराय–** कथा एषा सम्पूर्णसङ्ग्रहे हृदयस्पर्शिकथासु श्रेष्ठतमा इति मे मतिः। पुरोहितस्य यजमानस्य च सम्बन्धः कः इति विषये भारतीयसङ्कल्पनां स्पष्टतया विवृण्वन् अस्यां कथायां कथाकारः भारतीयताया जययात्राम् उद्घोषितवान्।

सम्प्रदायपरः अर्चकः शास्त्रिवर्यः विशिष्टचरित्रवान्। पुरोहितः स पुरतः स्थित्वा परिवारस्य हितं विदधत् पौरोहित्यस्य आदर्शं

[२]यत्तदग्रे विषमिव परिणामेऽमृतोपमम्। तत् सुखं सात्त्विकं प्रोक्तम् आत्मबुद्धिप्रसादजम्॥ (गीता १८.३७)

प्रतिष्ठापयति अद्यत्वे। दक्षिणाप्राप्त्यै पूजा क्रियते इति भावनाया विपरीतां भावनां प्रतिपाद्य स उद्घोषयति यद्, दक्षिणाभावे गृहस्थस्य पूजा न चलति चेत् तत्र पुरोहितस्य वैयर्थ्यम्। पुनः देवपूजा देवभावनया कर्तव्या न दक्षिणाभावनया। एवम् एव अस्वस्थं नारायणगौडं द्रष्टुं गतः दक्षिणात्वेन प्राप्तान् तण्डुलान् शाकान् च दरिद्राय यजमानाय यच्छन् दानस्य योग्यम् उपयोगम् उपदेशमात्रेण न अपि तु आचरणेन प्रतिपादयन् स स्वस्य दैवत्वं दृढीकरोति। नारायणगौडम् उत्थापयितुं गतः स पुनःस्नानस्य प्रसङ्गेन पुनः स्नानं करिष्यामि इति वदन् परम्परायां स्वादरं प्रकटयति। अत्र मानवतायाः नाम्ना परम्परायाः खण्डनं तेन न कृतम्। अपि तु मानवतायाः परम्परायाः च न कोऽपि परस्परविरोधः विषयभेदाद् इति प्रतिपाद्यते। न केवलम् एतद्, अपि तु पुरोहितेन पुनःस्नानरूपं कष्टं सोढ्वा अपि मानवतां परम्परां च रक्षति। एष संयम आत्मत्यागः च वस्तुतः सर्वविधसद्गुणस्य आकर इति अनेन प्रतिपादितं भवति। नारायणगौडस्य दयनीयस्थितेः स्वल्पाक्षरम् अपि विवरणं मर्मन्तुदम् अस्ति।

ग्रामस्य सर्वान् विरुध्य नारायणगौडाय तण्डुलादिकं तस्य स्नुषायै स्वगृहाद् लज्जावरणवस्त्रं च प्रदाय यः नारायणगौडस्य ऐहिकम् अपि हितं विधत्ते, स्वयं नारायणस्य क्षेत्रे कृषिं कारयित्वा तस्य जीवनं रक्षितुं यतते तस्य एव विषये नारायणस्य दुर्भावना मानवमनस एकं रहस्यमयम् अंशं प्रकटयति।

केनचिद् अपि प्रकारेण पारम्परिकविद्याया रक्षणाय प्रयासः कर्तव्य इति सुष्ठु प्रतिपाद्यते कथायाम्। पारम्परिकविद्याया अपि सेवाभावेन एव प्रयोगः भवति इति विषयं सुन्दरतया निरूपयन् कथाकारः भारतस्य वास्तविकीं संस्कृतिं उपस्थापयति पाठकानां पुरतः। एवम् एव तस्या विद्याया रक्षणाय उपयुक्ता स्त्री अपि नियोज्या इति प्रतिपादयन् वयोलिङ्गादीनां विद्याग्रहणे अबाधकत्वं सुष्ठु निरूपितवान् कथाकारः।

नारायणस्य पुत्रेण कृतस्य पापस्य फलं तस्य परिवारेण भुज्यते। एष सामाजिकः दण्डः। एतादृशसामाजिकसंरचनाया एव कारणात् पूर्वं समाजे अपराधानां बाहुल्यं नासीत्। अद्यत्वे तु वैधिकदण्डमात्रस्य भयं, तद् अपि न्यायपरं न भवति इति अपराधानां बाहुल्यं वर्धत इत्यपि अवधेयः अंशः। समाजस्य उन्मार्गगामितायां तु शास्त्रिवर्येण सदृशाः समाजमुख्याः समाजं मार्गे वर्तयन्ति इति आसीद् भारतस्य समाजस्य उत्कर्षः। ईदृश एव समाजः विश्वस्य सुखं विधास्यति इति स्पष्टतया व्यज्यते कथया।

एतावता घटनाबाहुल्येन अपि कथायाः कथात्वं न विभग्नम्। एकस्य परिवारस्य सुखदुःखादिकथाम् आश्रित्य समग्रस्य ग्राम्यसमाजस्य, कुलपरम्परायाः, तद्रक्षणोपयोगस्य, सामाजिकसमस्यानां च विवरणम् उपन्यस्य कथाकारः पाठकहृदयं जयति।

**अपूर्वः अवसरः–** एषा कथा न कपोलकल्पिता। परमवीरचक्रेण सम्मानितस्य योगेन्द्रसिंहयादवस्य वास्तविकी कथा इयम्। उत्तमपुरुषविधया योगेन्द्रस्य कथामाध्यमेन कार्गिलयुद्धस्य विशदविवरणं पाठकहृदये विचित्रान् भावान् जनयद् रससञ्चारं करोति। भारतीयसैनिकानाम् आत्मत्यागं तेषां युद्धकालिकमनोभावान् च सुष्ठु वर्णयति कथाकारः अत्र।

**निर्गते नीरे–** एकमुखिनी गतिः अस्याः कथायाः वैशिष्ट्यम्। कथायाः वर्ण्यविषयः तु ललितायाः विवाहसम्बन्धविनिश्चये आगता समस्या तत्परिहारः च। एतावतः वर्णनं कुर्वन् कथाकारः शिष्याचार्ययोः श्रद्धाविश्वासपूर्णं सम्बन्धं, ललितायाः मनोदार्ढ्यं, वरदराजेन स्वेन अनवगतं ललिताविषयकं भावं, सहकारसङ्घस्य आर्थिकभ्रष्टाचारं तेन च सामान्यैः अनुभूयमानं क्लेशं च तथा पटुहस्तेन वर्णयति कथाकारः येन क्वापि कथाया मूलधारायाः छेदः न भवति।

द्वित्रान् मुद्रणदोषान् विहाय कथा सुखपाठ्या अपि वर्तते। कथाया नाम अपि अन्वर्थतां भजते। मनसि उद्गतस्य भावस्य परिचयं प्राप्य तस्य समये प्रकटीकरणं न कृतं चेद् अनुतापः कर्तव्यः भवति। अत्र निर्गतं नीरं सदा प्रवहतः कालस्य एव प्रतीकम्। कालः सकृद् गतः न प्रत्यायाति। एवं नद्याः जलम् अपि। अतः काले सर्वं कर्तव्यम्।

**पुण्यदा यात्रा–** तपस्विन्याः शारदाम्बायाः जीवनेन आदर्शभारतीयजीवनं वर्णितवान् कथाकारः। कथायां फ्लैशबैक्-तन्त्रस्य उपयोगः साधीयान्। शारदाम्बायाः कृते अटोचालकानाम् अपि श्रद्धापूर्णः व्यवहारः तस्या जीवनस्य पावित्र्यं सूचयति। जगन्मातुः नाम धृतवत्या तया वस्तुत एव सामान्यस्त्रीजीवने जगन्मातृत्वं सम्पाद्य आदर्शः कश्चन समुपास्थायि जगतः पुरतः। कर्तव्यबुद्ध्या पुण्यापुण्यार्जनौदासीन्येन कथं शास्त्रवचःपरिपालनं कर्तव्यम् इति स्पष्टं निरूपितम् अत्र। पुण्यसम्पादनस्य अपि केचन भ्रान्ता उपाया अस्मन्मनसि पदं कुर्वते। तद्विषयकं स्पष्टं विचारम् उपस्थापितः कथाकारेण। शिवरूपिणः जीवस्य सेवया शारदाम्बा चिकित्सालयम् एव तीर्थक्षेत्रं सम्पादयति।

**अशुष्का नन्दिका–** विचित्रा इयं कथा। अत्र श्रेष्ठसमाजस्य उदाहरणं प्रस्तुतं कथाकारेण। तादृशः समाजः यत्र 'उक्तं वचनम् अपि शिलालेखायते।' अद्यत्वे यदा जनाः लिखितम् अपि वचनम् अपालयन्तः न्यायालयं यावद् धावन्ति तत्र तारुण्ये कदाचित् केनचित् मञ्जुनाथस्य पुरतः कृता प्रतिज्ञा अद्य यावद् मनसि संस्थाप्य तदनुगुणव्यवहारस्य मनोदार्ढ्यं विरलम् एव। किन्तु, एतद् अपि स्मर्तव्यं यद् आमेरिकावास्तव्यः अपि नरहरिः अस्याः प्रतिज्ञायाः स्मरणं करोति। पुनः आमेरिकायाम् उद्योगी आधुनिकः पौत्रः अपि सम्प्रदाये आस्थावान् अभवत्। प्रायः सम्प्रदायस्य समाजरक्षणे उपयोगं वीक्ष्य साम्प्रतिककालस्य समाजस्य मूल्यहीनताम् अनुभूय च। कथायां जलसंरक्षणस्य परिसरसंरक्षणस्य च विषयः सम्यग् उपस्थापितः। एतादृशानि कार्याणि सर्वकारस्य न अपि तु समाजस्य इति प्रतिपादयन् मठाधिपत्यादीनां सामाजिकमार्गदर्शकानां भूमिकाम् अपि अत्र प्रकटयति कथाकारः। अन्ते च वृद्धस्य रामचन्द्रस्य

पौत्रस्य सुखाय प्रतिज्ञानिरासाय यः निर्णयः कृतः तेन रामचन्द्रस्य वास्तवज्ञानम् अपि श्लाघार्हम् इति वक्तव्यम्। स्वीयदुराग्रहेण अग्रिमकुलस्य सुखभञ्जनं न उचितम् इति वर्णयता कुलपरम्परायाः माहात्म्यं तद्रक्षणस्य किञ्चिद् रहस्यम् अपि अत्र प्रकटितम् इव।

ग्राम्यक्षेत्रे प्रवहन्त्याः नद्याः अशुष्कतायां कारणं ग्रामीणां सम्प्रदायश्रद्धाया अशुष्कता इत्येवं कथाया नाम व्यञ्जनागर्भं वर्तते। अतः प्राचीनपरम्परायाः महत्त्वं सदर्थकदृष्ट्या अवगम्य कुप्रथाभ्यः तां पृथक्कृत्य तस्याः संरक्षणं कर्तव्यं यथा दूषणाद् रक्षित्वा नद्याः रक्षणं कर्तव्यम्। अन्यथा समाजे समस्या एव वर्धेरन्।

**पराजयात् जयः–** कथायाम् आधुनिकभोगसर्वस्वजीवनस्य आपातजयः अन्ते पराजयत्वेन परिणमते। कथायाः शैली विशिष्टा। त्रयाणां स्ववचननिबद्धा कथा। एकैकः स्वकथां श्रावयन् स्वीयमनोभावं यथा प्रकटयति तथा अन्येषां विषये स्वमनसि वर्तमानान् भावान् अपि प्रकटयति। आत्मसाक्ष्येण वर्णनं कुर्वन्तः ते स्वीयगुणदोषादिकं स्पष्टशब्दैः प्रतिपादयति कथायाम्। जीवनं कथं यापनीयम् इत्यत्र आदर्शं संस्थापयति आदित्यः। यत्र कार्यं प्राप्तं तत्र कुग्रामे समाजस्य समुद्धाराय तेन कृतः प्रयत्नः असामान्यः। तस्य पुरस्कारत्वेन तेन तद्ग्रामीणानां तस्य विषये श्रद्धा, स्वपत्न्याः मोहभङ्गपुरस्सरं सान्निध्यम् अपि समधिगतम्। कदाचित् हठेन स्वग्रामे स्थितवता तेन एतत् सर्वं प्राप्तं न स्यात्। श्रीकण्ठस्य निर्णयः अपि अत्र विचार्यः विषयः। पुत्रस्य परिवारः कथं रक्षणीयः इति विचिन्त्य तेन यत् कृतं तत् तु तस्य दूरदर्शितायाः प्रमाणम्। दीपा अपि भोगसर्वस्वजीवनस्य असारत्वं तेन एव अवगत्य पत्युः श्वशुरस्य च त्यागपूर्णजीवनस्य मार्गम् अनुसरति अन्ते। सर्वकारीयशिक्षाव्यवस्थाया दुर्दशाम् अपि वर्णयति कथाकारः। शिक्षकाः ग्रामस्य विद्यालयं न गच्छन्ति इति सूचयता शिक्षकाणां चारित्रिकस्खलनम् अपि प्रकटितवान् कथाकारः। दीपायाः पराजय एव वस्तुतः तस्याः जयः। नाम अपि तद् एव सूचयति।

उत्फुल्लम् अन्तरङ्गम्– अस्याः कथाया नाम्ना एव सङ्ग्रहस्य नाम कृतम्। कथायां मुख्यं वैशिष्ट्यं तावद् इन्दुमत्याः चरित्रम्। कथं काचन सामान्या महिला विपदि सुमहता धैर्येण जीवनं सुदृढं करोति इति अस्याः कथायाः मुख्यः वर्ण्यविषयः। इन्दुमत्याः निर्लोभता, स्वापत्यानां पालने संस्कारदाने च तस्याः दृढः सार्थकः च प्रयासः आशाव्यञ्जकः। तस्याः सर्वनाशम् आचरितवत्याः यातुः सकाशे पुत्रयोः गमनम् जानती अपि सा 'वैषम्यं न वर्धनीयम्' इति विचिन्त्य मनसि तद् अनुमन्यते इत्यनेन तस्या उदारता, वास्तवज्ञानं च प्रकटितं भवति। उमायाः गिरिजायाः च दीर्घकालिकविच्छेदानन्तरम् उमायाः पुत्र्या अस्वास्थ्यव्याजेन परिवारस्य मेलने गिरिजा सर्वं पुरातनं विस्मृत्य अग्रे आगता, उमा च स्वकृतदोषाणाम् अनुतापेन क्षालनम् अकरोद् इति सर्वेषाम् अन्तरङ्गम् उत्फुल्लं भवति। एतद् एव कथाया नामकरणे अपि बीजम्।

**सन्तृप्तीच्छा–** सन्तृप्तिः कथं प्राप्यते? वसुधाया यौवनस्य अहङ्कारस्य चूर्णीभाव एव कथायाः मूलसूत्रम्। पितृभ्यां सूचितेन विवाहेन जीवनं नरकमयं भवेत्, स्वजीवनस्य रूपयित्री स्वयम् इत्यादीनि तस्याः चिन्तनानि तस्या अहङ्कारमात्रं प्रकटयन्ति। स्वेच्छाचारस्य परिणतौ दुःखं प्राप्नुवती अपि सा दुष्टस्य पुरुषस्य आदर्शेन अपरं यं वृणुते सः अपि व्यभिचारी दुष्टः भवति। एवञ्च, पुरुषमात्रम् एव दुष्टः, औपचारिकीं शिक्षां प्राप्य स्वमनोऽनुकूलनिर्णये एव सुखम् इत्यादीनां चिन्तनानां वैयर्थ्यं कल्पयित्वा कथाकारः अन्ते वसुधया सन्तृप्तीच्छां प्रकटयति। वसुधा एकले विधुरे जीवने सन्तृप्तिं प्राप्तुं भूषणस्य अपत्याभ्यां स्वार्जितं धनदानस्य निर्णयं करोति। एतेन भूषणस्य विषये तस्या मनसि स्थितस्य भावस्य कृते यथायथसम्मानप्रदर्शनं करोति सा। अस्यां कथायाम् अल्पं पात्रम् ऊढवत्या अपि वर्षिण्याः चरित्रं विशिष्टम्। पत्युः प्रेमिकाम् अपि वसुधां सा मानवीयदृष्टिकोणतः विचारयति यत् तत् तस्या औदार्यं महत्त्वं च ख्यापयति।

**उद्धरणम्–** स्पशकथा इयं रहस्यस्य तत्समाधानस्य च सम्यग् निरूपणेन साफल्यं प्राप्ता। किन्तु तेन सह एव भगिन्यै दीयमानस्य धनस्य विषये देवराजस्य जुगुप्सा, तस्य मानसिकस्थितिः, विश्वेशस्य पितृभ्यां कन्यापणयाचनेन तस्य दुःखं, इन्दिरायाः मालायाः च मनोभाव इत्यादीन् विषयान् निरूपयन्ती कथा मानवमनोविश्लेषणं यथा करोति तथा एव पणयाचनादिकुप्रथानां गभीरसामाजिककुपरिणामम् अपि सुष्ठु वर्णयति।

**निर्णयः–** कथायां घटनाया अपेक्षया विचारस्य गाम्भीर्यम् अधिकम्। कावेर्या उद्योगः स्वीकर्तव्यः न वा इति विचारे क्रियमाणे प्रबोधः ताम् आदौ निराकरोति। तत्र प्रबोधस्य हार्दिकम् अज्ञात्वा तस्य विषये यत् चिन्तनं कृतं तस्य समुचितम् उत्तरं दत्तवान् प्रबोधः। किन्तु तद् उत्तरं युक्तियुक्तम् अपि कावेर्याः मनः न स्पृशति। प्राप्तायाः शिक्षायाः सार्थक्यं केवलम् उद्योगेन सिध्यति इति भावनावत्याः कावेर्याः वचनं, "सर्वं धनैकदृष्ट्या न द्रष्टव्यम्" इति तु तस्याः कृते उपहास इव भवति। यतः प्रबोधेन शिक्षाया उपयोगस्य अन्ये मार्गाः दर्शिताः चेद् अपि सा अर्थसम्पादनपरम् उद्योगम् एव वाञ्छति। किन्तु घटनाया दिक्परिवर्तनं भवति कावेर्याः मातुः अस्वास्थ्येन। यदा अग्रजः मातुः अस्वास्थ्यवार्तां श्रावयति तदा अपि उद्योगमोहेन कावेरी मातुः सन्दर्शनार्थम् अनुत्सुका इव भवति। क्रमशः भ्रातृजायायाः शारदाया अनुभवेन सा मनःसाम्यं प्राप्य ज्ञातुं प्रभवति यत् तस्या उद्योगाय न तस्याः पत्युः विरोधः न वा तस्याः श्वश्र्वाः। अपि तु तस्या उद्योगप्राप्तौ श्वश्र्वा सुमहान् आनन्दः एवं च पत्युः उद्यमेन एव तेन उद्योगः प्राप्तः भविष्यति इति। स्वानुभवेन शारदायाः च अनुभवेन सा परिवारस्य माहात्म्यम् अवगच्छति। उद्योगमोहं परित्यज्य परिवारपालने मतिमती भवति।

**उपसंहारः**

सम्पूर्णकथाग्रन्थे भारतीयताया जयकार उद्घोष्यते। अस्मच्छास्त्रेषु निबद्धाः वैयक्तिकादर्शाः, सामाजिकादर्शाः च मनुष्यस्य वैयक्तिकं जीवनं सामाजिकं च जीवनं सुखमयं विदधति इति प्रतिच्छत्रं कथाकारेण व्यञ्जितम्। यत् पाश्चात्त्यं तद् एव आधुनिकम् इति भ्रान्तिमतां सरसनिराकरणं कथानां सामाजिकप्रतिष्ठां वर्धयति। कथानां विषयवैचित्र्यम् अपि कथाकारस्य सामाजिकचेतनां विविधविषयस्य सुस्पष्टं ज्ञानं च भृशं प्रकटयति।

ग्रन्थे मुद्रणदोषाणां बाहुल्यं नितरां खेदजनकं पीडाकरं च वर्तते। मुखपुटं सुन्दरम् अपि तथा श्लाघार्हं तु नास्ति। पश्चावरणे यानि फुल्लकुसुमानि सन्ति तानि इतोऽपि सुन्दरतया यदि मुखपुटे भवेयुः तर्हि कदाचिद् ग्रन्थस्य नाम्नः प्रकटने तानि समर्थानि भवेयुः। कथाकारस्य अन्येषां कथाग्रन्थानां प्रतीक्षायां स्मः वयं पाठकाः।

☆ ☆ ☆

# वर्णः अक्षरं च


**सारः**

व्याकरणशास्त्रे ध्वनितत्त्वशास्त्रे वा वर्णशब्दस्य अक्षरशब्दस्य च भृशम् उल्लेखः समुपलभ्यते। किन्तु अनयोः विषये बहुधा विप्रतिपत्तयः दृश्यन्ते लोके। वर्णः अक्षरं च समानम् एव उत तयोः अस्ति कश्चिद् विशेषः? यदि विशेषः वर्तते तर्हि स कीदृशः? यदि च विशेषः नास्ति तर्हि कथं न एकस्य स्थाने अपरस्य प्रयोगः क्रियते? इत्यादयः विविधाः प्रश्ना वर्णाक्षरयोः विवरणावसरे समुद्यन्ति। अतः वर्णस्य अक्षरस्य च भेदनिर्णयाय अयं बन्धो बध्यते।



कुञ्चीशब्दाः- वर्णः, अक्षरम्, संस्कृतध्वनिशास्त्रम्।


## ०. भूमिका

संस्कृतभाषातत्त्वम् अत्यन्तं सुविकसितं सुनियन्त्रितं च किञ्चित् शास्त्रम्। यद्यपि भाषातत्त्वं, भाषाशास्त्रम् इत्यादिनाम्ना प्राचीनकाले अस्य व्यवहारः नासीत् तथापि भाषातत्त्वविषयकाः प्रायः सर्वविधा विचाराः संस्कृतस्य भाषासम्बन्धिशास्त्रेषु भृशं पदमकुर्वन्। प्रातिशाख्यं, शिक्षा, निरुक्तं, व्याकरणं, न्यायः, मीमांसा इत्येषु शास्त्रेषु भाषातत्त्वसम्बन्धिविचाराः सुललिततया विधृता वर्तन्ते। भाषातत्त्वसम्बन्धिन्यः विविधाः परिभाषाः विविधाः धारणाश्च एषु ग्रन्थेषु विस्पष्टरूपेण विचारिता वर्तन्ते। एषु ग्रन्थेषु निरुक्त-व्याकरण-न्याय-मीमांसादिशास्त्राणि मुख्यतः शब्द-वाक्यसम्बन्धिविचारेषु प्रवर्तन्ते, तथा शिक्षा-प्रातिशाख्यानि वर्णविषये, उच्चारणादिविषये तथा सन्ध्यादिवार्णविधिविषये समधिकं प्रकाशम् उपस्थापयन्ति।

व्याकरणादिशास्त्रेषु वर्णः अक्षरम् इति शब्दौ सुप्रसिद्धौ एव। किञ्च वर्णस्य अक्षरस्य च पर्यायत्वम् अपि सामान्यतः प्रसिद्धं लोके। तथा च अक्षरसमाम्नायः तथा वर्णसमाम्नाय इति उभाभ्याम् अपि शब्दाभ्यां शिवसूत्राणि चतुर्दश प्रसिद्धिम् आप्तानि। तथैव अक्षरशब्दः वर्णशब्दश्च पृथगर्थकौ इत्यपि क्वचित् प्रतिभाति। तथाहि एच्प्रत्याहारगतवर्णानाम् (एकार-ऐकार-ओकार-औकाराणां) कृते सन्ध्यक्षरम् इति व्यवहारे सत्यपि सन्धिवर्ण इति व्यवहारस्तु न दृश्यते। एवञ्च को नाम वर्णः, किं च अक्षरं, तयोश्च स्वरूपादिकं कीदृशम् इत्यत्र वर्तन्त एव काश्चन संशीतयः।

सामान्यत एते विषयाः प्रसिद्धव्याकरणग्रन्थेषु न विचार्यन्ते। व्याकरणं हि पदशास्त्रम्। अतः पदविषये एव व्याकरणशास्त्रस्य मुख्या चर्चा प्रवर्तते। वर्णा अक्षराणि च सामान्यतः उच्चारणशास्त्रेषु विचार्यन्ते। वर्णानाम् उच्चारणबोधकानि शास्त्राणि तावद् मुख्यतः प्रातिशाख्यानि तथा शिक्षाः। अतः शिक्षाप्रातिशाख्यानां प्रकाशेन वर्णाक्षरयोः विवरणम् अत्र प्रस्तूयते।

## १. वर्णः

भारतीयसाहित्ये वर्णशब्दस्य ऋग्वेदे प्रथमप्रयोगो रूपार्थे[२] (colour) तथा जात्यर्थे[३] अस्ति। ऐतरेयब्राह्मणे सर्वप्रथमं स्वरव्यञ्जनरूपे पारिभाषिकार्थे वर्णशब्दस्य प्रयोगो लक्ष्यते[४]। एवं गोपथब्राह्मणे[५], तैत्तिरीयारण्यके[६], निरुक्ते[७], प्रातिशाख्येषु च पारिभाषिकार्थे एव वर्णशब्दस्य प्रयोगः वर्तते।

ऋक्प्रातिशाख्ये वर्णसंज्ञाया विधानं नास्ति, किन्तु विष्णुमित्रकृतवर्गद्वयवृत्तौ स्वरव्यञ्जनार्थे वर्णशब्दस्य प्रयोगो दृश्यते[८]।

तैत्तिरीयप्रातिशाख्ये उक्तं– "वर्णः कारोत्तरो वर्णाख्या"[९] इति। तैत्तिरीयप्रातिशाख्यदिशा सर्वेषां वर्णानां प्रकृतिः ध्वनिः[१०] तद्दिशा च वर्णशब्दः कारशब्दश्च वर्णस्वरूपवाचकः[११]।

वाजसनेयिप्रातिशाख्ये[१२] चतुरध्यायिकायाञ्च[१३] वर्णसंज्ञाविधानं नास्ति किन्तु वर्णशब्दस्य प्रयोगोऽस्ति। ऋक्तन्त्रे वर्णशब्दः

---

[२]रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः। समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने॥ ऋग्वेदः १।११३।२॥ अत्र वर्णं सर्वेषां प्राणिनां रूपम् इति सायणः।

[३]येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहाकः।
श्वघ्नीव यो जिगीवां लक्ष्ममाददर्यः पुष्टानि स जनास इन्द्रः॥ ऋग्वेदः २।१२।४॥
अत्र वर्णं शूद्रादिकम् इति सायणः।

[४]तानि शुक्राण्यभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्त अकार उकारो मकार इति। ऐतरेयब्राह्मणम् २५।२२।

[५]को विकारी कतिमात्रः कति वर्णः कत्यक्षरः। गोपथब्राह्मणम् १।१।२४

[६]ॐ शिक्षां व्याख्यास्यामः। वर्णः स्वरः। मात्रा बलम्। तैत्तिरीयारण्यकम् ७।२१

[७]अथापि वर्णोपजनः। आस्थद्, द्वारो भरुजेति। निरुक्तम् २।१

[८]पदक्रमविभागज्ञो वर्णक्रमविचक्षणः। स्वरमात्राविशेषज्ञो गच्छेदाचार्यसम्पदम्॥ ऋग्वेदप्रातिशाख्यस्य वर्गद्वयवृत्तिः ८।

[९]तैत्तिरीयप्रातिशाख्यम्१। १६

[१०]शब्दः प्रकृतिः सर्ववर्णानाम् तत्रैव २२।१

[११]वर्णकारौ निर्देशकौ - तैत्तिरीयप्रातिशाख्यम् २२।४

[१२]११ वर्णदोषविवेकार्थम् इत्यादि वाजसनेयिप्रातिशाख्यम् १।२६

[१३]शौनकीयचतुरध्यायिका १। ३९, १। ४०, १। ४१

पारिभाषिकार्थे एव प्रयुक्तः[१४]।

सामान्यतः प्रातिशाख्येषु अकारादयः स्वरास्तथा ककारादयो व्यञ्जना एव वर्णशब्देनाभिधीयन्ते। तैत्तिरीयप्रातिशाख्ये वैदिकाभरणभाष्ये उक्तं– "वर्ण्यन्ते व्यक्तं ध्वन्यन्त इति वर्णा अकारादयः।"[१५] इति। किञ्च, तत्र त्रिरत्नभाष्ये उक्तं– "वर्णशब्देन स्वरव्यञ्जनात्मको राशिरुच्यते।"[१६] इति।

एवञ्च शिक्षासु अपि स्वरव्यञ्जनायोगवाहादीनाम् एव वर्णशब्देन व्यवहारः भृशम् उपलभ्यते। यथा पाणिनीयशिक्षायाम्–

त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः।

एवम् अन्यासु अपि शिक्षासु वर्णशब्दस्य इत्थं प्रयोगः दृश्यते।

## २. अक्षरम्

भारतीयसाहित्ये अक्षरशब्दस्य सर्वप्रथमः प्रयोग ऋग्वेदे दृश्यते। तत्र तस्य चार्थो भवति ब्रह्म इति[१७]। शतपथब्राह्मणे अक्षरशब्दस्य शब्दांशार्थे प्रयोगो विहितः[१८] उपनिषद्ग्रन्थेषु अक्षरशब्द ॐकारस्य तथा अविनाशिनो ब्रह्मणश्च सूचकः[१९]।

ऋक्प्रातिशाख्ये अक्षरसंज्ञाविधानप्रसङ्गे उक्तं यद् ह्रस्वसंज्ञो दीर्घसंज्ञश्च स्वरः अक्षरसंज्ञको भवतीति[२०]। ऋक्प्रातिशाख्ये प्रतिपादितमस्ति यद् व्यञ्जनसहितः अनुस्वारसहितः शुद्धो वापि स्वरवर्णः अक्षरसंज्ञको भवतीति[२१]।

तैत्तिरीयप्रातिशाख्ये अक्षरसंज्ञा न विहिता किन्तु शब्दांशार्थे (Syllable) अक्षरशब्दस्य प्रयोगः "सयकारवकारं त्वक्षरं यत्र स्वर्यते स्थिते पदेऽनुदात्तपूर्वेऽपूर्वे वा। नित्य इत्येव जानीयात्"[२२] इति सूत्रे "यथास्वमक्षरसँहितादीनामप्येवम्"[२३] इति सूत्रे च वर्तते। तैत्तिरीयप्रातिशाख्ये पदसंहिताऽक्षरसंहिता वर्णसंहिताऽङ्गसंहिता चेति[२४] इति सूत्रे चापि अक्षरशब्दस्य प्रयोगो विद्यते। अस्माच्च इदम् अपि स्पष्टो भवति यद् एतन्मतेन वर्णः अक्षरं च न समानार्थकम् इति।

वाजसनेयिप्रातिशाख्ये चतुरध्यायिकायाञ्च अक्षरसंज्ञाविषये प्रतिपादितं यद् स्वरवर्णः अक्षरसंज्ञको भवतीति[२५]। किञ्च, वाजसनेयिप्रातिशाख्ये क्वचित् सूत्रयोरप्युक्तं यद् व्यञ्जनादिः अवसानान्तः स्वरः अक्षरसंज्ञो भवतीति[२६]। प्राचीनकालादेव अक्षरशब्दस्य बहुष्वर्थेषु प्रयोगो दृश्यते। प्रातिशाख्यग्रन्थेषु अक्षरशब्दस्य शब्दांशार्थे (syllable) प्रयोगोऽस्ति। अक्षरशब्दस्यास्मिन्नर्थे निर्वचनं तावत् न क्षरतीति अक्षरम् इति।

तैत्तिरीयप्रातिशाख्ये वैदिकाभरणभाष्ये अक्षरशब्दस्यास्मिन्नर्थे व्युत्पत्तिमाह- "न क्षरन्तीति अक्षराणि, क्षरणम् अन्याङ्गतया चलनम्।"

आधुनिककाले अक्षरशब्दस्य पारिभाषिकत्वेऽपि बहुष्वर्थेषु प्रयोगो दृश्यते, किन्तु अक्षरशब्दस्य सर्वग्राह्यपरिभाषाप्रस्तुतिरत्यन्तं कठिना। सामान्यतया एतद् वक्तुं शक्यते यद् अक्षरम् एकेन वर्णेन वर्णद्वयेन वा निष्पन्नं, यस्योच्चारणं झटित्येव भवति।

स्वरवर्णानामुच्चारणमन्यसाहाय्यं विना सिध्यति। स्वरवर्णस्योच्चारणम् अधिकस्पष्टतया अधिककालं व्याप्य च कर्तुं शक्यते। व्यञ्जनवर्णस्य हि उच्चारणं स्वरवर्णापेक्षं क्षणिकं च भवति। एतदेव कारणं भवति स्वरवर्णस्यैवाक्षरत्वेन स्वीकारस्य।

प्रातिशाख्यानामनुसारेण अक्षरं द्विविधं भवति गुरु लघु च। ऋक्प्रातिशाख्ये गुरुसंज्ञाविषये उक्तं यद् दीर्घस्वरो गुरुसंज्ञो भवति। किञ्च, स ह्रस्ववर्णोऽपि दीर्घसंज्ञो भवति यस्मात्परं संयुक्तं व्यञ्जनमथवा अनुस्वारस्तिष्ठति[२७]। ऋक्प्रातिशाख्ये प्रथमपटले लघुसंज्ञाया विधानं नास्ति, किन्तु भाष्ये हि भाष्यकारेणोवटेनोक्तं यद् अन्येषां परिशिष्टत्वात् तथा अन्यत्र[२८] लघु इति संज्ञाया व्यवहारदर्शनात् गुरुसंज्ञकभिन्नत्वाच्च लघुसंज्ञा[२९]।

---

[१४]१३ अथ वर्णाः संज्ञाप्रत्याहारसमाः। ऋक्तन्त्रम् १।१।

[१५]तैत्तिरीयप्रातिशाख्यस्य वैदिकाभरणभाष्यम् १। १

[१६]१५ तैत्तिरीयप्रातिशाख्यस्य त्रिभाष्यरत्नम् २२। १।

[१७]ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः। यस्तन्न वेद किमृचा करिष्यति च इत तद् विदुस्त इमे समासते॥ ऋग्वेदः १।१६४।३९॥ अत्र अक्षरे अदृश्यादिगुणके क्षरणरहितेऽनश्वरे नित्ये सर्वत्र व्याप्ते ब्रह्मणि इति सायणः।

[१८]चतुरक्षराणि ह वा अग्रे छन्दांस्याहुः। शतपथब्राह्मणम् ४।३।२।७

[१९]ओमित्येकाक्षरमुद्गीथमुपासीत। छान्दोग्योपनिषद् १।१, उद्गीतमेतत्परमं तु ब्रह्म तस्मिंस्त्रयं सुप्रतिष्ठाक्षरं च। श्वेताश्वतरोपनिषद् १। ७

[२०]उभे त्वक्षराणि। ऋग्वेदप्रातिशाख्यम् १। १९

[२१]सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोऽक्षरम्। तत्रैव १८।३२

[२२]तैत्तिरीयप्रातिशाख्यम् २०।२

[२३]तत्रैव २४।४

[२४]तत्रैव २४।२

[२५]स्वरोऽक्षरम्। वाजसनेयिप्रातिशाख्यम् १।९९। शौनकीयचतुरध्यायिका १।९३।

[२६]सहाद्यैर्व्यञ्जनैः। उत्तरैश्चावसितैः। वाजसनेयिप्रातिशाख्यम् १।१००-१०१

[२७]गुरूणि दीर्घानि। तथेतरेषां संयोगानुस्वारपराणि यानि। ऋग्वेदप्रातिशाख्यम् १। २०-२१।

[२८]अन्तःपादमकाराचेत् संहितायां लघोर्लघु। तत्रैव २।३५

[२९]पारिशेष्यादन्यानि लघुसंज्ञकानि संहितायां लघोर्लघु इति संज्ञाव्यवहारदर्शनाच्च। ऋग्वेदप्रातिशाख्यस्य उव्वटभाष्यम् १।२।

ऋक्प्रातिशाख्ये अष्टादशे पटले एतस्मिन्विषये विचारो विहितः। तत्राक्षरं चतुर्धा विभक्तम्– गुरु, गुरुतरं, लघु, लघुतरं च। ऋक्प्रातिशाख्यदिशा दीर्घाक्षरं गुरुसंज्ञं भवति[३०]। तत्र च एतदपि उच्यते यद्, दीर्घाक्षरं व्यञ्जनसहितं गुरुतरं भवति[३१]। अन्यच्च ह्रस्वाक्षरं लघुसंज्ञं भवति यदि तस्मात्परं संयुक्तवर्णः अनुस्वारो वा न तिष्ठति[३२]। व्यञ्जनसहितं च ह्रस्वाक्षरं लघुसंज्ञकं भवति[३३]। व्यञ्जनरहितं ह्रस्वाक्षरं लघुतरं भवति[३४]।

शब्देषु वाक्येषु वा विद्यमानस्वरगणनेनैव तेषु स्थितानामक्षराणां सङ्ख्या निश्चीयते। एवं स्वरपरिगणनेन अक्षरगणने नास्ति कापि समस्या। किन्तु शब्दानां पृथक् पृथक् अक्षरत्वेन विभागः सरलः न भवति। प्रातिशाख्यग्रन्थेषु अक्षरविभागसम्बन्धिनो नियमाः प्रतिपादिताः। अक्षरासत्त्वादेव व्यञ्जन-अनुस्वार-यम-स्वरभक्तिप्रभृतीनां स्वरवर्णाङ्गत्वं सिध्यति।

## ३. वर्णाक्षरयोः भेदः

स्वरः स्वरव्यञ्जनसमाहारो वा अक्षरं भवति। केचन अभिप्रयन्ति यद्, Letter एव अक्षरम्। वस्तुतस्तु, Letter ध्वनीनां स्थूलचिह्नं भवति।[३५] संस्कृतभाषायां तु ध्वनीनां सुस्पष्टानि चिह्नानि सन्ति। तस्माद् लेटर्-ध्वन्योः तादात्म्यं न कदापि सम्भवति। ध्वनेः भेदद्वयम्– अक्षरं, वर्णश्चेति। अक्षरं नाम मौलिकध्वनिः, सिद्धध्वनिर्वा। एतदेव Phoneme इत्युच्यते। अक्षरस्य वर्णकुलस्य वा मौलिकध्वनयः सर्वेषां वेदानां शाखाभिः, पाणिनिपतञ्जलिभ्यामपि स्वीकृताः। मौलकध्वनिषु चत्वारि स्वरसम्बन्धीनि अक्षराणि सन्ति। यथा अ इ उ ऋ चेति। एतेषां विकारभूता एव आ ई ऊ ॠ ए ऐ ओ औ चेति सप्त स्वराः। ऊष्मसु ह, श, ष, स चेति चत्वारि मौलिकोष्माक्षराणि सन्ति। य र ल व चेति चत्वारः अन्तःस्थाः तथा कचटतपा वर्गादौ स्थिता वर्णाः, साकल्येन सप्तदश मौलिकाक्षराणि सन्ति। प्रत्येकम् अक्षरस्य मन्द्रमध्यमोत्तमभेदेन त्रीणि स्थानानि। प्रत्येकं स्थानस्य विलम्बित-मध्यम-द्रुतभेदेन तिस्रो वृत्तयः। वृत्तयश्च उदात्तानुदात्तस्वरितभेदेन त्रिधा। उदात्तादयोऽपि ह्रस्वदीर्घप्लुतभेदेन त्रिधा विभक्ताः। एवम् एकस्य स्वराक्षरस्य ७२ भेदा भवन्ति। किञ्च, प्रत्येकम् अक्षराणाम् अन्तःस्था-ऊष्म-अनुस्वार-अनुनासिक-पञ्चवर्गभेदेन ३७ ध्वनयो भवन्ति। एवं साकल्येन ७२+३७=१०९ भेदा एकस्य स्वरस्य स्वराक्षरस्य वा। एतेषु आधिक्येन वर्णा मात्रामेव सङ्केतयन्ति। वेदे उदात्तादीनां त्रयाणां चिह्नानि अवलोक्यन्ते। अन्ये भेदा अनुमातव्या भवन्ति। अतः Letter इत्यनेन अक्षरवर्णयोः कस्यापि ग्रहणं न भवति। ध्वनिभेदा Letter इत्युच्यन्ते।

मौलिकध्वनय ऋक्प्रातिशाख्ये वर्णिताः। ततोऽपि ख़ादयः केचन वर्णाः सन्ति ये श्रुतिविशेषा इत्युच्यन्ते। तथाहि उच्यते– वर्गे वर्गे तुल्यस्थानानां तुल्यप्रयत्नानामपि प्रथमतृतीयानाम् अनुप्रदानकृतः श्रुतिविशेषः।[३६] केषाञ्चिन्मते, एते श्रुतिविशेषा न शाश्वतिकाः। उच्यते च– एके वर्णान् शाश्वतिकान् न कार्यान्[३७] इति। अस्मिन्नेव ग्रन्थे वर्णेषु चत्वारि सन्ध्यक्षराणि सन्निवेश्य अक्षरनाम्ना कथितानि– ततश्चत्वारि सन्ध्यक्षराण्युत्तराणि[३८] इति। किञ्च, आ, अ३, ई, इ३, ऊ, उ३, ॠ, ऋ३ चेति समानाक्षराणि। तथाहि उच्यते– अष्टौ समानाक्षराण्यादितः[३९] इति। किञ्च, ह्रस्वदीर्घविधानकाले वर्णा अक्षराणि वा स्वरनाम्ना अपि उक्तानि भवन्ति। उच्यते च, ओजा ह्रस्वाः सप्तमान्ताः स्वराणाम्। अन्ये दीर्घाः[४०] इति। एतौ ह्रस्वदीर्घौ सन्ध्यक्षराणि समानाक्षराणि वा अक्षरनाम्ना व्यवह्रियन्ते। अनुस्वारव्यञ्जनानि अपि अक्षराणि भवन्ति– अनुस्वारो व्यञ्जनं चाक्षराङ्गम्[४१] इति। मध्येस्थवर्णाः स्वरा इत्युच्यन्ते– स्वरान्तरे व्यञ्जनान्युत्तरस्य[४२] इति। अतो दृश्यते यद् ऋक्प्रातिशाख्ये वर्णः, अक्षरं, स्वरः, व्यञ्जनं चेति चत्वारो भेदा दर्शिताः। अनुस्वारस्य स्वरत्वेन व्यञ्जनत्वेन च व्यवहारो भवति– अनुस्वारो व्यञ्जनं वा स्वरो वा[४३] इति। अत्र अक्षरपदेन ते ध्वनयः स्वीकृता यान् मानदण्डत्वेन स्वीकृत्य तेषां तद्भेदानाम् अभेदानां वा ज्ञानं निर्धारणं वा भवति। अतो ह्रस्वाणां दीर्घाणां वा गुरुत्वलघुत्वादिभेदान् दृष्ट्वा अक्षरमिति अन्वर्थं नाम दत्तम्। अक्षराणि वर्णाः स्वरा वा व्यञ्जनानाम् अङ्गत्वेन स्वीक्रियन्ते। तथापि प्रत्येकं व्यञ्जनस्य अक्षरं पृथक् पृथक् अस्ति। एकस्यैव व्यञ्जनस्य केचन वर्णा भवन्ति। स्वरा अक्षराणां

---

[३०] गुर्वक्षरम्। गुरुदीर्घम्। ऋग्वेदप्रातिशाख्यम् १८। ३७, १८। ४१।

[३१] गरीयस्तु यदि सव्यञ्जनं भवेत्। तत्रैव १८। ४२।

[३२] लघु ह्रस्वं न चेत्संयोग उत्तरः। अनुस्वारश्च। तत्रैव १८।३८-३९।

[३३] लघु सव्यञ्जनं ह्रस्वम्। तत्रैव १८।४३।

[३४] लघीयो व्यञ्जनादृते। तत्रैव १८। ४४।

[३५] In a purely phonemic alphabet, a single phoneme is denoted by a single letter. http://en.wikipedia.org/wiki/Letter_-(alphabet) (visited on 29 January, 2015)

[३६] ऋग्वेदप्रातिशाख्यस्य उव्वटभाष्यम् १३। १३

[३७] ऋग्वेदप्रातिशाख्यम् १३।१४ इति।

[३८] तत्रैव १।२

[३९] तत्रैव १।१

[४०] तत्रैव १।१७-१८

[४१] तत्रैव १। २२

[४२] तत्रैव १। २३

[४३] तत्रैव १। ५

वर्णभेदा भवन्ति व्यक्तिभेदेन च भिद्यन्ते। अक्षराणि भवन्ति सर्वेषां मानदण्डस्वरूपा मौलिकध्वनयः। भारतीयभाषासु ए, ऐ, ओ, औ चेति यद्यपि सन्ध्यक्षराणि तथापि वस्तुतो मौलिकस्वरा एव ते। व्यञ्जनानां श्राव्यता अक्षरसहयोगेन स्फुटा भवति। व्यञ्जनानाम् अक्षराणि स्वरेणैव निर्धार्यन्ते। प्रातिशाख्येऽपि व्यञ्जनानि अक्षराङ्गत्वेन परिगणितानि। वर्णसमाम्नाये स्थितो वर्णशब्दो विभिन्नासु लिपिषु लिखितानां सङ्केतानां वाचको जातिवाचकश्च। यथा गोशब्देन गोत्वजातिर्बुध्यते, तथैव अकारेण सर्वेऽपि अकारभेदा गृह्यन्ते। अत उच्यते महाभाष्ये– अवर्णाकृतिरुपदिष्टा, सर्वमवर्णकुलं ग्रहीष्यति[४४] इति। वर्णजातिः स्वरव्यञ्जनभेदेन द्विधा। स्वरा व्यक्तिभेदेन भिद्यन्ते। अतः तान्यसङ्ख्येयानि व्यञ्जनानि स्वरान् आश्रित्य तिष्ठन्ति। वर्णादीनां बहुत्वं वीक्ष्य प्रातिशाख्यकारैः स्वराणां व्यञ्जनानां वा पृथग् बोधसौकर्याय कारशब्दः प्रयुक्तः। यथा इ इति रेखाकृतिसङ्केतिता ध्वनय इकारशब्देन गृह्यन्ते। व्यञ्जनेन सह अकारो युज्यते। अकारो व्यञ्जनस्य स्पष्टीकरणं करोति। अयमेव उच्चारणार्थः अकार इत्युच्यते। उच्चारणार्थकाकाररहितः अंशः कारशब्देन युक्तो व्यञ्जनस्य आकृतिं स्वरूपं वा ज्ञापयति। र् इत्यस्य रेफशब्देन प्रयोगो भवति। तथाहि उच्यते– रिफ्यते विपाट्यते वस्त्रादिपाटनध्वनिवदुच्चार्यत इति रेफः[४५] इति। यजुर्वेदे र् इत्यस्य रेकारत्वेन उच्चारणं भवति। वर्णसमाम्नाये वर्णशब्देन वर्णजातिः गृह्यते।

## ४. उपसंहारः

एवञ्च वर्णः अक्षरं च न समानार्थकम् इति निश्चयेन प्रतिभाति। तथापि वर्णसमाम्नायः अक्षरसमाम्नाय इत्यत्र वर्णाक्षरयोः समानार्थकव्यवहारो यद् दृश्यते तत्र विचारः कार्यः। वस्तुतः, समाम्नायशब्दः स्वीकृतसङ्केतानां, मौलिकध्वनीनां वा वाचकः। प्रातिशाख्यकारैः पाणिनिना च वर्णसमाम्नाये स्वरवर्णत्वेन ह्रस्वस्वरा एव गृह्यन्ते। तत्र स वर्णः वर्णजातेर्वाचकः यथा पतञ्जलिना निर्दिष्टम्। पुनश्च अस्मिन् समाम्नाये न केवलानि अक्षराणि न वा केवला वर्णा उपदिष्टाः। तस्माद् उभयथा अस्य व्यवहारे न काऽपि हानिः। अक्षरं नाम स्वरः। यदि स्वरः शुद्धः तदा तस्य अक्षरत्वेन वर्णत्वेन वा व्यवहारः कर्तुं शक्यत एव। किन्तु स्वरसहितस्य वर्णस्य वर्णत्वेन व्यवहारे न किमपि प्रमाणम् उपलभामहे। तत्र अक्षरम् इत्येव व्यवहारः। कारशब्देन निर्दिष्टः यः वर्णः तत्रापि अकारः उच्चारणार्थः भवति उच्चारणसौकर्याय। यथा ककार इत्यत्र क्-वर्णात् कारप्रत्ययस्य विधानं कृतम्। किन्तु उच्चारणार्थकाकारसहिताद् एव क इत्यस्मात् कारप्रत्ययः क्रियते। तत्र अयम् अकार उच्चारणार्थ एव, नान्यत् तस्य प्रयोजनम्। यदि अयम् अकारः सार्थकः गृह्यते तर्हि शुद्धं ककारम् उद्दिश्य विधिः एव प्रवर्तयितुं न शक्येत। यथा घटः क्रियते इत्यत्र विसर्गस्य स्थाने जिह्वामूलीयादेशः कर्तुं न शक्यते अकाररहितस्य ककारस्य सत्त्वात्। अतः यत्र ककार इत्युच्यते तत्र वस्तुतः क् इति शुद्धः वर्णः तस्य संज्ञी भवति। एवञ्च क इति तु न वर्णः अपि तु अक्षरम्। क् इति वर्णः भवितुम् अर्हति। एवञ्च अ इत्यस्य वर्णत्वेन अक्षरत्वेन च व्यवहारे न काऽपि विप्रतिपत्तिः।

## ग्रन्थपञ्जी


१. Ācārya, Śivarāja "Kauṇḍinnyāyan" (com.). (2004) *Pāṇinīyaśikṣā*, Varanasi: Chowkhambha Vidyabhavan
२. Chattopadhyaya, Amar Kumar (ed). (2008). *Ṛgveda–prātiśākhya*. Kolkata: Sanskrita Pustaka Bhandar.
३. Indra. (1991). *Prātiśakhyoṁ Meṁ Prayukta Pāribhāṣika Śabdoṁ Kā Ālochanatmak Adhyayan*. Varanasi: Chowkhambha Vidya Bhavan.
४. Joshi, Harisankar. (1964). *Pratibhādarśana: bhāṣā tattvaśāstra*. Varanasi: Chowkhambha Vidyabhavana.
५. Mishra, Yugalakishor (ed.). (1997). *Vājasaneya prātiśākhya: eka pariśīlana*.Varanasi: Sampūrṇānanda Sanskrita Viśvavidyālaya.
६. Sarma, Sriram. (1989). *Jyotsnāvṛttiḥ*. Varanasi: Sampurnananda Samskrita Visvavidyalaya.
७. Sastri, R. Sharma & Rangacarya, K. (eds.). (1985) *The Taittirīya-prātiśākhya: with the commentaries Tribhāṣyaratna of Somayārya and Vaidikābharaṇa of Gārgya Gopāla Yajvā* Delhi: Motilal Banarasidass Pub.P.Ltd.
८. Varma, Virendra Kumar (ed. & com.). ( 2007). *Śuklayajurveda Prātiśākhyam athavā Vājasaneyi Prātiśākhyam*. Varanasi: Chowkhambha Sanskrit Pratishthan.
९. Varma, Virendra Kumar (ed.&tr.). ( 2007). *Ṛgveda–prātiśākhya*. Varanasi: Chowkhambha Sanskrit Pratishthan.
१०. Whitney, William D (ed.). (2006) *The Atharva-Veda Prātiśākhya or Śaunakīyā Caturadhyāyikā*. Delhi: Rashtriya Sanskrit Sansthan.


☆ ☆ ☆

[४४] पतञ्जलिकृते महाभाष्ये पस्पशाह्निके
[४५] तैत्तिरीयप्रातिशाख्यस्य वैदिकाभरणभाष्यम् १। १९